दात्त्रैधमासादितमितिवृत्तमपि यथासन्दर्भमभिदर्शितं सरससरसया दृश्यप्रबन्धमर्यादानतिलङ्घनतत्परया वचनधोरण्या। प्रमाणपथवर्तिना आलङ्कारिकेण काव्यभावनापरिपक्वबुद्धिना कविसमयातिलङ्घनसाहसवैदेशिकेन सरससन्दर्भसमुचितमहनीयवचनविजृम्भणेन वश्यवाचा पुण्यश्लोकचरित्रनिबन्धनबद्धश्रद्धेन विशुद्धवंशजन्मना पावनचरित्रेणानेन कविना विरचितेनानेन, प्रबन्धरत्नेन जगदखिलमेवालङ्कृतम्। एष कविः सर्वैरपि प्रकारैः स्ववंशस्य स्वनिवासस्य स्वाभिजनस्य स्वजनपदस्य च यशःपताकासुस्तम्भयन्ननितरसाधारणीं शेमुषीं विशुद्धां वैदुषीं च विन्दंश्चिराय भूतलमलङ्कृत्यैहिकसुखमखिलमनुभूय स्वाराज्यसुखमप्यनुभवितुं नाकलोकमलङ्कुर्वन्नपि मनोहारिणानेन प्रबन्धरत्नेन सम्पादितयशश्शरीरस्सन्नद्यापि विद्योतते भूतधात्र्यां सकलजनसमक्षम्। तदुक्तमभियुक्तैः। "नरः पतितकायोऽपि यशःकायेन जीवति" इति। अत्र मदनोद्यानसरोवरविहारिणो मराळस्य वचनं प्रमाणीकृत्य विदर्भराजकन्यकां दमयन्तीमनुचिन्तयता मदनावेशविवशहृदयेन नैषधेन राज्ञा स्वस्मिन् दमयन्त्यनुरागावगतये चन्द्रकेतोः प्रेषणं तेन च कार्पटिकवेषेणात्मानं प्रच्छाद्य कुण्डिनपुरं प्रविश्य नलगुण-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

गणप्रख्यापनं तेन च सञ्जातानुरागाया भैम्याः भावाववबोधनं तन्निबन्धनो राज्ञो नळस्य-मदनबाधानुभवः, त्रैलोक्य-सुन्दरीं भैमीं नळे बद्धभावां नारदमुखादुपश्रुत्य तस्यां जाताभिलाषेण महेन्द्रेण विदर्भराजसन्निधिं प्रति मातलिसारथि-प्रस्थापनं तेन च राज्ञा स्वदुहितुः स्वयंवरमहोत्सवपरिकल्पनविषयकस्वसङ्कल्पप्रकटनम् इन्द्रेण च सारथिमुखेन तद्वेदनं कुण्डिननगरे स्वयंवरमहायेन्द्रादीनां दिक्पालानां भूतलवर्तिनां राज्ञां च सम्मेलनं तस्मिंश्च स्वयंवरमहे देवादीनुपेक्ष्य भैम्या कण्ठे वरणमालिकाप्रक्षेपणेन नळस्य वरणं तस्मात् कुपितेन महेन्द्रेण प्रेरितया गन्धर्वयोगिन्या चित्रलेखया दमयन्त्या अपहरणं प्राणवल्लभायास्तस्या वियोगेन नैषधस्योन्मादवैशसं इन्द्रेणासुरसम्प्रहारे स्वसाहाय्याय मातलिना नळस्याह्वानं देवासुरसमरे जयश्रिया स्वयंवृताय पत्ये नळाय पारितोषिकतया भैम्याः प्रत्यर्पणं पुरस्तात्प्रणष्टया परस्तादधिगतया च प्राणवल्लभया दमयन्त्या सह राज्ञो निषधराजधान्या माविन्दनगरस्यासादनमिति चात्र कमनीयं वस्तु सरससरसया भङ्गया निबद्धं महाकविनेति सर्वं समञ्जसम् ॥

इति सहृदयसमुदायदासः

त. वाधूलश्रीनिवाससूरिः

साहित्यरत्न, सारस्वतसारज्ञः ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

॥ श्रीः ॥

॥ भैमीस्वयंवरम् ॥

सञ्जाता जगदुज्जिजीवयिषया क्षीराम्बुधेर्मन्थने
सुत्रामादिषु निर्जरेषु परितः सर्वेषु जाग्रत्स्वपि ।

हेषाप्रभाप्रधावितभक्तजनाज्ञानतिमिरमसदृक्षम् ।
हयवदनाख्यमनर्घं रत्नं तद्भातु मामके हृदये ॥ १ ॥

हृद्यैः शब्दैः सरससुभगैः संविधानैश्च रम्यं
चक्रे धीमाञ्शठरिपुसुधीर्यं प्रबन्धं गभीरम् ।
तस्य व्यक्त्यै सहृदयमनस्तोषणीं दीपिकाख्यां
व्याख्यां कुर्वे विमलमतयः साहसं मे क्षमध्वम् ॥ २ ॥

अथ तत्रभवान् कविकुलतिलकः श्रीवत्सवंशमुक्तामणिः चक्रवर्तिपदलाञ्छनः पवित्रकीर्तेः श्रीनिवासगुरोस्तनूजः श्रीशठकोपनामा महाकविः 'नाटकान्तं कवित्वम्' इत्यभियुक्तवचनानुरोधेन दृश्यप्रबन्धविशेषनिर्माणशाणोपलघर्षणेन आत्मनीनकवितासुवर्णवर्णपरीक्षणमाशास्य पुण्यश्लोकचरित्रवर्णनपरप्रबन्धनिर्माणेनात्मनो जन्मसाफल्यं चाभिसन्धाय **भैमीस्वयंवराख्यं** नाटकरत्नं निर्मातुमारभमाणः प्रथमं पूर्वरङ्गप्रधानाङ्गभूतां रङ्गविघ्नोपशमनीं सूत्रधारप्रयोज्यां नान्दीं ग्रन्थारंभे उपनिबध्नाति । **संजातेति** । क्षीरांबुधेः क्षीरसागरस्य, मन्थने मथनसमये,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

जगदुज्जिजीवयिषया भुवनतलवर्तिचेतनोज्जीवनेच्छया, (हेतुना) उदः परस्य जीवेर्ण्यन्तस्य सनि अप्रत्यये च रूपमेतत् । संजाता उत्पन्ना, अर्थात् क्षीराम्बुधेरेव । 'जनिकर्तुः प्रकृतिः' इत्यनेनास्यापादानत्वम्, अपादानत्वात् पञ्चमी । 'श्रीः पूर्वमुदधेः पुनः । देवदानवयत्नेन प्रसूतामृतमन्थने ।' इति विष्णुपुराणवचनं प्रमाणतया अनुसन्धेयम् । एतदवतारस्य करुणैकप्रयोज्यत्वं स्वसङ्कल्पाधीनत्वं चाभिदधतानेन कर्मपरतन्त्रचतुर्मुखादिविशिष्टचेतनापेक्षया अस्याः परत्वं स्फुटीकृतम् । या, स्वयंवरमहे स्वयंवरोत्सवे, 'मह उद्धव उत्सवः' इत्यमरः । सुत्रामादिषु महेन्द्रप्रभृतिषु, सर्वेषु निर्जरेषु देवेषु, परितः समन्ततः 'समन्ततस्तु परितः सर्वतो विष्वगित्यपि' इत्यमरः । जाग्रत्स्वपि सस्पृहं पश्यत्स्वपि, 'षष्ठी चानादरे' इत्यनेनानादरार्थे सप्तमी । तान् हित्वा, महनीयेन श्लाघनीयेन कौस्तुभेन तन्नाम्ना रत्नविशेषेण, लसत् भास्वरं वक्षस्स्थलं उरःप्रदेशः यस्य तम्, शार्ङ्गिणं विष्णुम् दयितं वल्लभं वव्रे कण्ठे वरणमालिकाप्रक्षेपणेन वृतवती, सा, भार्गवी लक्ष्मीः भृगुकुलोत्पन्नत्वादेवं व्यपदेशः । 'भृगोः ख्यात्यां समुत्पन्ना श्रीः' इति विष्णुपुराणम् । नः अस्मान्, पातु रक्षतु । प्रार्थनायां लोट् । इदं च नाटकं दशधा विभक्तेषु प्रधानरूपकेष्वेकतमम् । रूपकलक्षणं तु 'तद्रूपारोपात्तु रूपकम्' इति साहित्यदर्पणे । 'तत् दृश्यं काव्यं नटे रामादिस्वरूपारोपात् रूपकमित्युच्यते' इति तत्रैवार्थश्च । नान्दीलक्षणं तु दर्पणे । 'आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता' इति । इयं च द्वाविंशतिपदा नान्दी । सूत्रधारलक्षणं यथा । 'नानाभाषणतत्वज्ञो नीतिशास्त्रार्थतत्ववित् । नानागतिप्रचारज्ञो रसभावविशारदः । नाट्यप्रयोगनिपुणो नानाशिल्पकलान्वितः । एवंगुणगणोपेतः सूत्रधारोऽभिधीयते' इति । अन्य-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

हित्वा तान्महनीयकौस्तुभलसद्वक्षःस्थलं शार्ङ्गिणं
या वव्रे दयितं स्वयंवरमहे सा भार्गवी पातु नः ॥

(नान्द्यन्ते सूत्रधारः ।)

त्रान्यथापि लक्षणमुक्तम् । यथा 'नाट्योपकरणादीनि सूत्रमित्यभिधीयते । सूत्रं धारयतीत्यर्थे सूत्रधार इतीर्यते' इति च । अत्र नायको धीरोदात्तः, रसः शृङ्गारः, इतिवृत्तं प्रख्यातिम् । 'अर्थतः शब्दतो वापि मनाक्काव्यार्थसूचनम्' इति लक्षणवशात् नान्द्या काव्यार्थस्य लेशतः सूचनीयतया सोऽपि मनाक् सूच्यते । कार्कोटकस्य नागस्य दमयन्त्या नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥ इत्यभियुक्तोक्तिबलेन यन्नामसंकीर्तनमखिलकलिकल्मषघ्नं, तादृशपवित्रचरित्रा महालक्ष्मीरिव मङ्गलदेवता चन्द्रप्रभयेव भीमनृपकीर्त्याभिवृद्धिमासादयति क्षीरनिधाविव विपुलतमे विदर्भराजवंशे समुत्पन्ना अहमहमिकया देवेषु महेन्द्रादिषु तदासादनाय बद्धादरेषु पुरतः सावधानेषु सत्स्वपि श्रियःपतिमिव तेजसा यशसा सौन्दर्येण च देदीप्यमानं नळमहाराजं स्वयंवरसमये दयितत्वेन या वृतवती तादृशी दमयन्ती अत्र कथानायिका इत्यंशः, पुरुषरत्नेषु अग्रगण्यः धार्मिकतया विष्ण्वंशभूतः क्षमानिधिः शौर्यसंपन्नः समरविजयी नळो नायकः, इत्यंशः, असुरसंप्रहारे नळेन दैत्येषु समूलघातं हतेषु तस्य प्रत्युपकारचिकीर्षया हठात् स्वयं हारितायाः भैम्याः नळे प्रत्यर्पणम्, इत्यंशश्च शब्दतोऽर्थतश्च मनाक्प्रबन्धार्थः सूच्यते । एवं सूक्ष्मेक्षिकया द्रष्टव्यमन्यदभिरूपैः, इत्यलं पल्लवितेन । शार्दूलविक्रीडितं वृत्तम् । 'सूर्याश्वैर्मसजाः स्तताः सगुरवः शार्दूलविक्रीडितम्' इति तल्लक्षणम् । **नान्द्यन्त इति** । अत्र सूत्रधारे निर्गते इति शेषः । **सूत्रधार इति** ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

सूत्रधारः— अलमतिविस्तरेण। अद्य खलु निखिलसुरासुरमकुटतटघटितमणिकिरणनिकरनीराजितचरणनलिनस्य जगद्वनविनोदिनो भगवतः पद्मासहायस्य चैत्रोत्सवयात्रायां नानादेशदिगन्तागताननुरूपरुचिरवेषभाषागुणवयोविभवविलक्षणान्विचक्षणान् सर्वतन्त्रस्वतन्त्रानार्यमिश्रानिमान्विज्ञापयामि। (साञ्जलिबन्धं) भो भोः सकलकलासम्प्रदायविदः समासदः! अहं खलु नाट्यवेदोपाध्यायस्य विद्याविशारदनामधेयस्य भरतपुत्रस्य तनूजो विलासशेखरो नाम।

मुनिना भरतेन या प्रणीता
मृदुनाट्यागमसंप्रदायशैली।

अयं स्थापकापरनामा नटः। अलमित्यादि। एतस्मादारभ्य कविः भारतीवृत्तिं प्रस्तौति। तल्लक्षणं तु— 'भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः।' इति। अलमिति वारणे। 'मा स्म मालं च वारणे' इत्यमरः। अतिविस्तरो मास्त्वित्यर्थः। राजीवं तामरसम्, विनोदः सुखेन कालयापनम्। भगवतः 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना'। इति, 'उत्पत्तिं च विनाशं च भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति'। इति च निरुक्तस्य समग्रैश्वर्यादेः भूतोत्पत्तिविनाशादिविषयकवेदनस्य च आश्रयभूतस्य। भो भोरित्यादि। अस्मात्प्रभृति भारतीवृत्त्यङ्गचतुष्टये प्राथमिकतया निर्दिष्टा प्ररोचना प्रस्तूयते। कविकाव्यनटादिप्रशंसया सामाजिकौन्मुख्यसम्पादनात्। मुनिनेति।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

बहुशः परिशील्य तां समग्रां
प्रभुगोष्ठ्यां बहुमानपात्रमस्मि ॥ २ ॥

तदस्मिन्महोत्सवसमये किमपि रूपकमभिनीय परिषदा-राधनाय प्रयतिष्ये । कालिदासभवभूतिप्रमुखकविवरप्रबन्धे-

---

मुनिना ब्रह्मस्वरूपमनननशीलेन ऋषिणा भरतेन एतन्नामघटकैस्त्रि-भिरप्यक्षरैः क्रमेण स्वप्रणीतनाट्यशास्त्रप्रतिपादिताः भावरागताळाः सूचिताः । तथा चोक्तं श्रीनिगमान्तमहादेशिकैः । 'उपवेदमुदारधीः स्वनाम्ना भरतः सूचितभावरागतालम् । यमुदाहरति स्म विश्वगुप्त्यै तदभिज्ञैरबहिष्कृता वयं स्मः ।' इति । या मृदोः सुकुमारस्य नाट्यागमस्य नाट्यशास्त्रस्य यः संप्रदायः यथाविधि गुरूच्चारणानूच्चारणपुरस्सरं अन्तेवासिभिः तदभिज्ञाचार्यपारंपर्यात् विद्याग्रहणम्, तस्य शैली रीतिः, प्रणीता प्रबन्धमुखेन प्रतिपादिता, 'उपसर्गादसमासेऽपि णोपदेशस्य' इत्यनेन प्रात् नयतेर्णत्वम् । समग्रां संपूर्णां तां नाट्यागमसंप्रदायशैलीं प्रभूणां गोष्ठयां समाजे, बहुशः अनेकवारं 'बह्वल्पार्थाच्छस् कारका-दन्यतरस्याम्' इति शस् । परिशील्य प्रयुज्य, बहुमानस्य (अर्थात् प्रभूणाम्) सम्मानस्य गौरवस्य वा पात्रं योग्यः विषयो वा, अस्मि । 'योग्यभाजनयोः पात्रम्' इत्यमरः । नाट्यं तु सात्विकादिभिः चतुर्विधैरभिनयैः नटेन धीरोदात्तादिनायकावस्थानुकरणम् । तदुक्तम् । 'चतुर्विधैरभिनयैः सात्विकाङ्गिकपूर्वकैः । धीरोदात्ताद्यवस्थानुकृतिर्नाट्यं रसाश्रयम्' इति । ईदृशनाट्याश्रयं नाटकम् । रसाश्रयं सात्विकाभिनय-बहुळम् वाक्यार्थाभिनयप्रायं नाट्यम् । नृत्यन्तु भावाश्रयं आङ्गिकाभि-नयबहुळं पदार्थाभिनयप्रायम् । नृत्तन्तु अभिनयशून्यं गात्रविक्षेपमात्रम्;

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

षु कतमस्मिन्प्रबन्धे भवतां परितोषः? (आकाशे) सम्य-क्परिशीलिताः प्राचां प्रबन्धाः। तेषां प्रयोगाश्च बहुशोऽध्यक्षिताः। ततः,

पुण्यश्लोकचरित्रपावनतमं मिश्रं कथाकल्पनैः
शृङ्गारप्रचुरं तथेतररसैर्युक्तं यथासम्भवम्।
चित्रार्थं महनीयभावरुचिरं नव्यं सभारञ्जकं
तादृग्रूपकमद्भुतं वयममी द्रष्टुं समुत्कण्ठिताः ॥३॥

इति त्रयाणां परस्परं भेदोऽवगन्तव्यः। वसन्तमालिका। विषमे ससजा गुरू समे चेत् सभरा यश्च वसन्तमालिका स्यात्। इति लक्षणम्। **आकाश इति**। किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते। श्रुत्वेवानुक्तमप्यर्थं तत्स्यादाकाशभाषितम्। इति लक्षणम्। **सम्यगित्यादि**। अध्यक्षिताः दृष्टाः। **तत इति**। तस्मादित्यर्थः। 'पञ्चम्यास्तसिल्' इत्यनेन पंचम्यन्तात्तच्छब्दात्तासिल्। ततः प्राग्दिशीयत्वात् विभक्तिकार्ये दकारस्याकारः। **पुण्येति**। पुण्यश्लोकस्य परिशुद्धकीर्तेः महापुरुषस्य, चरित्रेण, पावनतमं अतिपरिशुद्धम्, कथाकल्पनैः कविकल्पिताभिः कथाभिश्च मिश्रं संवलितम्, शृङ्गं प्राधान्यं इयर्ति गच्छति इति शृङ्गारः रसराजः तेन प्रचुरं बाहुल्येन शृङ्गाररसवर्णनपरम्, तथा, संभवमनतिक्रम्य यथासंभवम्, पदार्थानतिवृत्तौ अव्ययीभावः। तत्तदर्थसन्दर्भौचित्यानुगुण्येन इतररसैः अङ्गत्वेनानुप्रविष्टैः वीरकरुणादिरसैश्च, युक्तं सङ्घटितम्, चित्रार्थं नानाविधार्थसहितं, महनीयैः श्लाघनीयैः भावैः सहृदयहृदयरञ्जकैरभिप्रायैः रुचिरं मनोज्ञम्, नव्यं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

इति । अहो महती परिषदाज्ञा (विचिन्त्य नेपथ्याभिमुखमवलोक्य) आर्ये! इतस्तावत् ।

(प्रविश्य)

नटी— अज्ज इअंमि, आणत्तव्वं आणवेदु अज्जो ।

आर्य इयमस्मि, आज्ञप्तव्यमाज्ञापयत्वार्यः ।

सूत्रधारः— ('पुण्यश्लोक' इति परिषदाज्ञाश्लोकं पठित्वा) **कथ**मेतादृशलक्षणसंपन्नं प्रबन्धं प्रयुज्य परिषदाराधनं स्यादिति भूयस्यस्माकं विचिकित्सा ।

नटी— अच्चरिअं अच्चरिअं । अज्ज अणदिचिरप्पवुत्तणट्टप्पओओवदेसं भैमीसअंवरं णाम अहिणवं णाडअं अम्मासु सुसिक्खिदं मेधाधारिअं अ वट्टइ । ता कहं विचिइस्सा ।

नूतनं, सभारञ्जकं अभिज्ञगोष्ठीप्रीतिजनकं, तादृक् पूर्वोक्ततत्तद्गुणमण्डितं, 'आ सर्वनाम्नः' इत्यनेन दृक्शब्दे परे तदो दस्य आकारः। अद्भुतं आश्चर्यावहं, रूपकं दृश्यप्रबन्धविशेषं, अमी, वयं, द्रष्टुं, समुत्कण्ठिताः संजाताभिलाषाः, भवाम इति शेषः । 'अस्तिभवतिविद्यतयोऽविद्यमाना अपि प्रयोक्तव्याः' इति साहित्यविदः । शार्दूलविक्रीडितं वृत्तम् । **नेपथ्येति** । यवनिकान्तरितं वर्णिकापरिग्रहयोग्यं कुशीलवकुलाधिष्ठितमभ्यन्तरं स्थलं नेपथ्यम् । तदुक्तम् । 'कुशीलवकुटुंबस्य स्थली नेपथ्यमि-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

आश्चर्यं आश्चर्यं । आर्यं अनतिचिरप्रवृत्तनाट्यप्रयोगोपदेशं भैमीस्वयंवरं नामाभिनवं नाटकमस्मासु सुशिक्षितं मेधाधारितञ्च वर्तते । तत्कथं विचिकित्सा ।

सूत्रधारः— (सपरितोषं) सम्यग्बोधितोऽस्मि भवत्या। अथवा,

कुलविद्या हि सर्वेषां प्रसङ्गेन प्रकाशते ।
नाट्यविद्या तु सर्वेषां प्रयोगेन विशुध्यति ॥४॥

तदिदं नाटकं श्रीवत्सकुलकलशांबुधिपूर्णचन्द्रस्य चक्रवर्तिपदलाञ्छनस्य श्रीनिवासगुरोस्तनूजेन शठकोपनाम्ना कविना प्रणीतं विदुषां सभासु प्रयोक्तव्यमिति मम हस्ते समर्पितमासीत् । तस्य प्रयोगे सर्वेऽपि मद्वर्ग्याः

ध्यते' इति । विचिकित्सा संशयः । **कुलेति** । उत्तमाधमविभागमन्तरेण सर्वेषामपि कुलविद्या स्वस्ववंशविद्या, प्रसङ्गेन असाधारणोत्कर्षप्रकटकसन्दर्भेण शोभते दीप्यते हि । हिः प्रसिद्धौ । सर्वेषां, नाट्यविद्या तु भेदद्योतकेन तुना इतरविद्यापेक्षया अस्या वैलक्षण्यं बोध्यते । 'तुः स्याद्भेदेऽवधारणे' इति कोशः । प्रयोगेन सदसि भावुकजनमनोरञ्जकेनाभिनयेनैव, विशुद्धयति विद्वदनुमोदनेन निर्दोषतां उत्कर्षं च प्राप्नोति । कालिदासोऽपि । "आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् । बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ।" इति । **तदित्यादि** । कलशांबुधिः क्षीरसागरः । लाञ्छनं चिह्नं, मम वर्गः मद्वर्गः तत्र भवाः तस्य हिता वा

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

समग्रं शिक्षिताः । तेन रूपकेण सामाजिकानां मनांस्या-
वर्जनीयानीति मे निश्चयः, (विचिन्त्य सानन्दं) अहो दैवानु-
कूलता नाट्यसंविधानस्य । तथा हि—

काळोऽयं कुसुमाकरः परिषदप्येषा गुणश्लाघिनी
ख्यातान्यस्य कवेर्वचांसि मधुराण्युत्कर्षमाबिभ्रति ।
मद्वर्ग्या निखिलाः प्रयोगकुशला नाट्येषु दक्षा वयं
सर्वं भाग्यवशादयत्नमधुना दैवेन संपादितम् ॥

अथ कविप्रशंसा तु सर्वतः प्रसिद्धैव सतां गोष्ठीषु । ततः किमत्र तत्प्रपञ्चनेन । आर्ये ! नाट्यप्रयोगे तव कर्तव्यमुपदिशामि ।

मद्वर्ग्याः, समग्रं निरवशेषं यथा तथा, शिक्षिताः विद्यां ग्राहिताः । आवर्जनीयानि वशीकार्याणि । अहो इति विस्मये । 'अहो हि च विस्मये' इत्यमरः । काल इति । अयं, कालः, कुसुमाकरः पुष्पाणां उत्पादकः, वसन्तः इति यावत् । एषा, परिषदपि सभापि, गुणान् ताच्छील्येन श्लाघते इति गुणश्लाघिनी, ख्यातानि प्रसिद्धानि, मधुराणि माधुर्यगुणयुक्तानि, अस्य कवेः, वचांसि, उत्कर्षं श्रैष्ठ्यम्, आबिभ्रति भरतेर्जौहोत्यादिकाल्लटि रूपम् । मद्वर्ग्याः मत्पक्ष्याः निखिलाः समस्ता अपि, प्रयोगे अभिनये, कुशलाः प्रवीणाः । वयमपि, नाट्येषु चतुर्विधैः सात्विकाद्यभिनयैः धीरोदात्तादिनायकावस्थानुकृतिषु, दक्षाः समर्थाः । सर्वं वाञ्छितमखिलमपि, अधुना संप्रति, भाग्यवशात्, भाग्याधीनतया, दैवेन विधिना, अयत्नं मामकप्रयत्नमनपेक्ष्यैव, संपादितं निष्पादितम् । शार्दूलविक्रीडितं वृत्तम् ॥

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

सम्यक्ताळमृदङ्गनादमनुयात्वङ्घ्र्योर्लयप्रक्रमो
गीतस्याभिनयो विकल्परचनारम्यो भवत्वाङ्गिकः ।
तत्तद्भावरसेषु तन्मयतया व्यक्तिः प्रदृश्या शनै-
श्चित्तैकाग्र्यवती त्वमद्य कुशला नाट्येऽभिनन्द्या भव ॥

नटी— अज्जस्स उवदेसो विसुद्धो खु । तह वि जहोव-
देसं अवहिदंमि ।

आर्यस्य उपदेशो विशुद्धः खलु । तथापि यथोपदेशं अवहितास्मि ।

सूत्रधारः— भवतु नाट्यप्रयोगारंभाय वसन्तमधिकृत्य प्रस्तूयतां संगीतकं । अद्य खलु,

---

सम्यगिति । अङ्घ्र्योः चरणयोः, लयः नृत्तगीतवाद्यानां साम्यं, तदनुरोधेन प्रक्रमः चारीभेदेषु प्रचारः, तालस्य, मृदङ्गस्य च, नादं सम्यक्, अनुयातु अनुसरतु । अङ्गैर्निर्वृत्तः आङ्गिकः, गीतस्य गानस्य, अभिनयः अभिव्यंजकचेष्टाविशेषः विकल्पानां अभिनेयहर्षशोकादिभावाविष्कारकचेष्टाभेदानां रचनासु कलनासु रम्यः मनोज्ञः, भवतु । व्यक्तिः तेषु तेषु भावेषु विभावानुभावसात्विकसंचारिभावेषु, रसेषु शृङ्गारादिरसेषु च, तन्मयतया तत्तद्भावरसप्रचुरतया, शनैः अद्रुतं यथा तथा, प्रदृश्या प्रदर्शनीया । कुशला समर्था, त्वं, अद्य चित्तैकाग्र्यवती सावधानमनस्का सती, नाट्ये अभिनन्द्या सामाजिकैः श्लाघनीया, भव अभीष्टार्थे लोट् ॥

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

मन्दानिलप्रसरलोलशिखासु कामं
मल्लीलतासु विहरन्नपि मत्तभृङ्गः ।
पुष्पोद्गमेन मधुरामखिलाभिनन्द्यां
भोक्तुं प्रसह्य नवचूतलतामुपैति ॥ ७ ॥

नटी— अज्ज, अहं वि गाइस्सं ।

आर्य अहमपि गास्यामि ।

केसरकुसुमणिसण्णा
महुरसलोळा वि महुअरी का वि ।
दट्ठूण मदमिळिन्दं
देण विणा भमदि मअणसंतत्ता ॥ ८ ॥

मन्देति । मत्तभृङ्गः मन्दानिलस्य मन्दमारुतस्य प्रसरेण सञ्चारेण लोलाः चंचलाः शिखाः यासां ताः, तासु, मल्लीलतासु, कामं यथेच्छं, विहरन्नपि क्रीडन्नपि, पुष्पोद्गमेन पुष्पोत्पत्त्या मधुरां मनोज्ञां, अखिलैः अभिनन्द्यां श्लाघनीयां, नवचूतलतां प्रत्यग्रोद्गतरसालयष्टिं, प्रसह्य बलात्कारेण, भोक्तुं अनुभवितुं, उपैति अनुधावति । वसन्ततिलकं वृत्तम् । 'उक्तं वसन्ततिलकं तभजा जगौ गः' इति लक्षणम् ॥ **केसरेति ।** केसरकुसुमे वकुळपुष्पे निषण्णा निलीना, कापि, मधुकरी भ्रमरी, मधुरसे मकरन्दे, लोलापि सतृष्णापि मदमिळिन्दं मदेन यौवनमदेन युक्तं मिळिन्दं भ्रमरं, दृष्ट्वा, मदनेन उत्कटभोगेच्छया सन्तप्ता (सद्यः समागमालाभेन) मनोव्यथामासादिता सती, तेन विना तं मदमिळिन्दमन्तरा, भ्रमति मधुरसमनास्वाद्य कुत्रापि स्थिति-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

केसरकुसुमनिषण्णा
मधुरसलोलापि मधुकरी कापि।
दृष्ट्वा मदमिलिन्दं
तेन विना भ्रमति मदनसंतप्ता ॥

सूत्रधारः— आर्ये! साधु गीतम् ।

अहो गीतस्य माधुर्यमहो तस्यार्थमाधुरी ।
सभा चित्रार्पितेवेयं हारिणा दृश्यतेऽमुना ॥ ९ ॥

आर्ये! किं विळम्बेन । तत्तत्पात्रोचितभूमिकापरिग्रहेषु प्रथमं रङ्गावतरणाय त्वं राज्ञो नळस्य देव्याः कमलपालिकायाश्चेटीवेषधारिणी भव । अहं पुनर्विदूषकभूमिकामादायानुपदमेवागच्छामि ।

[इति निष्क्रान्तौ ।

॥ प्रस्तावना ॥

मलभमाना परितः संचरतीत्यर्थः । **अहो इति** । गीतस्य गानस्य, माधुर्यं, अहो आश्चर्यावहम् । तस्य गीतस्य, अर्थमाधुरी अभिधेयगतमाधुर्यगुणोऽपि अहो विस्मयावहा । हारिणा मनोहरेण, अमुना गीतेन, इयं सभा, चित्रे आलेख्ये, अर्पितेव लिखितेव, दृश्यते लक्ष्यते । उत्प्रेक्षालङ्कारः । आर्ये इत्यादि । भूमिका वेषः, अनुपदमेव त्वत्पदन्यासं लक्ष्यीकृत्य अनन्तरमेवेत्यर्थः । आगच्छामि आगमिष्यामीत्यर्थः ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

(ततः प्रविशति चेटी)

चेटी— आणत्तंमि देवीए कमळपाळिआए—हंजे कमळिणि ! मअणुज्जाणं गदुअ पडिणिवुत्तो अज्जउत्तो । तदो आरहिअ उम्मणायमाणो वट्टइ । तस्स काळणं किंति अज्जउत्तेण समं मअणुज्जाणं गदं अज्जसोमअं पुच्छिअ आअंदव्वन्ति । ता तं अण्णेसामि ।

आज्ञप्तास्मि देव्या कमलपालिकया—हंजे ! कमलिनि ! मदनोद्यानं गत्वा प्रतिनिवृत्त आर्यपुत्रः । तत आरभ्य उन्मनायमानो वर्तते । तस्य कारणं किमिति आर्यपुत्रेण समं मदनोद्यानं गतं आर्यसोमकं पृष्ट्वा आगन्तव्यमिति । तस्मात्तमन्वेषयामि ।

(ततः प्रविशति विदूषकः ।)

विदूषकः— (गात्रवैकल्यानुभवमभिनीय, निश्वस्य) विसेसदो परिस्सन्तोस्मि ।

विशेषतः परिश्रान्तोऽस्मि ।

कमलिनी— (श्रुत्वा विलोक्य) अज्जसोमओ किंवि मन्त-

आज्ञेत्यादि । उन्मनायमानः उत्सुकं मनः यस्य सः उन्मनाः स इवाचरन् उन्मनायमानः । गात्रेत्यादि । वैकल्यं अस्वास्थ्यं ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

अंतो चिट्ठइ। ता एत्थ अंतरिदा हविअ इमस्स विस्संभ-जप्पिआइं सुणिस्सं। (इति तथा करोति)

आर्यसोमकः किमपि मन्त्रयमाणः तिष्ठति। तदत्रा-न्तरिता भूत्वा अस्य विस्रम्भजल्पितानि श्रोष्यामि।

विदूषकः— (विहस्य) अहो पडिणदं अंदेउरवहूजणेसु णिव्वुत्तकामाहिळासस्स पिअवअस्सस्स रण्णो णळस्स विसअचावळं।

अहो परिणतमन्तःपुरवधूजनेषु निवृत्तकामाभिलाष-स्य प्रियवयस्यस्य राज्ञो नळस्य विषयचापलम्।

कमलिनी— इदं खु सळिळं विइण्णंदीए णदीदंसणं विअं। एसो बंहणो राअपरिसरवट्टणाणुजीवी देवीए आणत्तं पुच्छिदो वि राअरहस्संति सच्चं ण कहइस्सदि। ता एत्थ ट्ठिदा एव्व वअणावसेसं वि सुणिस्सं।

इदं खलु सलिलं विचिन्वत्या नदीदर्शनमिव। एष ब्राह्मणः राजपरिसरवर्तनानुजीवी देव्या आज्ञप्तं पृष्टोऽपि राजरहस्यमिति सत्यं न कथयिष्यति। तदत्र स्थितैव वचनावशेषमपि श्रोष्यामि।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

विदूषकः— जो मअणुज्जाणसरोवरविहारिणो मराळस्स वअणं पमाणीकरिअ विअब्भराअकण्णअं दमअंदिं अणुचिन्तअंतो मअणाविट्ठहिअओ आसी, तस्स रण्णो वअस्सभावेण अदिक्कंदण्हाणभोअणवेळं तं अणुधावन्तस्स मम वि ईरिसो दसापरिणामो संवुत्तो । ता अज्ज वि हत्थपादा णप्पसरंदि । (इति विषमपदविन्यासं परिक्रामति)

यो मदनोद्यानसरोवरविहारिणो मराळस्य वचनं प्रमाणीकृत्य विदर्भराजकन्यकां दमयन्तीमनुचिन्तयन्मदनाविष्टहृदय आसीत्, तस्य राज्ञो वयस्यभावेन अतिक्रान्तस्नानभोजनवेळं तं अनुधावतो ममापि ईदृशो दशापरिणामः संवृत्तः । तदद्यापि मम हस्तपादं न प्रसरति ।

कमलिनी— (सस्मितं) सोदव्वं सुदं दाव मए, इमं वुत्तन्दं देवीए णिवेदइस्सं (इति विदूषकस्य परिसरं गच्छति)

श्रोतव्यं श्रुतं तावन्मया । तदिमं वृत्तान्तं देव्यै निवेदयिष्यामि ।

य इत्यादि। सरः पद्माकरः, मराळकस्य हंसस्य, प्रमाणीकृत्य अप्रमाणं प्रमाणं संपद्यमानं कृत्वा प्रमाणीकृत्य, यथार्थमिति निश्चित्येत्यर्थः। दशापरिणामः अवस्थाविशेषः, विषमः विसंस्थुलः पदन्यासः यस्मिन्कर्मणि तत्।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

विदूषकः— (विलोक्य सविशङ्कं स्वगतं) कहं एत्थ देवीए कमलपालिआए आसण्णपरिआरिआ कमलिणी चिट्ठइ। अविणाम मम विस्संभजप्पिअं इमाए हदासाए सुदं भवे। होदु। (प्रकाशं) वच्छे कमलिणि कहिं पत्थिदासि।

कथमत्र देव्याः कमलपालिकाया आसन्नपरिचारिका कमलिनी तिष्ठति। अपि नाम मम विस्रम्भजल्पितं अनया हताशया श्रुतं भवेत्। भवतु। वत्से कमलिनि! कुत्र प्रस्थितासि।

कमलिनी—(विचिन्त्य, स्वगतम्) एव्वं कहइस्सं, (प्रकाशम्) भत्तुणो सोहग्गवद्धणणिमित्तं कुळदेवदाराहणं कदुअ तस्स किदे अप्पिदं मोदअभाअणं दक्खिणासहिदं बंहणस्स समप्पणिज्जन्ति देवीए वअणेण भवंतं आणेदुं आअदंहि।

परिक्रामति समन्ततः चरति। **अपि नामेति**। अत्र अपिः शङ्कायाम्। 'गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि' इत्यमरः। विस्रंभः विश्वासः, भवतु इति सासूयाभ्युपगमे। **प्रकाशमिति**। दृश्यं श्राव्यं सूच्यमिति त्रेधा विभक्तं नाटके वस्तु। तत्र श्राव्यं द्विविधं सर्वश्राव्यं नियतश्राव्यञ्चेति। नियतश्राव्यमपि द्वेधा। जनान्तिकम् अपवारितं चेति। अश्राव्यं यत् तत् स्वगतम्। **भर्तुरित्यादि**। सुभगस्य भावः सौभाग्यं कामिनीवल्लभत्वं, तस्य वर्धनं अभिवृद्धिः, तन्निमित्तं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

एवं कथयिष्यामि । भर्तुः सौभाग्यवर्धननिमित्तं कुलदेवताराधनं कृत्वा तस्य कृते अर्पितं मोदकभाजनं दक्षिणासहितं ब्राह्मणाय समर्पणीयमिति देव्या वचनेन भवन्तमानेतुमागतास्मि ।

विदूषकः— (सामोदहासम्) वच्चे कमळिणि! महाराअं पिअवअस्सं दट्ठूण पच्चा देवीए सआसं गच्छम्मि ।

वत्से कमलिनि! महाराजं प्रियवयस्यं दृष्ट्वा पश्चाद्देव्याः सकाशं गच्छामि ।

कमलिनी— तह ।

तथा । [इति निष्क्रान्ता ।

विदूषकः— पिअवअस्सं कहिं पेक्खिस्सं । (इति परिक्रामति)

प्रियवयस्यं कुत्र प्रेक्षिष्ये ।

(ततः प्रविशति राजा नळः ।)

राजा— (सस्पृहम् ।)

वाचा हंसपतेः सुधारसमुचा वाञ्छाधिरूढा दृढं
द्रष्टव्या सुदती विदर्भदुहितेत्युत्कण्ठितं मे मनः ।

तदर्थं, तस्य कृते तदर्थम् । **वाचेति** । सुधारसम् अमृतं मुंचति स्रावयतीति सुधारसमुक् तया, अत्यन्तं स्वादयेत्यर्थः । हंसपतेः राजहंसस्य, वाचा, वाञ्छा इच्छा, दृढं अशिथिलं यथा तथा, अधिरूढा अभिवृद्धिं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

रूपं त्वीदृशमित्यगोचरतया ध्यातुं न मे शक्यते
नेपथ्यान्तरितेव केवलमियं चित्ते मुहुर्नृत्यति ॥१०॥

विदूषकः— (उपसृत्य) वड्ढदु भवं ।
वर्धतां भवान् ।

राजा— (अश्रुतिमभिनीय, सविमर्शम् ।)

प्रकृतिसुभगगात्री सा परं पक्ष्मलाक्षी
त्रिभुवनजयवाञ्छासाधनं मीनकेतोः ।
सुकृतशतमहिम्ना श्रोत्रयोः पात्रमासी-
त्सपदि मम कदा वा प्रीतिमक्ष्णोर्विदध्यात् ॥

गता । सुदती शोभनाः दन्ताः यस्याः सा तादृशी, युवतिरित्यर्थः । विदर्भस्य विदर्भदेशाधिपस्य (भीमस्य) दुहिता पुत्री, दमयन्ती, द्रष्टव्या अवलोकनीयेति, मे मनः, उत्काण्ठितं साभिलाषं, अस्तीति शेषः ॥ रूपं तु देहसौन्दर्यं तु, अगोचरतया अप्रत्यक्षतया, गावः (दृष्टयः) चरन्ति अस्मिन्निति गोचरः, तस्य भावः तत्ता तया, ईदृशामिति ध्यातुं चिन्तयितुं, मे न शक्यते मया न पार्यते । इयं भैमी, नेपथ्येन तिरस्करिण्या अन्तरितेव तिरोहितेव· व्यक्ताव्यक्तस्वरूपा, चित्ते मन्मनोरूपे रङ्गस्थले, मुहुः असकृत्, नृत्यति । केवलं निश्चितमित्यर्थः । 'निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोः' इत्यमरः । उत्प्रेक्षालङ्कारः । शार्दूलविक्रीडितम् । **प्रकृतीति** । प्रकृत्या स्वभावेन ललितं मनोज्ञं गात्रं यस्याः सा तादृशी, पक्ष्माणि रोमाणि अनयोः सन्तीति पक्ष्मळे तादृशे आक्षिणी नेत्रे यस्याः सा तादृशी, परं उत्कृष्टं, मीनकेतोः मन्मथस्म,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

विदूषकः— भो वअस्स ! कीरिसी सा कण्णआ ।

भो वयस्य ! कीदृशी सा कन्यका ।

राजा— (विलोक्य) सखे ! किं कथयसि ।

विदूषकः— कहं उम्मादबधिरत्तणं पिअवअस्सस्स । (प्रकाशं) भो वअस्स ! तुह हिअअट्ठिदा कण्णआ कीरिसित्ति पुच्छेमि ।

कथमुन्मादबाधिरत्वं प्रियवयस्यस्य । भो वयस्य ! तव हृदयस्थिता कन्यका कीदृशीति पृच्छामि ।

राजा— सखे ! किं कथयामि ।

विस्रम्भतः पक्षिगिरं निशम्य
परोक्षवृत्तावपि पङ्कजाक्ष्याम् ।

(संबन्धि) त्रिभुवनजये त्रैलोक्यविजये या वाञ्छा अभिलाषः तस्याः साधनं उपकरणं, सा भैमी, सुकृतशतस्य महिम्ना माहात्म्येन, सपदि श्रोत्रयोः श्रवणयोः, पात्रं विषयः, आसीत् । मम, अक्ष्णोः लोचनयोः, प्रीतिं आनन्दं, कदा वा कस्मिन् समये विदध्यात् । आशंसायां लिङ् । मालिनीवृत्तम् । 'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् । **विस्रंभत इति** । पक्षिगिरं हंसवचनं, निशम्य श्रुत्वा, विस्रंभतः, पक्षिवचनगताद्विश्वासात् (हेतोः) परोक्षवृत्तावपि अक्ष्णः परं परोक्षं तत् अस्याः अस्तीति परोक्षा तादृशी वृत्तिः स्थितिः यस्याः सा तादृश्यामपि, पङ्कजाक्ष्यां दमयन्त्यां, (विषये) दृढं गाढं यथा तथा, अनुषक्तं संबद्धम्, एतत्, मदीयं मामकं, हृदयं मनः, फले विशङ्कया विविधेन सन्देहेन

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

दृढानुषक्तं हृदयं मदीयं
फले विशङ्काकुलमेतदास्ते ॥ १२ ॥

विदूषकः— (विहस्य) भो वअस्स ! कहं तुमं सण्णिहिदं अंदेउरवहूअणं अविगणिअ देसंदरट्ठिदं अदिट्ठरूवं असुलहं कण्णआअणं अहिळसंतो समुण्णदविडवंदरिदं चूअफलं कुब्जो विअ उत्तम्मसि ।

भो वयस्य ! कथं त्वं सन्निहितमन्तःपुरवधूजनमविगणय्य देशान्तरस्थितमदृष्टरूपं असुलभं कन्यकाजनं अभिलषन् समुन्नतविटपान्तरितं चूतफलं कुब्ज इव उत्ताम्यसि ।

राजा—

अपि कथमगमं तां मन्मथोद्यानवापीं
मम करगत एकस्तत्र किं मल्लिकाक्षः ।
कथमथ कथितं वा तेन कान्ताचरित्रं
तदभवदखिलं मे हन्त कष्टाय भूयः ॥ १३ ॥

आकुलं क्षुब्धं, आस्ते । इन्द्रवज्रोपेन्द्रवज्रयोर्मेळनादुपजातिः । तल्लक्षणन्तु । ‘ अनन्तरोदीरितलक्ष्मभाजः पादा यदीया उपजातयस्ताः ’ इति । **अपि कथमिति ।** अपिरत्र गर्हायाम् । अहं तां मन्मथोद्यानस्य तन्नाम्नः आक्रीडस्य (संबन्धिनीं) वापीं दीर्घिकां, कथं किमर्थं, अगमम् ? तत्र वाप्यां, एकः, मल्लिकाक्षः हंसविशेषः, किं किमर्थं, मम, करगतः हस्तं प्राप्तः ?

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

विदूषकः— भो वअस्स एव्वं अदिभूमिं गदे एआरिसे आसाहिणिवेसे एत्थ को उण तुए चिंतिदो उवाओ ।

वयस्य, एवमतिभूमिं गते एतादृशे आशाभिनिवेशेऽत्र कः पुनस्त्वया चिन्तित उपायः ।

राजा— सखे ! किमन्यत् ।

असन्निधानेऽपि ममोत्पलाक्ष्यां
गुणोक्तिभङ्ग्या प्रणयोपदेष्टा ।
स एव तस्या मयि मल्लिकाक्षः
सन्धानकर्मण्यपि संविधाता ॥ १४ ॥

विदूषकः — (विहस्य) भो वअस्स ! बिसखण्डखादणाहिळासेण दिगन्तरट्ठिदणदणदीप्पमुहसळिळसण्णिवेसेसु संचरंतस्स पक्खिणो वअणंमि कहं पच्चओ होदि ।

अथ कात्स्न्र्येन, कान्तायाः प्रेयस्याः चरित्रं, तेन पक्षिणा, कथं किमर्थं वा, कथितम् अभिहितम् ? तदखिलं, भूयः मे कष्टाय अभवत् । हन्तेति खेदे । मालिनीवृत्तम् । **भोः इत्यादि** । अतिभूमिं आधिक्यम् । आशायाः अभिलाषस्य अभिनिवेशः स्थैर्यम् । **असन्निधानेऽपीति** । असन्निधानेऽपि व्यवहितदेशस्थितावपि, गुणानां दमयन्तीगतसौन्दर्यादिगुणानां उक्तिभङ्ग्या प्रवचनफक्किकया, (हेतुना) उत्पलाक्ष्यां दमयन्त्यां, यः, मम, प्रणयोपदेष्टा प्रेमोत्पादकः, सः मल्लिकाक्षः हंस एव, मयि, तस्याः भैम्याः, सन्धानकर्मण्यपि सङ्घटनकार्येऽपि, संविधाता सम्यग्व्यवस्थापाद-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

भो वयस्य, बिसखण्डखादनाभिलाषेण दिगन्तर-स्थितनदनदीप्रमुखसलिलसन्निवेशेषु सञ्चरतः प-क्षिणो वचने कथं प्रत्ययो भवति ।

राजा— सखे! कथमेवमाशङ्कसे ।

हंसः केळिवनं गतेन हि मया दृष्टो न चाभ्यर्थित-
स्तेनैव स्वयमादरान्नृपसुतावृत्तं परं वर्णितम् ।
तद्वाचा मम साभिलाषमभवच्चित्तं कृशाङ्ग्यां सखे
तस्यास्सङ्घटनप्रयत्नकुतुकी सोऽयं द्विजः प्रस्थितः ॥

किञ्च कुण्डिनपुरवार्ताहरणाय प्रागेव प्रहितोऽस्मत्प्रणिधिमुख्यश्चन्द्रकेतुः । (विचिन्त्य) कथमद्यापि चिरयति ।

कः, भविष्यति इति शेषः । वृत्तमुपजातिः । **भो वयस्येत्यादि ।** बिसखण्डः मृणाळच्छेदः तस्य खादनं भक्षणं तत्र अभिलाषेण वाञ्छया, दिगन्तरेषु दिक्प्रदेशेषु स्थिताः नदाः प्रत्यक्स्रोतसस्तटिन्यः नद्यः प्राक्स्रोतसः ताः प्रमुखाः येषां ते तादृशेषु सलिलसन्निवेशेषु जलाधारेषु । प्रत्ययः विस्रम्भः । **हंस इति ।** सखे! केळिवनं लीलोद्यानं गतेन प्राप्तेन, मया, हंसः, दृष्टः । हिः प्रसिद्धौ । परं तु (भैमीलाभाय) नाभ्यर्थितः न याचितः । तेनैव हंसेनैव स्वयम् आत्मना, परं, नृपसुतावृत्तं भैमीचरित्रं, आदरात्, वर्णितम् । तद्वाचा तस्य हंसस्य गिरा, मम, हृदयं, कृशाङ्ग्यां भैम्यां, साभिलाषं उत्सुकम्, अभवत् । सोऽयं द्विजः पक्षी, तस्याः, सङ्घटनप्रयत्ने संयोजनानुगुणव्यापारे कुतुकी उत्सुकः सन् प्रस्थितः गतः । शार्दूलविक्रीडितम् । **किञ्चेति ।** कुण्डिनपुरं विदर्भदेशराजधानी । प्रणिधिषु किंकरेषु मुख्यः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

(दक्षिणाक्षिस्पन्दमभिनीय)

संसूचयदिवास्माकं शुभं भावि फलोदयम् ।
स्पन्दते दक्षिणञ्चक्षुः किञ्चित्स्वान्तश्च तुष्यति ॥

(प्रविश्य प्रतीहारी)

प्रतीहारी— जेदु भट्टा । कुंडिणपुरादो पडिणिवुत्तो चंदकेदू महाराअं देट्ठुकामो दुवारि चिट्ठइ ।

जयतु भर्ता । कुण्डिनपुरात्प्रतिनिवृत्तश्चन्द्रकेतुः महाराजं द्रष्टुकामो द्वारि तिष्ठति ।

राजा-- (सहर्षं) जयसेने! तमाशु प्रवेशय ।

प्रतीहारी— तह ।

तथा ।

[इति निष्क्रान्ता ।

(ततः प्रविशति चन्द्रकेतुः ।)

चन्द्रकेतुः--

औचित्यान्मयि निहितं विधानकृत्यं
सद्यः स्यात्सफलमिति स्थिराशयेन ।

प्रधानः । चिरयति विलंबते । **समिति** । दक्षिणं वामेतरत् चक्षुः (कर्तृ) शुभं मंगल्यं, अस्माकं, संबन्धिनं भाविफलोदयं भविष्यत्कार्यसिद्धिं, संसूचयदिव सम्यक् बोधयदिव, स्पन्दते स्फुरति । स्वान्तं मनश्च किंचित् तुष्यति हृष्यति । **औचित्यादिति** । औचित्यात् (हेतोः) मयि

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

आज्ञप्तं निषधमहीश्वरेण कृच्छ्रा-
न्निर्विघ्नं तदिदमनुष्ठितं स्वबुद्ध्या ॥ १७ ॥

(विचिन्त्य सविमर्शस्मितम्।)

क नु सहजमनोज्ञा कुण्डिनेशस्य कन्या
क च स जडविहङ्गः केवलं मल्लिकाक्षः ।
तदुदितवचनात्सा स्वामिनि न्यस्तचित्ता
यदभवदखिलं नः श्रेयसां सन्धिमार्गः ॥

भवतु यथानियोगं साधितमर्थं स्वामिने निवेदयामि ।

निहितं, मदधीनीकृतं, विधानकृत्यं भैमीसंघटनानुगुणप्रयत्नाचरणरूपं कार्यं, सद्यः सपदि, सफलं फलसहितं, स्यात्, इति, स्थिराशयेन निश्चितबुद्धिना, निषधमहीश्वरेण नळेन, आज्ञप्तं अहमादिष्ट इत्यर्थः । तदिदम् आज्ञप्तं, मया, (कर्त्रा) स्वबुद्ध्या (करणेन) कृच्छ्रात् श्रमेण, निर्विघ्नं निरन्तरायं यथा तथा, अनुष्ठितम् । वृत्तं प्रहर्षिणी ॥ केति । सहजमनोज्ञा स्वभावमनोहरा, कुण्डिनेशस्य विदर्भराजस्य, कन्या, दमयन्ती, क नु । जडविहङ्गः विवेकविकलपक्षिजातीयः (डलयोरभेदात् जलपक्षीत्यपि) अत एव केवलं वैदग्ध्यचातुर्यादिविधुरतया निश्चितः । 'निर्णीते केवलमिति' इत्यमरः । स च मल्लिकाक्षः तादृशः हंसश्च, क । उभयोर्महदन्तरमिति भावः । एवं सत्यपि, सा भैमी, तस्य उचितं अर्हं यद्वचनं भाषितं तस्मात्, स्वामिनि नळे राज्ञि, विषये न्यस्तं निक्षिप्तं चित्तं यस्याः सा, तादृशी अभवदिति यत्, तदखिलं, नः अस्माकं, श्रेयसां मङ्गळानां, सन्धिमार्गः समागमसरणिः । अखिलश्रेयःप्रापकमित्यर्थः । वृत्तं मालिनी ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

(इत्युपसृत्य) विजयतां देवः ।

राजा— चन्द्रकेतो ! अपि सुविहितं ते प्रयोगतन्त्रम् ।

चन्द्रकेतुः— स्वामिनो महिमातिशयेन ।

राजा— (सादराभिलाषम्) चन्द्रकेतो ! यथाविधि वर्ण्यतां तत्प्रकारः ।

चन्द्रकेतुः— इतः स्वामिनो निदेशं शिरसि धृत्वा कुण्डिनपुरीं प्रति प्रस्थितो निषधविषयवासी वैदेशिकोऽहमिति आत्मानं कार्पटिकरूपेण प्रच्छाद्य नगरं प्रविष्टवानस्मि ।

राजा— चन्द्रकेतो, निपुणमुपक्रान्तं भवता । ततस्ततः ।

चन्द्रकेतुः— ततस्तत्र तु स्वामिगुणगणग्रथितं सकलजनानन्दकरं पद्यं पठन् विदर्भराजोपकारिकाप्रतोळीपथेन सञ्चारं कृतवानस्मि ।

राजा— ततस्ततः ।

चन्द्रकेतुः— तदा त्वन्यदेशीयराजगुणवर्णनमस्मिन्नगरे न कार्यमिति तत्रत्यराजभृत्यैः कैश्चिन्निवारितोऽपि स्वामिभक्तिमतामभिमतभर्तृकथानुकथनं युक्तरूपमनिवार्यमिति

भवत्वित्यादि । वैदेशिकः देशान्तरस्थः । कार्पटिकः कन्थाधारी भिक्षुकः। उपकारिका राजसदनं तत्संबन्धिनी या प्रतोळी रथ्या तत्पथेन

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

कैश्चित्परिहृतनिरोधानुबन्धः पुनः पुनस्तदेव पद्यं पठितवानस्मि ।

विदूषकः— भो चंदकेदो पिअवअस्सगुणगणाळंकिदं पज्जं सोदुकामोम्मि ।

भोश्चन्द्रकेतो, प्रियवयस्यगुणगणालंकृतं पद्यं श्रोतुकामोऽस्मि ।

राजा-- (तूष्णीं स्थितः)

चन्द्रकेतुः—

शृङ्गारस्य निकेतनं सुकृतिनां मान्यः प्रजानां हितः
शत्रूणां शमनः समस्तजगतामानन्दनश्चन्द्रमाः ।
नारीणां नयनोत्सवो गुणनिधिर्धीमान्द्युतौ मन्मथः
स श्रीमान्निषधेश्वरो विजयते राजा नळः कीर्तिमान् ॥

राजा— (विलक्षः स्थितः ।)

विदूषकः— साहु चन्दकेदो साहु । कुसळोसि राअकज्जेसु ।

साधु चन्द्रकेतो साधु । कुशलोऽसि राजकार्येषु ।

तन्मार्गेण । युक्तरूपं अत्यन्तं युक्तम् । शृङ्गारस्येति । शृङ्गारस्य, निकेतनं वासभवनं, सुकृतिनां पुण्यवतां, मान्यः पूज्यः । प्रजानां हितः, शत्रूणां शमनः यमः । आनन्दनः सुखकरः, विजयते सर्वोत्कृष्टो वर्तते ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

राजा— ततस्ततः ।

चन्द्रकेतुः— ततश्च ।

श्रुत्वा तन्मणिसौधशृङ्गवलभीवातायनस्थात्मजा
भूपालस्य तनुप्रभाभिरभितः प्रद्योतयन्ती दिशः ।
शृङ्गाराकरदेवतेव सुमुखी किञ्चिद्विलोक्याभितः
काचित्काञ्चनवल्लरीव शनकैः सव्याजमन्तर्ययौ ॥

राजा— (विमृश्य)

चक्षुषोरुत्सवं मन्ये यस्याः सन्दर्शनं नृणाम् ।
सा दृष्टा यदि वामाक्षी जगत्येकः कृती भवान् ॥

ततस्ततः ।

चन्द्रकेतुः— ततश्च, काचित्सुमुखी राजभवनान्निर्गत्य मत्समीपमागता विविक्ते मां प्रत्येवमुक्तवती ।

राजा— कथमिव ।

चन्द्रकेतुः— भद्रमुख, भवता निषधविषयवासीति कथितं

शार्दूलविक्रीडितम् । **श्रुत्वेति** । वळभी चन्द्रशाला तस्याः वातायने गवाक्षे तिष्ठतीति वातायनस्था । शृङ्गाराकरस्य शृङ्गारखनेः देवतेव अधिष्ठानदेवतेव, काञ्चनवल्लरीव स्वर्णलतेव, सव्याजं सापदेशं, शनकैः अद्रुतं यथा तथा, अन्तः अभ्यन्तरभवनं, ययौ । शार्दूलविक्रीडितम् ।
चक्षुषोरिति । वामाक्षी सुन्दरलोचना, सा, दृष्टा यदि, भवान्,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

नळस्य राज्ञस्सहजसिद्धगुणवर्णनञ्च कृतम् । तदुभयप्रत्ययेन भवान् तत्रत्यराजपुरुषः केनचिद्व्यपदेशेन गूढः समागत इति निश्चित्य किञ्चिद्बुभुत्सुरस्मद्भर्तृदारिका भवत्सकाशं मां प्रेषितवती ।

विदूषकः— तं एदं परिवाहो खु रण्णो पुण्णपरिणामस्स ।
तदेतत्परिवाहः खलु राज्ञः पुण्यपरिणामस्य ।

राजा— (स्वगतम् ।) हृदय ! सधैर्यं भव ।

यत्त्वया काङ्क्षितं रत्नं दुर्लभं जगतां त्रये ।
विधिरेव विधानज्ञस्तदाशु घटयिष्यति ॥ २२ ॥

(प्रकाशम्) ततस्ततः ।

चन्द्रकेतुः— ततश्च मया विदिततदाशयतया निर्विशङ्कं निबोधितमदागमनप्रयोजनविधिः सा च पुनरेवमुक्तवती ।

राजा— (सकौतुकम्) ततस्ततः ।

चन्द्रकेतुः—

क्रीडावने हंसमवेक्ष्य हैमं
ग्रहीतुकामोपगता सखी मे ।
तस्योपदेशान्निषधाधिनाथे
निबद्धभावा स्मरपीडितास्ते ॥ २३ ॥ इति ॥

एकः, कृती, भाग्यवान् । क्रीडेति । हैमं सौवर्णं, उपगता

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

राजा— (विदूषकं विलोक्य) सखे सोमक, अपि श्रुतं भवता।
सत्यवचाः खलु राजहंसः ।

विदूषकः— अहइं ।
अथ किम् ।

राजा— चन्द्रकेतो, ततस्ततः ।

चन्द्रकेतुः— ततश्च तयोक्तम् ।

लीलापाङ्गतरङ्गशृङ्गकमुखोद्गीर्णं पिबन्तः स्वयं
मुह्यन्ति प्रणयामृतं प्रतिमुहुः स्निग्धा मिथः कामिनः ।
प्रत्यक्षं न च वीक्षितः स नृपतिर्न ज्ञायते तन्मनः
सख्याः सन्धिविधिश्च नात्र गुरुकस्तस्यास्तु कामज्वरः ॥

इति ।

समीपं प्राप्ता । निबद्धभावा विहितमनोरथा, आस्ते । उपजातिः । लीलेति । स्निग्धाः स्नेहसंबद्धाः, कामिन्यः कामिनश्च कामिनः, 'पुमान् स्त्रिया' इत्येकशेषः । लीलासहिताः ये अपाङ्गतरङ्गाः कटाक्षवीचयः त एव शृङ्गकाणि जलप्रणालीयन्त्राणि तेषां मुखैः उद्गीर्णं बहिर्निष्ठ्यूतं, प्रणयरूपममृतं, स्वयम् आत्मना, मिथः अन्योन्यं, प्रतिमुहुः पुनः पुनः, पिबन्तः सन्तः, मुह्यन्ति मोहं प्राप्नुवन्ति । अत्र नळे (विषये) सख्याः भैम्याः सन्धिविधिश्च संघटनकृत्यञ्च, न गुरुकः न दुस्साधः । कुत इत्यत आह— तस्या इति । यतः, तस्यास्तु तस्या अपि, कामज्वरः अस्ति, तत इत्यर्थः । कामिनोः समानुरागो झटिति संघटनापादक इति कामतन्त्रविदः । शार्दूलविक्रीडितं वृत्तम् ॥

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

राजा— अये चन्द्रकेतो, सुविहितं भवता। ततस्ततः।

चन्द्रकेतुः— ततश्च स्वामिनः प्रत्ययार्थं चित्तविनोदनार्थं मत्प्रार्थनापूर्वकं तया विलिख्य समर्पितं दमयन्त्याश्चित्रफलकमादाय स्वामिनः पादमूलमुपागतोऽस्मि।

(इति चित्रफलकमर्पयति।)

राजा— (चित्रफलकमादाय विलोक्य)

या कुण्डिनेशदुहिताऽखिलमोहनाङ्गी
या वर्णिताद्भुतगुणा च मराळयूना।
दृग्भ्यामहं प्रणयसम्मदविस्तृताभ्यां
पश्यामि चित्रफलके रुचिरे मृगाक्षीम्॥ २५॥

(इति निर्निमेषं सपरितोषं च सम्यङ्निर्वर्ण्य।)

मुखं मुग्धस्मेरं सुविमलशरच्चन्द्रसुभगं
दृशोर्युग्मं धत्ते रुचिरमसितं खञ्जनरुचिम्।

येति। या, कुण्डिनेशस्य भीमराजस्य, दुहिता पुत्री, अखिलानां मोहनानि मोहजनकानि अङ्गानि अवयवाः यस्याः सा तादृशी, या च मराळयूना तरुणहंसेन, अद्भुतगुणा आश्चर्यगुणयुता वर्णिता। तां मृगाक्षीं हरिणलोचनां, रुचिरे चित्रफलके, प्रणयसम्मदविस्तृताभ्यां दृग्भ्यां पश्यामि इति योजना। **मुखमिति**। मुग्धं सुन्दरं। स्मेरं स्मितयुक्तम्, सुभगं मनोहरं। खंजनस्य खंजरीटस्य पक्षिणः, कान्तिं रुचिं, धत्ते। अलघुः पृथुः तुङ्गः उन्नतः स्तनभरः पयोधरभारः यस्य तत्

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

हरिद्राभङ्गाभं वपुरलघुतुङ्गस्तनभरं
कृशाङ्ग्याः सौन्दर्यं त्रिजगदभिनन्द्यं विजयते ॥२६॥

विदूषकः— (विलोक्य साश्चर्यं) भो वअस्स संतत्तणवजंबूणदप्पहापडळपरिरंजिदं विअ देहकंतिसोहग्गमणोहरं इत्थिआरअणं चित्तफळए अण्णारिसं दीसइ । एआरिसं सुंदरत्तणं तत्तहोदीए अत्थि वा ण वेत्ति संकाउळं मे हिअअं ।

भो वयस्य संतप्तनवजाम्बूनदप्रभापटलपरिरञ्जितमिव देहकान्तिसौभाग्यमनोहरं स्त्रीरत्नं चित्रफलके अन्यादृशं दृश्यते । एतादृशं सौन्दर्यं तत्रभवत्या अस्ति वा न वेति शङ्काकुलं मे हृदयम् ।

राजा— सखे सोमक, सर्वथा त्वं गुणानभिज्ञोऽसि । पश्य,

यद्वर्णितं द्विजवरेण मराळयूना
सौन्दर्यमद्भुततमं तरळायताक्ष्याः ।
चित्रेषु तन्न लिखितं क्रमशस्समग्रं
मन्दोद्यमादनवधानतयेति मन्ये ॥ २७ ॥

तादृशं वपुः, हरिद्राभङ्गस्य भङ्गायाः काञ्चन्याः आभेवाभा यस्य तत् तादृशं, विजयते सर्वोत्कृष्टं वर्तते । **यदिति** । द्विजवरेण पक्षिश्रेष्ठेन, यत् वर्णितं, तत् समग्रं, अनवधानतया अवधानाभावनिबन्धनात् मन्दोद्यमात् शिथिलाभियोगात्, क्रमशः आनुपूर्व्येण, चित्रेषु न लिखितं इति मन्ये ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

विदूषकः— भो वअस्स, तत्तहोदी जदा दंसणपहं गमिस्सदि तदा सो मराळओ एव्व गुणाणहिण्णो हवि-स्सदि ।

भो वयस्य तत्रभवती यदा दर्शनपथं गमिष्यति तदा स मराळक एव गुणानभिज्ञो भविष्यति ।

राजा— सखे, अहं पुनरेवं मन्ये ।

सर्गादप्सरसां क्रमादहरहर्निष्ठासु निष्णातधीः-
विद्युच्चन्द्रसरोजचम्पकबिसज्योत्स्नादिभिः साधनैः ।
तत्तत्कालहृतैरनन्यहृदयः कान्तामिमां निर्ममे
धाता साधु तथा न चेत्कथमिदं रूपं जगद्दुर्लभम् ॥ इति ।

विदूषकः-- मम वि तह एव्व पडिभाइ ।

ममापि तथैव प्रतिभाति ।

राजा— तस्याः प्रत्यक्षदर्शनं कथं स्यात् । (इति चिन्ता-परस्तिष्ठति ।)

सर्गादिति । अप्सरसां रम्भोर्वशीप्रभृतीनां देववारवनितानां, सर्गात् सृष्टेः, क्रमात् , अहरहः, निष्ठासु समीचीनासु सृष्टिकलासु, निष्णाता निपुणा धीः यस्य सः तादृशः, धाता ब्रह्मा, अन्यस्मिन् हृदयं यस्य सः अन्यहृदयः स न भवतीति अनन्यहृदयः, तदेकासक्तचित्त इत्यर्थः । इमां कान्तां, साधु, निर्ममे । नो चेत् , जगद्दुर्लभं, इदं रूपं, कथम्? न कदापि संभवेदिति भावः ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

(नेपथ्ये वैतालिकौ)

माध्यन्दिनी सन्ध्या सुखाय भवतु देवस्य ।

तथा हि--

प्रथमः--

छायां पद्मच्छदानां मुकुलितगरुतश्चक्रवाका भजन्ते
लीयन्ते मुक्तगीता मधुकरनिकरा गूढसंवर्तिकासु ।
कच्छप्रान्ते कुरङ्गा विवलितवदनाः शेरते मुक्तशङ्कं
सिञ्चन्त्यङ्गं पयोभिः सरसि करहृतैर्दन्तिनो भानुतप्ताः ॥

अपि च,

जगति प्रसृतं पुनस्तमिस्रं
ज्वलदर्कोपलवह्निधूमलक्ष्यात् ।
विनिहन्तुमुदीक्ष्य भानुभिः स्वैः
गगनाग्रे प्रतिभाति चण्डरश्मिः ॥ ३० ॥

छायामिति । छदानां दळानां, गूढासु अप्रकाशासु संवर्तिकासु नवदळेषु, कच्छानां जलप्रायभूप्रदेशानां प्रान्ते समीपे, मुक्ता शंका यस्मिन् कर्मणि तत्, शयनक्रियाविशेषणमेतत् । दन्तिनः गजाः, भानुतप्ताः सूर्येण सन्तापिताः, अङ्गं शरीरं सिंचन्ति ॥ जगतीति । धूमलक्ष्यात् धूमव्याजात्, प्रसृतं तमिस्रं, उदीक्ष्य, स्वैः भानुभिः विनिहन्तुं, चण्ड-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

द्वितीयः—

पारावताः परममी रवितापतप्ताः
पानीययन्त्रमभितस्तृषिता वलन्ते ।
कुञ्जोदरे दरनिकुञ्चितकन्धराणि
निद्रान्ति केकिमिथुनान्यपि निर्विशङ्कम् ॥ ३१ ॥

राजा— (श्रुत्वा) कथं मध्याह्नसमयः प्राप्तः ।

विदूषकः— भो वअस्स तत्तहोदीए विअब्भराअपुत्तीए अहिणवकहाणुकहणप्पवुत्तकोदूहळस्स भवदो बुभुक्खा वि णत्थि । मम उण उदरब्भंतरं फुरइ ।

भो वयस्य, तत्रभवत्या विदर्भराजपुत्र्या अभिनवकथानुकथनप्रवृत्तकौतूहलस्य भवतो बुभुक्षापि नास्ति । मम पुनरुदराभ्यन्तरं स्फुरति ।

रश्मिः सूर्यः, गगनाग्रे, प्रतिभाति दीप्यते ॥ **पारावता इति** । अमी, पारावताः कपोताः, परं अत्यन्तं, तृषिताः सन्तः, वलन्ते संचरन्ति । केकिनां मयूराणां मिथुनान्यपि, दरं ईषत् निकुञ्चिता भुग्ना कन्धरा ग्रीवा यैस्तानि तादृशानि, कुञ्जानां लतादिपिहितोदराणां मण्डपानां, उदरे मध्ये, निर्विशंकं यथा तथा निद्रान्ति इति योजना ॥

इति श्रीवाधूलश्रीनिवाससूरिविरचितायां दीपिकाख्यायां व्याख्यायां

प्रथमोऽङ्कः समाप्तः ॥

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

राजा— तर्हि माध्यन्दिननियमादिकं परिसमाप्य पश्चात्स्वार्थसाधनाय प्रयतिष्यामहे ।

[इति निष्क्रान्ताः सर्वे ।

इति भैमीस्वयंवरे प्रथमोऽङ्कः ॥

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

॥ द्वितीयोऽङ्कः ॥

——*——

(ततः प्रविशति कञ्चुकी)

कञ्चुकी— (निश्वस्य) कथमहो जराप्रसरजर्झरितदेहबन्ध-मपि मां अद्यापि न मुञ्चति विदर्भराजशुद्धान्तपरिचरणसेवाभिनिवेशः ॥

पर्यायाज्जरया शिरो धवळितं गात्रं सिरावेष्टितं
दृष्टयोर्न श्रवसोश्च हन्त पटुता पाण्योस्तथा पादयोः ॥
शुद्धान्तेषु यथापुरं प्रचलितुं शक्तिर्न मे वर्तते
तृष्णा चेदविशृङ्खलं नवनवा शश्वत्समुज्जृम्भते ॥ १ ॥

अथात्र कविर्वृत्तवर्तिष्यमाणकथांशप्रदर्शकं मिश्रविष्कंभं नीचमध्य-मपात्राभ्यां प्रयोज्यं कथासन्दर्भावगतये अङ्कारम्भे निबध्नाति—तत इत्यादिना। शुद्धान्तेषु अन्तःपुरेषु परिचरणं समन्तादटनं, सेवा सेवनं, तयोः अभिनिवेशः अत्यासक्तिः । **पर्यायादिति** । शिरः मूर्धा, जरया, पर्यायात् क्रमात् 'पर्यायोऽवसरे क्रमे' इति नानार्थ-वर्गे अमरः। धवलितं पलितेन श्वैत्यमापादितं। सिराभिः धमनिभिः वेष्टितं समन्तादाक्रान्तम् । शुद्धान्तेषु अन्तःपुरेषु, पुरेव यथापुरं (अव्ययीभावः) प्रचलितुं मे शक्तिर्न वर्तते। तृष्णा तु आशा परं, अद्य नवनवा सती, शश्वत् विशृङ्खलं निरर्गलं यथा तथा, समुज्जृंभते

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

अद्य खल्वाज्ञापितोऽस्मि विदर्भराजेन बलवदस्वस्थां कुमारीं विचार्यागन्तव्यमिति । ततः यथाज्ञप्तं राजशासनमनुतिष्ठामि ।

(इति पारक्रम्य पुरोऽवलोक्य)

नन्वत्रैव समागच्छति दमयन्त्याः प्रियसखी माधविका ॥ तावदेनां पृच्छामि । (इत्युपसृत्य) भद्रे माधविके ! क प्रस्थितासि ।

(प्रविश्य)

माधविका-- अय्य वामण, पिअसहीए दमयंतीए संदावोवसमणिमित्तं णळिनीपत्ताइं बिसतन्तुजाळाइं आणेदुं गदा णोमाळिआ । अहं वि उसीरचंदणं संपादेदुं पत्थिदम्हि ।

आर्य वामन, प्रियसख्याः दमयन्त्याः सन्तापोपशमनिमित्तं नळिनपत्राणि बिसतन्तुजालानि च आनेतुं गता नवमालिका । अहमपि उशीरचन्दनं संपादयितुं प्रस्थितास्मि ।

कञ्चुकी-- माधविके; सन्तापः कीदृशस्तव सख्याः ।

माधविका-- अय्य वामण, णिसधविसआदो आअदस्स राअपुरुसस्स सआसादो, जदा तस्स राएसिणो

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

वुत्तन्दो अवगदो तदो आरहिअ पिअसहीए सन्दावो वड्ढइ ।

आर्य वामन, निषधविषयादागतस्य राजपुरुषस्य सकाशात् यदा तस्य राजर्षेर्वृत्तान्तोऽवगतः तत आरभ्य प्रियसख्याः सन्तापो वर्धते ।

कञ्चुकी— वत्से, किमनेनोपचारेण ।

बालेयं नवयौवना नृपसुता शृङ्गारमूर्तिः स्वयं
कालः सर्वमदावहः सुमशरस्याज्ञा जयत्यूर्जिता ।
निर्व्याजं निषधेश्वरे कृतपदो रागोऽतिभूमिं गत-
स्तन्मन्येऽद्य नळं विना मृगदृशस्तापस्य शान्तिः कुतः ॥

माधविका— अय्य वामण, पुरन्दरो वि पिअसहिं पत्थेदित्ति सुणिअदि ।

आर्य वामन, पुरन्दरोऽपि प्रियसखीं प्रार्थयते इति श्रूयते ।

कञ्चुकी— कथं एतदपि कर्णपथं गतं भवत्याः । शृणु

अभिवर्धते । **बालेति** । नृपसुता भैमी, स्वयं, शृङ्गारमूर्तिः मूर्तः शृङ्गाररस इवेत्यर्थः । सुमशरस्य मन्मथस्य, निर्व्याजं अहेतुकं यथा तथा, नले, कृतपदः निहितः, रागः प्रेमा, अतिभूमिं सीमातिलङ्घनं आधिक्यमित्यर्थः । **आर्येत्यादि** । वैजयन्ती पताका, प्रवृत्तिं प्रेमा-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

तावत् । तत्रभवान्महेन्द्रः सौन्दर्यजितनिखिलसुरसुन्दरीबृन्दतया जगद्विजयवैजयन्तीमिव मकरकेतोर्विश्वातिशायिनीं विदर्भराजतनयामेनाञ्च निषधराजे महतीमस्या मनःप्रवृत्तिञ्च नारदमुखादुपश्रुत्य गाढमस्यामविरूढप्रेमावेशपरवशः स्वसारथिमुखेन महाराजं प्रार्थितवान् ।

माधविका— (विहस्य) अय्य वामण, तं कथं होदि !

आर्य वामन, तत्कथं भवति ।

कञ्चुकी — भद्रे, कथमेवं कथयसि । महाराजः खलु तत्रभवान्पुरन्दरः । पश्य

नाकस्तस्य विहारभूः सुरतरुश्चिन्तामणिः स्वर्गवी
जाग्रत्यप्सरसस्तथा सहचराः सर्वेऽपि बर्हिर्मुखाः ।
दिक्पालाः सुहृदो मुरारिरनुजस्तत्तादृशः स्वर्पति-
र्भर्ता चेत्स्ववशे भवेत्तदखिलं त्रैलोक्यलक्ष्मीरपि ॥ ३ ॥

माधविका— साहु मंतिदं अय्येण, तह वि पिअसहीए नलमहाराए महंतो कामाहिलासोत्ति तह मंतिदं मए। अह

तिशयं । **नाक इति** । नाकः स्वर्गः । विहारभूः क्रीडास्थानं । स्वर्गवी कामधेनुः, बर्हिर्मुखाः देवाः, मुरारिः उपेन्द्ररूपो विष्णुः, स्वर्पतिः स्वर्गाधिपतिः, भर्ता चेत्, अखिलं तत् पूर्वोक्तं समग्रं त्रैलोक्यलक्ष्मीरपि, स्ववशे भवेदित्यन्वयः । **साध्वित्यादि** । पूर्वं सं-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

महेंदसारहिणो महाराएण किं संदिट्ठं ।

साधु मन्त्रितमार्येण । तथापि प्रियसख्याः नळमहाराजे महान् कामाभिलाष इति तथा मन्त्रितं मया । अथ महेन्द्रसारथये महाराजेन किं सन्दिष्टम् ।

कञ्चुकी-- रहसि देव्या कलावत्या संज्ञापितपूर्वं निषधराजे दुहितुः प्रेमातिशयं त्रिदशेश्वरसख्यञ्च मनसि सम्यग्विचिन्त्य एवं कथितम् ।

माधविका-- कहं विअ ।

कथमिव ।

कञ्चुकी-- मम वत्सा स्वयंवरमहे यस्य कण्ठे वरणस्रजं निदधाति, तस्मै देयेति मया सङ्कल्पितं । तदस्मिन्समये महाराजपुरन्दरेणापि समागन्तव्यमिति । अत एव दुहितुः स्वयंवरमहाय राज्ञामाहूतये सलेखाः प्रणिधयः प्रहिताः ।

माधविका-- सुठ्ठु विहिदं मआराएण ।

सुष्ठु विहितं महाराजेन ।

कञ्चुकी-- भवतु यथानियोगमनुतिष्ठावः ।

(इति निष्क्रान्तौ ।)

ज्ञापितं संज्ञापितपूर्वं प्रथमबोधितं, स्वयंवरमहे स्वयंवरोत्सवे, वरणस्रक् वरणमालिका तां, आहूतये आह्वानाय, लेखेन पत्रिकया सहिताः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

॥ मिश्रविष्कम्भः ॥

(ततः प्रविशति राजा नलो विदूषकश्चन्द्रकेतुश्च)

राजा— (विचिन्त्य सस्पृहम्)

हंसस्योक्त्या हृदि कृतपदा चन्द्रकेतोः प्रयोगै-
र्वाञ्छावल्ली तदनु शनकैः प्रायशो रूढमूला ।
चित्रे दृष्ट्वा शफरनयनां सर्वतस्संप्रवृद्धा
सामोदा मे फलमपि कदा दर्शयिष्यत्युदारम् ॥४॥

विदूषकः— तत्तहोदीए दमअंदीए सयंवरणिमित्तं आअंतव्वंति विअब्भराएण पेसिदो खु भवदो हरिद्दावण्णसणाहो मङ्गळलेहो । ता तत्तभवं कुण्डिणणअरं जदा गमिस्सदि तदा ताए दंसणफलं भविस्सदि ।

तत्रभवत्या दमयन्त्याः स्वयंवरनिमित्तं आगन्तव्यमिति विदर्भराजेन प्रेषितः खलु भवतो हरिद्रावर्णसनाथो मङ्गळलेखः । तत् तत्रभवान् कुण्डिननगरं यदा गमिष्यति, तदा तस्या दर्शनफलं भविष्यति ।

सलेखाः । प्रणिधयः चराः । हंसस्येति । कृतपदा कृतं पदं स्थानं यस्याः सा तादृशी । शनकैः अद्भुतं (अव्ययमेतत्) शफरनयनां शफरौ मीनाविव नयने यस्याः सा तां, सामोदा सौरभ्यसहिता, उदारं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

राजा— (पुनर्विचिन्त्य सविमर्शं)

कदाहं पश्येयं कनकरुचिराङ्गीमपि कदा
पिबेयं तद्वाणीं श्रवणचषकाभ्यां मधुमयीम् ।
कटाक्षाः कञ्जाक्ष्याः सपदि विहरेयुर्मयि कदा
प्रसन्ने प्रद्युम्ने ननु भवति लभ्यं तदखिलम् ॥५॥

अतः कुसुमायुधमेवाहमभ्यर्थये ।

भो भो मकरकेतो ।

एकोऽनङ्गस्त्वमसि कुसुमान्याशुगाः कार्मुकं वा
मौर्वी वल्ली मधुकरमयी ते पिकाद्याः सहायाः ।
निर्वीर्याणि त्वदुपकरणान्याहुरेतन्मृषा नः
कर्माण्येषामहह जगतां सर्वथा दुःसहानि ॥ ६ ॥

उज्ज्वलं, फलमपि, कदा दर्शयिष्यति इति योजना । **कदेति ।** श्रवणे एव चषके ताभ्यां, मधुमयीं मधुप्रचुरां अत्यन्तं स्वाद्यामित्यर्थः । तद्वाणीं तस्याः वचनभङ्गीं, कदा पिबेयं । कञ्जे तामरसे (कमिति मान्तमव्ययं) ते इव अक्षिणी नेत्रे यस्याः सा, तस्याः कटाक्षाः अपाङ्गवीक्षणानि, मयि, कदा, सद्यः विहरेयुः । प्रद्युम्ने मन्मथे, नन्वनुनये । **अत इत्यादि ।** अभ्यर्थये याचे । मकरः मत्स्यविशेषः केतुः ध्वजः यस्य सः । तस्य संबुद्धिः । **एक इति ।** त्वं एकः असहायः, अनङ्गः अङ्गरहितश्च, असि । आशुगाः बाणाः, मौर्वीवल्ली ज्यालता, मधुकरमयी भ्रमरस्वरूपा, पिकः कोकिलः आद्यः प्रथमः येषां ते, तव उपकरणानि, निर्वीर्याणि,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

किं च

सुमशर तव कान्तां कान्तिसंपद्विकासैः
ननु विजितवती सा लोककान्ता प्रिया मे।
तदिह मनसि कृत्वा कोपनस्त्वं शिताग्रैः
प्रहरसि यदि भूयः सायकैः किं करोमि ॥ ७ ॥

अथवा मम शरणमस्त्येव विदर्भराजतनया।

यतः

त्वद्बाणजव्रणविरोपणमौषधं मे
तत्पीनतुङ्गकुचकुङ्कुमपङ्कलेपः।
संजीवनं तदधरामृतपानमन्त-
स्तापप्रकोपशमनञ्च रसायनं वा ॥ ८ ॥

विदूषकः— भो वअस्स णं भणामि खु कुंडिणणअरंमि तुह मणोरहो सफलो हविस्सदित्ति।

दुर्बलानि, आहुः जनाः इति शेषः। मृषा मिथ्या, अहहेति खेदे। **सुमेति**। ननु अवधारणे। विजितवती ननु विजितवत्येवेत्यर्थः। इह अस्मिन् समये, तत् मत्प्रियाकर्तृकजयं, मनासि कृत्वा हृदये निधाय, किं करोमि प्रतिक्रियां कर्तुं असमर्थोऽस्मि इत्यर्थः। **त्वदिति**। व्रणस्य अरुषः विरोपणं निवर्तकं, संजीवनं प्राणधारणसाधनं, ताप-प्रकोपः तापाधिक्यं तस्य शमनं मान्द्यापादकं, रसायनं सिद्धौषधवि-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

भो वयस्य ननु भणामि खलु कुण्डिननगरे तव मनोरथः सफलो भविष्यतीति ।

राजा— सखे सोमक, कुण्डिनपुरप्रस्थानस्यापि भवतो दुर्नयेन महानन्तरायो जातः । यतः तव विप्रलम्भप्रलपितेन मदनोद्यानवृत्तान्तं कमलिनीमुखात् श्रुत्वा देवी कोपात्पराङ्मुखी बभूव ।

विदूषकः-- (सविमर्शम्) भो वअस्स, बुभुक्खापरवसदाए मुद्धेण मआ किदो एक्को अवराहो होदु । तस्स पडिविहाणं किं किदं भवदा ।

भो वयस्य, बुभुक्षापरवशतया मुग्धेन मया कृत एकोऽपराधः भवतु । तस्य प्रतिविधानं किं कृतं भवता ।

राजा-- तदन्यथा समर्थितं मया ।

विदूषकः-- कहं विअ ।

कथमिव ।

शेषः । सखे इत्यादि । अन्तरायः विघ्नः । विप्रलंभः विसंवादः विपरीतोक्तिरिति यावत् । तद्रूपेण प्रलपितेन अनर्थकवचनेन । बुभुक्षा क्षुत् तस्याः परवशतया अधीनतया, मुग्धेन मूढेन । प्रतिविधानं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

राजा— केचित्पक्षिणः शिक्षितं पठन्ति, तदेतत्पञ्जरगत-शुकशारिकालापेषु भवत्या दृष्टमेव । कदाचिन्मदनोद्यानं गतेन मया तरुसरोवरविहारिणो यत्र कुत्र चिदनुशिक्षितामुप-देशगिरं स्वैरमाम्रेडितवतः कस्य चित्कनकहंसस्य तथाविध-गाथाश्रवणकौतुकेन मुहूर्तं विळंबितम् । तदसहतया क्षुधा-र्तेन सोमकेन मत्यसूयया किञ्चित्प्रलपितम् । तदेतच्चेटी-मुखेन भवत्या श्रुतम् अन्यथागृहीतञ्चेति ।

विदूषकः— तदो तदो ।

राजा— किमन्यत् । केवलं तूष्णीं स्थिता देवी ।

विदूषकः— (विहस्य) भो वअस्स, साहु समत्थिदं भवदा ।

भो वयस्य, साधु समर्थितं भवता ।

राजा— ततश्च विदर्भराजस्य पत्रिकां व्याजीकृत्य कुण्डिन-पुरं प्रति प्रस्थातव्येऽपि मयि देव्या शङ्कमानया महान्नि-रोधो विहितः ।

विदूषकः— तं कहं ।

प्रतीकारः । शिक्षितं अन्येन पाठितं । शारिकाः व्यक्तवाचः पक्षिवि-शेषाः यान् द्रविडभाषया (मैना) इति जनाः व्यवहरन्ति । आम्रे-डितवतः पुनः पुनः कथयतः । तस्य विलंबितस्य असहतया असह-नेन (हेतुना) असूया गुणेष्वपि दोषारोपः । तूष्णीं अवचनं यथा

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

तत्कथम् ।

राजा—

देव्या साधु निबोधितो नयगिरा नर्मोक्तिभिर्निन्दितो
भ्रूवल्ल्याप्यनुतर्जितश्चपलया दृष्ट्या च सन्ताडितः ।
स्थित्वा द्वारि निवारितः सशपथं तन्वीं तथापि स्मर-
न्सद्यो भीमपुरीं पुनर्जिगमिषुः स्थातुं न शक्नोम्यहम् ॥

तत्त्वरितमितः कुण्डिनपुरीं प्रति प्रस्थातुकामोऽस्मि । चन्द्र-केतुना सह भवताप्यागन्तव्यम् ।

विदूषकः— तह ।

तथा । (इति निष्क्रान्तः ।)

राजा— कः कोऽत्र भोः ।

(प्रविश्य प्रतीहारी ।)

प्रतीहारी— आणवेदु भट्टा ।

आज्ञापयतु भर्ता ।

राजा— जयसेने ; मद्वचनादुच्यतां सारथिश्चित्रकेतुः

तथा । निरोधः विघ्नः । **देव्येति** । नयगिरा नीतियुक्तवचनेन, साधु सम्यक्, निबोधितः कर्तव्यविषये विवेकमापादितः । नर्मोक्तिभिः परिहासवचनैः, अनुतर्जितः भर्त्सितः । सशपथं निवारितः निरुद्धः । **तदित्यादि** । प्रस्थातुं कामः यस्य सः प्रस्थातुकामः । प्रतीहारी

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

कुण्डिनपुरीं प्रति प्रस्थानाय द्वारि स्थाप्यतां सज्जो रथ इति ।

प्रतीहारी— तह ।

तथा । (इति निष्क्रान्ता)

(ततः प्रविश्य)

सूतः— विजयतां देवः । सज्जो रथः । आरोहतु भवान् ।

राजा— (नाट्येन रथमारुह्य) चित्रकेतो, सत्वरं प्रचोदयाश्वान् ।

सूतः— (तथा कृत्वा रथवेगं निरूपयन् ।) महाराज, पश्य, पश्य ।

वीर श्रीमंस्तव रथजवात्कान्दिशीका इवैते
सन्दृश्यन्ते वननदनदीभूधरास्सन्निवेशात् ।
सान्द्रोदञ्चन्निजखुररजःस्पर्शतश्चन्द्रवर्णा
रथ्या यान्ति त्वरितगतयः सङ्कुचन्तः किलामी ॥

द्वाररक्षी । सज्जः सन्नद्धः । प्रचोदय प्रेरय । **वीरेति** । वीर, श्रीमन्, एते, वननदनदीभूधराः सन्निवेशात् स्वावस्थानदेशात् (ल्यब्लोपे पञ्चमी) स्वावस्थानदेशं परित्यज्येत्यर्थः । कान्दिशीका इव भयद्रुता इव, संदृश्यन्ते । अमी रथ्याः रथाश्वाः, सान्द्रं निबिडं यथा तथा उदञ्चत् ऊर्ध्वं प्रसरत् यत् निजखुराणां (संबन्धि) रजः भूधूळिः तस्य स्पर्शतः किल संपर्कादिव (हेतौ पञ्चमी) संकुचन्तः गात्रसंकोचं कुर्वाणाः मलिनरजःस्पर्शेन चन्द्रवर्णनिजवपुषो मालिन्यं भवेदिति शङ्कयेव गात्रसङ्कोच-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

किञ्च,

धावत्स्यन्दनतुङ्गकेतनशिखानिर्भिन्नपाथोधर-
  प्राग्भारप्रसृतैः पयोभिरभितः पश्चात्परं पङ्किला ।
वेगोदग्रचलत्तुरङ्गमखुराघातोद्यदुर्वीरजः-
  पातैर्निर्गतकर्दमा च पदवी सेयं पुनर्जायते ॥ ११ ॥

राजा— चित्रकेतो, साधु दर्शितं भवता ।

चित्रकेतुः— महाराज, कुण्डिनपुरोपकण्ठं प्रविष्टो रथः ।

राजा— (पुरोऽवलोक्य, सहर्षं) इयमेव सा कुण्डिनपुरी ।

आश्चर्यस्थितिभूरशेषजगतां लक्ष्मीविहारस्थली
  जाग्रत्केतुपटैर्मरुत्तरलितैराकारयन्तीव माम् ।
लिम्पन्ती कुरुविन्दमन्दिररुचां वीचीभिरभ्राङ्गणं
  सैषा भीमपुरी सुधाभिरिव मे दृष्टयोर्विधत्ते मुदम् ॥

भाज इत्यर्थः । त्वरितगतिकालिकशरीरसङ्कोचे नैसर्गिकेन रजःस्पर्शो हेतुरिति अहेतौ हेतुत्वकल्पना । **धावदिति ।** केतनं पताका, पाथोधराः मेघाः, पङ्किला संजातपङ्का, उर्वीरजः भूधूलिः । **आश्चर्येति ।** आश्चर्यस्य स्थितिभूः निवासदेशः । विहारस्थली क्रीडाभूमिः । आकारयन्तीव आह्वानं कुर्वतीव । कुरुविन्दमन्दिररुचां कुरुविन्दरत्नखचित-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

अपि च।

सिक्ता चन्दनवारिभिः सुरभिळैर्माल्यैस्तथालंकृता
धूपैश्चागरुकल्पितैः प्रतिपदं रथ्याः समामोदिताः।
बद्धास्तोरणवल्लरीभिरभितः सौधाश्च तुङ्गध्वजा-
स्तन्मन्ये नगरी ममेयमधुना संसूचयत्युत्सवम्॥ १३॥

(पुनर्विलोक्य) अहो प्रमोदातिशयः पौराणाम्।

तथा हि--

व्याधूतैः पटवासपांसुपटलैः कीर्णैश्च माल्योत्करैः
क्रीडाशृङ्गमुखोद्गतैः सुरभिळैः पाटीरपङ्कद्रवैः।
भूषारत्नमरीचिलिप्तवपुषामामोदसीमाजुषां
वर्धन्ते विशिखासु मुग्धमधुरा यूनां विहारक्रमाः॥

किं च, (सहर्षम्)

चन्द्राननाश्चरन्त्यो हरिमणिनीलासु चन्द्रशालासु।
पौरान्विलोकयन्त्यस्तटित इवाभान्ति कनकरुचिराभाः॥

गृहप्रभाणां, वीचिभिः तरङ्गैः। सुधाभिरिव अमृतैरिव। **सिक्ता इति।** अगरुभिः कालागरुभिः कल्पितैः उत्पादितैः। प्रतिपदं पदे पदे (वीप्सायामप्ययीभावः) रथ्याः राजमार्गाः अमेयं महान्तं। **व्याधूतैरिति।** पटवासपांसूनां गन्धचूर्णानां पटलैः समूहैः, उत्करैः निवहैः। शृङ्गाणां जलप्रणाळीयन्त्राणां मुखेभ्यः उद्गतैः ऊर्ध्वं प्रसृतैः, पाटीरपङ्कद्रवैः चन्दनकर्दमरसैः। विशिखासु रथ्यासु। मुग्धाः सुन्दराः मनोज्ञाश्च। **चन्द्रेति।** हरिमणयः इन्द्रनीलरत्नानि।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

तदत्रैवानुयात्रिकपरिजनान् ससारथिं रथञ्च संस्थाप्य याव-द्विदूषकचन्द्रकेत्वागमनं तावत्कुण्डिनपुरीं प्रविश्य नगर-लक्ष्मीविलासवैस्वरीविलोकनानन्दमनुभवामि ।

(इति परिक्रामति ।)

(ततः प्रविशति विदूषकश्चन्द्रकेतुश्च ।)

विदूषकः— (अध्वश्रमं नाटयन् ।)

भो चंदकेदो पिअवअस्सेण रण्णा चित्तफळअं मम हत्थे णिक्खित्तं वट्टइ । ता तुरिअं आअंतव्वंति तत्तहोदा रण्णा आणत्तम्हि । सो उण भीमराअकण्णअं दमअंतिं अणुचिं-तयन्तो भूदाविट्टो विअ रज्जकज्जंवि उज्झिअ जवणरहाहि-रूढो पुढमं एव्व कुंडिणणअरं पविट्ठो । अदिक्कंदपाणभोअ-णवेळं अणावेक्खिदचंडादवं तुरिअं गच्छंतस्स मम महन्तो परिस्समो होदि । ता रण्णा मम किदे अण्णाअं आअरिदं, अहवा कुण्डिणणअरं गदुअ पडिणिवुत्तेण भवदा एव्वं ठाविदं ।

भोः चन्द्रकेतो ! प्रियवयस्येन राज्ञा चित्रफलकं मम हस्ते निक्षिप्तं वर्तते । तत्त्वरितमागन्तव्यमिति तत्रभवता राज्ञा आज्ञप्तोऽस्मि । स पुनर्भीमराज-कन्यकां दमयन्तीमनुचिन्तयन् भूताविष्ट इव राजकार्यमपि उज्झित्वा जवनरथारूढः प्रथममेव

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

कुण्डिननगरं प्रविष्टः । अतिक्रान्तपानभोजनवेळं अनावेक्षितचण्डातपं त्वरितं गच्छतो मम महान्परिश्रमो भवति । तद्राज्ञा मम कृते अन्यायमाचरितम् । अथवा कुण्डिननगरं गत्वा प्रतिनिवृत्तेन भवता एवं स्थापितम् ।

चन्द्रकेतुः— आर्य सोमक, मदनोद्यानविहारिणं मराळं पृच्छ ।

विदूषकः— सच्चं तुए भणिदं, तेण एव्व दुट्ठपक्खिणा एव्वं कारिदं । होदु गच्छह्म ।

सत्यं त्वया भणितं । तेनैव दुष्टपक्षिणा एवं कारितं ।

भवतु, गच्छावः ।

[उभौ परिक्रामतः]

चन्द्रकेतुः— (स्पर्शसुखमभिनीय) आर्य सोमक, सधैर्यो भव ।

यदिदानीमावां कुण्डिननगराभ्यर्णमागतौ स्वः ।

पश्य,

मन्दानिलोऽद्य पुरतः पुरसुन्दरीणां
धम्मिल्लमाल्यविगळन्मकरन्दबन्धुः ।

चन्द्रशालासु वलभीषु । मन्देति । धम्मिल्लाः संयताः कचाः । सौरभझरी वासनाप्रवाहः तस्याः परीवाहं आधिक्यमिति यावत् । तं ताच्छील्येन

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

तद्देहसौरभझरीपरिवाहवाही
मार्गक्लमार्तिमपनेतुमिवाभ्युपैति ॥

तदिह कोमळविरळवातप्रसरे चतुष्पथमण्टपोदरे क्षणमात्मानं विनोद्य पश्चात्स्वामिनं द्रक्ष्यावः ।

(इति तथा कृत्वा उभावपि नगरप्रवेशं नाटयित्वा पुरोऽवलोक्य)

चन्द्रकेतुः— अये राजरथ्योपान्तमागिमण्टपवेदिकायां चिन्तापरवश इव महाराजस्तिष्ठति । तदुपसर्पावः ।

(इत्युभौ परिक्रामतः)

राजा— (सौत्सुक्यं)

प्रणयमधुरमुग्धाः पञ्चबाणोपदिष्टाः
विरचितपणबन्धा मद्वशीकारकृत्ये ।
विविधनवविलासान् शश्वदुद्भेदयन्तः
पुनरपि मयि तस्याः संभवेयुः कटाक्षाः ॥

(उभौ उपसृत्य)

वहतीति सौ...ही। क्रमेन ग्लान्या जातां आर्तिं पीडां । **तदित्यादि** । चतुष्पथे शृङ्गाटके स्थितस्य मण्टपस्य उदरे मध्ये । **प्रणयेति** । मम वशीकारकृत्ये स्वाधीनीकरणे । विरचितः पणबन्धः यैस्ते तादृशाः । पणबन्धो नाम सजीवनिर्जीवासु द्यूतकलासु प्रक्रान्तकार्यनिर्वहणप्रयोजकाभियोगसन्धुक्षणार्थं स्थापितं बहुमूल्यं सुवर्णादि । यं द्रविडभाषायां (पंद्रयं) इति व्यवहरन्ति जनाः । उद्भेदयन्तः जनयन्तः ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

विदूषकः— वड्ढदु भवं ।

बर्धतां भवान् ।

चन्द्रकेतुः— विजयतां देवः ।

राजा— (विलोक्य) चन्द्रकेतो, तत्रभवत्याः कुण्डिनेशदुहितुः प्रवृत्तिं तत्सखीमुखेन सम्यगवगम्य भवता त्वरितं समागन्तव्यम् ।

चन्द्रकेतुः— यदाज्ञापयति महाराजः ।

(इति निष्क्रान्तः)

राजा— सखे सामक, अपि सन्निहितं चित्रफलकम् ।

विदूषकः— भो वअस्स तत्तहोदीए पच्चक्खदंसणणिमित्तं पुडमं एव्व आअदस्स भवदो किं चित्तफळएण ।

भो वयस्य तत्रभवत्याः प्रत्यक्षदर्शननिमित्तं प्रथममेवागतस्य भवतः किं चित्रफलकेन ।

राजा— सखे, अपि किं तद्विस्मृतं भवता ।

विदूषकः— जइ अत्ताणं विसुमरिस्सं । होदु, किं दिट्ठा तत्तहोदी भवदा ।

यद्यात्मानं विस्मरिष्यामि । भवतु, किं दृष्टा तत्रभवती भवता ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

राजा— तदेव वक्तुकामोऽस्मि ।

विदूषकः— अवहिदम्हि ।

अवहितोऽस्मि ।

राजा— शृणु तावत् । अहमस्मन्नगरात्प्रस्थितः सत्वरमेतत्पुरोपशल्यमाविश्य तत्र च सपरिवाररथपरिजनान्निवेश्य पुरशोभाविभवविलोकनव्यपदेशेन तामेव पङ्कजाक्षीं दिदृक्षुर्नृपसदनराजरथ्यापथमाविक्षम् ।

विदूषकः— तदो तदो ।

ततस्ततः ।

राजा— तत्र तु ।

रथ्यापथेषु परितः शुकशारिकाणा-
मालापकौतुकमिलत्तरुणीजनेषु ।
सौधेषु रत्नवळभीषु च दत्तचक्षु-
र्व्याजाद्विळम्ब्य सुमुखीं व्यचरं दिदृक्षुः ॥

तत्रान्तरे,

बाला विदर्भनृपकेतनचन्द्रशाला-
वातायने विमलचन्द्रकलेव कापि ।

अहमिति । उपशल्यं समीपदेशं । व्यपदेशेन व्याजेन । आविक्षं प्रविष्टवान् । **रथ्येति** । रथ्यानां पन्थानः रथ्यापथाः (समासान्तः अप्रत्ययः) रत्नवलभीषु मणिमयचन्द्रशालासु । **बालेति** । विदर्भनृपस्य

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

दृष्टा मया विमलभूषणभूषिताङ्गी
किञ्चिद्विनम्य कुतुकेन विलोकमाना ॥

विदूषकः— तदो तदो ।

ततस्ततः ।

राजा—

यदुक्तं हंसेन प्रकृतिललितं चिह्नमभव-
द्यदद्राक्षं यस्याः प्रणयमधुरं चित्रफलके ।
मया दृष्टा तादृग्गुणगरिमसौन्दर्यसुषुमा
लसद्वैशिष्ट्याढ्या ननु नृपतिसौधे वरवधूः ॥

विदूषकः— तदो तदो ।

ततस्ततः ।

यत् केतनं प्रासादः तस्य या चन्द्रशाला तस्याः वातायने गवाक्षे, विमला निर्मला चन्द्रकलेव, (भासमाना) विरलभूषणैः परिमिताभरणैः भूषिताङ्गी अलंकृतावयवा । कुतुकेन कुतूहलेन, किंचिद्विनम्य, विलोकमाना पश्यन्ती, कापि बाला, मया, दृष्टा । इति योजना । **यदिति** । ननुरत्रामन्त्रणे । प्रकृत्या स्वभावेन ललितं मनोज्ञं यत् चिह्नं लक्षणं, हंसेन, उक्तमभवत् । चित्रफलके आलेख्ये, प्रणयेन प्रेम्णा मधुरं रुचिरं, यस्याः यत् चिह्नं अद्राक्षं । तादृग्गुणगरिम्णा तादृशगुणगौरवेण सौन्दर्येण सुषुमया उत्कृष्टशोभया च लसत् भास्वरं यत् वैशिष्ट्यं उत्कर्षः तेन आढ्यां समृद्धा, वरवधूः उत्तमस्त्री, नृपति-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

राजा— ततः स्वयमङ्गुलिनिर्देशपूर्वकं किमपि सख्या संज्ञापिता सा कमलाक्षी मामेव गाढमालोकितवती ।

विदूषकः— (सविमर्शं) चंदकेदुकहिदेहिं राअळक्खणेहिं तत्थभवं सो एसो त्ति ताए पिअसहीए अवगदंति तक्केमि । तदो तदो ।

चन्द्रकेतुकथितैः राजलक्षणैः तत्रभवान् स एष इति तया प्रियसख्या अवगत इति तर्कयामि ।

राजा— सखे, ततः किमन्यत् । सर्वथा तस्याः कटाक्षगोचरतामुपगतोऽस्मि । शृणु तावत् ।

व्याजेन स्तिमिताः क्षणं विकसिताः किञ्चिच्चलद्भ्रूलताः
प्रान्ते कुड्मलिताः पुनर्विवलिता मन्दाक्षमन्दीकृताः ।
हर्षोन्मेषसमुन्मिषन्मनसिजव्यापारकूलङ्कषा-
स्तस्या मां परिवव्रुरद्भुततमाः स्निग्धाः कटाक्षाङ्कुराः ॥

(सपुलकोद्भेदं) हन्त तस्याः स्मरणमपि मनसि मे कमपि विकारमापादयति ।

सौधे राजसदने, मया दृष्टा । **व्याजेनेति** । स्तिमिताः निश्चलाः मन्दाक्षेण त्रपया, मनसिजस्य मदनस्य व्यापारेण कूलंकषाः परिपूर्णाः, तस्याः कटाक्षाङ्कुराः, मां परिवव्रुः समन्तादावेष्टयन् । वृणोतेर्लिटि रूपम् । **हन्तेति** । अनिर्देश्यः निर्देष्टुं अशक्यः । वर्णनपथातिवर्ती-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

विदूषकः— भो वअस्स कहिदं खु मए कुंडिणणअरंमि तुह मणोरहो सफळो हविस्सदित्ति । ता धण्णोसि तुमं जेण तुए पच्चक्खदो दिट्ठा तत्तहोदी । ताए सुंदरत्तणं कीरिसं तं सोदुकामोम्हि ।

भो वयस्य, कथितं खलु मया कुण्डिननगरे तव मनोरथः सफलो भविष्यतीति । तद्धन्योऽसि त्वं येन त्वया प्रत्यक्षतो दृष्टा तत्रभवती । तस्याः सौन्दर्यं कीदृशं तच्छ्रोतुकामोऽस्मि ।

राजा— अनिर्देश्यः खलु तस्याः सौन्दर्यातिशयः । शृणु तावत् ।

लिम्पन्तीव प्रसरति पुरीं हेमसारैर्वपुःश्री-
  र्वक्त्रज्योत्स्ना जनयति पयश्चन्द्रकान्तस्थलीषु ।
व्याकीर्यन्ते नवकुवलयान्यक्षिकान्त्या समन्ता-
  त्तस्माद्बाला सकलभुवनश्लाघनीया विभाति ॥

(पुनर्विचिन्त्य) सखे, अन्यादृशी सा व्यक्तिः । तथा हि ।

सा किं कल्पितसत्वयोगरुचिरा काश्मीरपाञ्चालिका
  प्राप्ता किन्नु तटिल्लतावनितलं प्रोत्कीर्णरूपोज्ज्वला ।

त्यर्थः । लिंपन्तीति । वपुः श्रीः देहशोभा, (कर्त्री) हेमसारैः स्वर्णरसैः पुरीं, लिंपन्तीव प्रसरति । व्याकीर्यन्ते समन्ताद्विशीर्यन्ते । सेति ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

माया किं मकरध्वजेन रचिता त्रैलोक्यसम्मोहिनी
मान्या नूनमनुग्रहादुपगता मद्भाग्यलक्ष्मीरियम् ॥

विदूषकः— भो वअस्स, तह जइ तत्थहोदिं दट्ठुकामो-म्हि । अहवा मह हत्थे चित्तफळअं अत्थि ।

भो वयस्य, तथा यदि तत्रभवतीं द्रष्टुकामोऽस्मि । अथवा मम हस्ते चित्रफलकमस्ति ।

राजा-- सखे सोमक, कथमनेन तस्याः समग्रगुणसंपत्प्रतीतिः स्यात् । यतः ।

यद्वर्णिता विलिखिता खगचित्रकृद्भ्यां
तद्बुद्धिकौशलवशादिति शंकमानः ।
पश्यन्निमां जडधियाववधारये तौ
तस्याः समग्रगुणसङ्ग्रहदुर्विधत्वात् ॥ २४ ॥

किं बहुना,

श्लाघ्या विलासाः सरसीरुहाक्ष्याः
चेतोभुवः प्रत्युपदेशयोग्याः ।

सत्वयोगः चैतन्यसंबन्धः, काश्मीरेण कुंकुमेन कृता पाञ्चालिका किं पुत्रिका किं । प्रोत्कीर्णेन अधिकतया प्रसृतेन रूपेण सौन्दर्येण उज्ज्वला भास्वरा, माया विचित्रार्थसर्गकरी शक्तिः । **सखे इति** । प्रतीतिः ज्ञानं । **यदिति** । खगः हंसः चित्रकृत् आलेख्यकारः ताभ्यां, शंकमानः सन्दिहानः, जडधियौ मन्दप्रज्ञौ, अवधारये निश्चिनोमि । संग्रहणे दुर्विधत्वात् दारिद्र्यात्, अभावादित्यर्थः । **श्लाघ्या इति** । चेतोभुवः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

सा तस्य नूनं जगतां त्रयाणां
संप्रीणनं मोहनमस्त्रमेकम् ॥ २५ ॥

विदूषकः— (स्वगतम्) दुज्जादेण चंदकेदुणा पिअवअस्सं-म्हि मअणावेसो एव्वं ठाणं कारिदो। जस्स रण्णो इत्थिआ-कहाणुकहणप्पसंगेहिं मम वि बंह्मणिं सुमरिअ हिअअंमि-कोवि विआरो होदि ।

दुर्जातेन चन्द्रकेतुना प्रियवयस्ये मदनावेश एवं स्थानं कारितः। यस्य राज्ञः स्त्रीकथानुकथनप्रसङ्गै-र्ममापि ब्राह्मणीं स्मृत्वा हृदये कोऽपि विकारो भवति ।

(प्रकाशम्) भो वअस्स, चंदकेदुसंविहाणपुण्णेण दुवेणं वि अण्णोण्णाणुराएण झत्ति तत्तहोदी तव मणोरहं पूरइस्सदि ।

भो वयस्य, चन्द्रकेतुसंविधानपूर्णेन द्वयोरप्यन्यो-न्यानुरागेण झटिति तत्रभवती तव मनोरथं पूरयिष्यति ।

राजा— शिरसा गृहीतं ब्राह्मणाशीर्वचनम् ।

[ततः प्रविशति चन्द्रकेतुः]

मन्मथस्य । **दुर्जातेनेति** । दुर्जातेन दुष्टं जातं जन्म यस्य सः तेन,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

चन्द्रकेतुः-- (विचिन्त्य) विधिनैव साधु समर्थितः स्वामिनो नियोगः । यथा

देवस्यागमनं निशम्य सुदती प्रागेव दूतीमुखा-
त्सौधस्थापि मदुक्तलक्षणयुतं स्वेनैव निश्चित्य तम् ।
व्यक्तीकृत्य निगूढमान्तरमपि स्वीयैरपाङ्गाङ्कुरै-
र्मुग्धाङ्गी प्रणयं समर्पितवती कान्तस्य कान्तैः क्रमैः ॥

भवतु, यथावगतमुदन्तं स्वामिने निवेदयामि । (इत्युपसृत्य) विजयतां देवः ।

राजा-- (विलोक्य सहर्षं) चन्द्रकेतो, यथाश्रुतं वर्ण्यतां प्रियाप्रवृत्तिः ।

चन्द्रकेतुः— महाराज, किं विशेषतः कथनेन । एवं कथितवती तत्रभवत्याः प्रियसखी माधविका ।

राजा-- तत्कथम् ।

चन्द्रकेतुः— महाराजे गाढनिगूढप्रेमावेशपरवशतया महतीं मदनावस्थामनुभवति मत्तकाशिनी ।

कुत्सितजन्मनेत्यर्थः । निन्दावचनमेतत् । **देवस्येति** । निशम्य श्रुत्वा, मया उक्तेन लक्षणेन चिह्नेन युतं सहितं, मदुक्तलक्षणयुतं, नलमहाराजं, निगूढं गुप्तं, आन्तरमपि मनोभावमपि, व्यक्तीकृत्य प्रकटीकृत्य, मुग्धाङ्गी सुन्दराङ्गी, कान्तैः मनोज्ञैः, क्रमैः भङ्गीभिः । **भवत्विति** । उदन्तं वृत्तान्तं । मत्तकाशिनी मदनमदेन यौवनमदेन वा प्रकाशमाना,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

यथा,

वैषम्यं विषये दधाति सततं संप्रार्थिताप्याळिभी
रम्यं कूजति कोकिलेऽपि विमनाः कर्णौ पिधत्ते रुजा ।
दृष्ट्वापि प्रियमग्रतः स्मरधिया संकल्पशिल्पोदितं
भीता नम्रमुखी निमील्य नयने चिन्ताकुला वर्तते ॥

किञ्च,

तादृङ्मन्मथबाणगोचरतया सद्यस्समुद्विग्नया
न्यस्य न्यस्य सखीषु बाष्पकलुषां दृष्टिं सनिश्वासया ।
शश्वत्प्रान्तविवर्तितैरवयवैरुन्निद्रचन्द्रातपा
हा हा हन्त कथञ्चिदम्बुजदृशा दीर्घा निशा नीयते ॥

अपि च, (इदमप्याश्चर्यम् ।)

स्वालापे पिकशङ्कया शशिमुखी शश्वद्बिभेति स्वयं
स्फूर्जन्नैजविलोचनाञ्चलरुचौ भृङ्गभ्रमात्कम्पते ।

वैषम्यमिति । विषये स्रक्चन्दनधारणाभ्यवहारादौ, आलीभिः सखीभिः । संकल्पः मानसं कर्म तस्य शिल्पेन चतुरतरव्यापारेण उदितं उत्पन्नं । **तादृगिति** । समुद्विग्नया सम्यगुद्वेगं प्राप्तया पीडितयेति यावत् । उन्निद्रः प्रकाशमानः चन्द्रातपः चन्द्रिका यस्यां सा, **स्वालापेति** । स्फूर्जन्त्यां दीप्यमानायां नैजविलोचनाञ्चलरुचौ आत्मीयापाङ्गकान्तौ, प्रत्याशा स्वाभिलषितनायकसमागमेच्छा, न चेत्, तस्याः, असवः प्राणाः, कथं स्थास्यन्ति न कदापि तिष्ठेयुरित्यर्थः ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

स्वैरोद्यत्सहजस्मितद्युतिकणे ज्योत्स्नाधिया मूर्छति
प्रत्याशा न हि चेत्किमन्यदसवः स्थास्यन्ति तस्याः कथम् ॥ २९ ॥ इति ।

राजा— हन्त मत्कृते महतीं दुर्दशामनुभवति सीमन्तिनी । अथवा तदिदं नः प्रमोदायैव । भवतु । चन्द्रकेतो तत्प्रतिविधानसाधनं किमनुचिन्तयन्ति तत्सख्यः ।

चन्द्रकेतुः— उपवने सुकुमारसान्त्वनप्रकारविनोदनं विना किमन्यत् ।

राजा— चन्द्रकेतो, सत्यमाह भवान् ।

कामः कठोरचरितः कुटिलो वसन्तः
कान्ता शिरीषकुसुमादपि कोमलाङ्गी ।
विश्लेषदुःखमतिदुस्सहमेतदस्याः
सद्यः कथं भवति तत्प्रतिकारकृत्यम् ॥ ३० ॥

विदूषकः— भो वअस्स झत्ति भवदो जइ सण्णिहाणं घडिस्सदि तदा तत्तहोदीए सरीरसन्दावस्स पडिहारो भविस्सदि ।

भो वयस्य, झटिति भवतो यदि सन्निधानं घटिष्यते

कान्त इति । तस्य प्रतिकारकृत्यं निवर्तकव्यापारः ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

तदा तत्रभवत्याः शरीरसंतापस्य प्रतिकारो भविष्यति ।

राजा-- सखे, त्वमेवं मन्यसे । तथापि

शक्रः प्रार्थयते कान्तामिति वार्ता प्रवर्तते ।
सञ्चिन्त्य तदिदं किञ्चिद्दूयते हृदयं मम ॥

विदूषकः-- भो वअस्स, कुळदेवदाओ एव्व तुह मणोरहं णिव्विघ्घं पूरइस्संदि ।

भो वयस्य, कुलदेवता एव तव मनोरथं निर्विघ्नं पूरयिष्यन्ति ।

राजा-- भवतु स्वार्थसाधनाय कानि चिह्नानि अत्रैव स्थातव्यानि । तदितरसन्निवेशस्थानं गत्वाऽनुयात्रिकवर्गेषु यथोचितं जनं संस्थाप्य शिष्टान् नगरं प्रति प्रस्थाप्य ततः कार्यशेषं साधयामः ।

[इति निष्क्रान्ताः सर्वे ।]

इति द्वितीयोऽङ्कः ॥

शक्र इति । दूयते दुःख्यति । अनुयात्रिकाणां अनुयायिनां, वर्गेषु समुदायेषु ।

इति श्रीवाधूलश्रीनिवाससूरिविरचितायां दीपिकाख्यायां व्याख्यायां द्वितीयोऽङ्कः समाप्तः ॥

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

॥ तृतीयोऽङ्कः ॥

(ततः प्रविशति विमानयानेन पुरन्दरसारथिर्मातलिः)

मातलिः— अहं खलु देवराजेन स्वपरिणीतये कन्याभ्यर्थनाय कुण्डिनपुरीं प्रति प्रहितोऽस्मि ।

गत्वा तत्र प्रार्थितो भीमभूपो
नीत्या तत्तद्दर्शितं कार्यवर्त्म ।
साध्यं सद्यः स्वामिनो वाञ्छितं यत्
तस्मिन्राज्ञा तेन हा वञ्चितोऽस्मि ॥ १ ॥

(विचिन्त्य) अहो दैवस्य वैषम्यम् ।

प्रवृत्तं दाक्षिण्यात्प्रणिहितधिया स्वामिनि मया
निषिद्धं स्त्रीदूत्यं तदपि गुणतः स्वीकृतमिदम् ।

तत इति । पुराणि शत्रुपत्तनानि दारयति नाशयतीति पुरंदरः महेन्द्रः । "वाचंयमपुरन्दरौ च" इति निपातनात् पुरोऽमन्तत्वम् । परिणीतये उद्वाहाय । अभ्यर्थनाय प्रार्थनायै । **गत्वेति** । नीत्या, तत्तत् कार्यवर्त्म दर्शितम् । स्वामिनः, यत्, वाञ्छितं, सद्यः साध्यं, तस्मिन् (विषये) तेन राज्ञा वञ्चितोऽस्मि । हेति खेदे । **प्रवृत्तमिति** । स्वामिनि महाराजे इन्द्रे, प्रणिहिता निक्षिप्ता धीः बुद्धिः येन सः तादृशेन मया दाक्षिण्यात् (हेतोः) प्रवृत्तं (भावे क्तः) निषिद्धं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

धृतं याच्ञादैन्यं कथमपि विलज्जं नरपता-
वधन्ये वैषम्यात्तदपि नियतेर्निष्फलमभूत् ॥ २ ॥

(पुनर्विचिन्त्य) अहो मन्दप्रज्ञता भीमनरेन्द्रस्य।

तथा हि,

त्रयस्त्रिंशत्कोटित्रिदशपरिषत्स्वामिनि हरौ
किमप्याशावेशाज्जगदधिपतौ वाञ्छति सुताम्।
सुहृत्त्वं दाक्षिण्यं बलमुचितभावः सुगुणता
न दृष्टं तत्सर्वं कथमहह भीमक्षितिभुजा ॥ ३ ॥

(आकाशे लक्ष्यं बध्वा) भो भो विदर्भाधिपते,

देया यद्यपि यत्र कुत्र चिदियं स्थाप्या न गेहे ततः
शक्रेण स्वयमर्थिता तव सुता तच्च त्वयोपेक्षितम्।
आस्तामेतदुपेन्द्रकाश्यपमुखा दृष्टा न संबन्धिनो
वज्रं वैरिभयङ्करश्च भवता नावेक्षितं तत्कथम् ॥४॥

शास्त्रेण लोकेन च, निन्दितं, यत्, स्त्रीदूत्यं, तदपि, इदं गुणतः (दुर्लभस्त्रीरत्नलाभरूपात्) गुणात् (हेतोः) स्वीकृतम्। अधन्ये (जामातृत्वेन महेन्द्रस्यापरिग्रहादस्याधन्यत्वम्। नरपतौ भीमराजे, याच्ञारूपं दैन्यं, कथमपि यत्नगौरवेण, "कथमादितथाप्यन्तं यत्नगौरवबाढयोः" इति कोशः। विलज्जं निर्व्रीडं यथा तथा, धृतम्। तदपि, नियतेः दैवस्य, वैषम्यात् प्रातिकूल्यात्, निष्फलं व्यर्थं, अभूत्। **त्रय इति।** हरौ इन्द्रे, सुतां वाञ्छति सति, भीमक्षितिभुजा, तत्, सर्वं कथं, न दृष्टं, अहहेति खेदे। **देयेति।** उपेन्द्रः वामनरूपेणेन्द्रस्यानुजतया

MPL Sastri Library Free Digitisation indoscripts.org (ISRT)

अथवा भैमीं प्रत्येवं ब्रवीमि । भो भो विदर्भराजनन्दिनि,

धार्या कल्पकमञ्जरी सुकृतिनां भोग्ये च नाके स्थितिः
श्लाघ्यास्ते परिचारिकाः सुवदने सर्वाः सुपर्वाङ्गनाः ।
याता मङ्गळदेवता भगवती सख्यो घृताच्यादय-
स्त्यक्त्वा मान्यमिदं पदं सुरपतेश्चित्ते नरं मा कृथाः ॥

(विमानमाशु प्रचार्य पुरोऽवलोक्य) इयमेव सा सुरराजधानी ।

(सम्यङ् निर्वर्ण्य) कथमियं निरुत्सवेव सन्दृश्यते नगरी ।

यतः,

नालक्ष्यन्ते पताका दरचपलपटाः सौधशृङ्गस्थलीषु
द्योतन्ते न प्रतोळ्यः सुरभितसुमनस्तोरणाळीवियुक्ताः ।
मञ्जीरक्वाणमिश्रः प्रचलति न च वा क्वापि वादित्रनादः
स्वस्वालङ्कारहीनाः पुरविबुधजना बद्धमौनाश्चरन्ति ॥

तदासन्नरथ्यासञ्चारिणः पौरजनान् पृच्छामि । (उपसृत्य)

अवतीर्णो विष्णुः, काश्यपः मरीचिप्रजापतेः पुत्रः महेन्द्रस्य पिता, अस्यैव मारीच इत्यपि प्रसिद्धिः । **धार्येति** । धार्या अवतंसनीया, नाके स्वर्गे, सुपर्वाङ्गनाः देवस्त्रियः, मंगळदेवता लक्ष्मीः, याता देवरस्य उपेन्द्ररूपस्य विष्णोः पत्नी, नरं, चित्ते, मा कृथाः । इत्यन्वयः । करोतेर्लुङिरूपम् । 'माङि लुङ्' इत्यनेन लुङ् । अडभावश्च । **नालक्ष्यन्त इति** । दरं ईषत्, प्रतोळ्यः रथ्याः, सुमनसां पुष्पाणां, संबन्धिनी या तोरणाळी चन्दनमालिकाश्रेणी, मंजीराः नूपुराः, वादित्रनादः आतोद्यध्वनिः ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

भो भो सुपर्वाणः, सोऽहमस्मिन्नगरे कानि चिह्निनान्यसन्निहित-तया स्वयमविदितप्रवृत्तिरिति ब्रवीमि । किंनिमित्तमियं न शोभते नगरी । (आकाशे) किं ब्रूथ । महीतले कामपि मनुज-कन्यां कामयमानस्तच्चिन्ताकुलतया बलवदस्वस्थो महाराजः पुरन्दर इति जनवादः प्रवर्तते । तच्चित्तानुवृत्त्या नियमित-प्रमोदैः पौरजनैः उत्सवाः स्तब्धाः ।

ततः,

नाक्रामन्ति विमुक्तशङ्कमृतवः क्रीडावने स्वामिनो
 विस्पष्टं न समुद्गिरन्ति कुसुमान्येतेऽपि कल्पद्रुमाः ।
दाक्षिण्यादिह यत्र कुत्रचिदयं मन्दानिलः स्पन्दते
 कन्दर्पोऽपि विशृङ्खलं प्रचलितुं शक्नोति नाभ्यर्णतः ॥

इति (विचिन्त्य) अहो अयुक्तकारिता त्रिदशेश्वरस्य ।

तथाहि ।

सन्त्यत्राप्सरसो विहर्तुमतुलाः श्लाघ्या घृताच्यादयः
 सौन्दर्यस्य निवासभूः शुभगुणा मान्या च देवी शची ।

तदित्यादि । अविदितप्रवृत्तिः अज्ञातवृत्तान्तः । अनुवृत्त्या अनुसरणेन, नियमितः निरुद्धः । **नाक्रामन्तीति ।** ऋतवः वसन्ताद्याः षडृतवः, विमुक्ता त्यक्ता शङ्का यस्मिन्कर्मणि तत् (आक्रमणक्रियाविशेषणमेतत्) न समुद्गिरन्ति नोद्भेदयन्ति । अभ्यर्णतः समीपे । **सन्तीति ।** अतुलाः असदृश्यः, शची इन्द्राणी । लघुतां गौरवहानिं, व्यनक्ति प्रकटयति ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

तत्ताद्दग्विभवः स्वयं सुरपतिः सञ्चिन्तयन्मानुषीं
सर्वेषां लघुतां व्यनक्ति तदिदं कालस्य धिक् चेष्टितम् ॥

(पुरोऽवलोक्य) कथमत्रैव तत्र भवत्याः पौलोम्याः परिचारिका पुष्पभाजनहस्ता वासन्तिका समायाति ।

(ततः प्रविश्य वासन्तिका)

वासन्तिका— अय्य वंदामि ।

आर्य वन्दे ।

मातलिः— भद्रे वासन्तिके, तव भद्रं भूयात् । भवतु, क प्रस्थितासि ।

वासन्तिका— अय्य, सामिणो महेन्दस्स अस्सत्थदाए णवग्गहदेवदाणुग्गहणिमित्तं सत्तइसिप्पमुहेहिं जवो कारइदव्वोत्ति तस्स किदे णंदणवणंमि कुसुमाइं गण्णिअ आअच्छेत्ति तत्तहोदीए शचीदेवीए पेसिदम्हि ।

आर्य, स्वामिनो महेन्द्रस्य अस्वस्थतया नवग्रहदेवतानुग्रहनिमित्तं सप्तर्षिप्रमुखैर्जपः कारयितव्य इति तस्य कृते नन्दनवने कुसुमानि गृहीत्वा आगच्छेति तत्रभवत्या शचीदेव्या प्रेषितास्मि ।

मातलिः— (स्वगतं) स्वामिनो नैराश्यमेव भैम्यां स्वस्थता-

कथमित्यादि । पौलोम्याः शच्याः, स्वस्थता आरोग्यं, प्रत्यहं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

हेतुः । तदर्थ एव सप्तर्षिजपश्च । (प्रकाशं) वनदेवताः प्रत्यहं देव्याः कुसुमानि प्रयच्छन्ति खलु ।

वासन्तिका— तह जइ देवीए कहं पेसिदम्हि ।

तथा यदि देव्या कथमहं प्रेषितास्मि ।

मातलिः— अप्याहृतानि कुसुमानि ।

वासन्तिका— विसेसदो णत्थि ।

(विशेषतो नास्ति ।)

(इति प्रसूनभाजनं दृष्ट्वा) अम्हहे कहं ण दीसंदि कुसुमाइं ।

अहो न कथं दृश्यन्ते कुसुमानि ।

मातलिः— (विहस्य) मुग्धे, शृणु तावत् ।

अर्थिने दिशति वाञ्छितमर्थं
दातृभाववशगस्त्रिदशद्रुः ।
देवशासनबलात्क्वचिदेत-
न्निष्फलं भवति तत्र न चित्रम् ॥ ९ ॥

किञ्च,

आज्ञया पुष्पविष्टम्भे शक्रस्य सुरशाखिनाम् ।

प्रतिदिनं, प्रयच्छन्ति ददति । **अर्थिन इति** । त्रिदशद्रुः कल्पकतरुः, अर्थिने याचमानाय, देवस्य महेन्द्रस्य शासनबलात् आज्ञाबलात् । **आज्ञयेति** । विष्टंभः स्तम्भनं, अनुद्गम इति यावत् ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

अर्पयन्ति कथं देव्याः प्रसूनं वनदेवताः ॥ १० ॥

वासन्तिका— अय्य, अहं वि तहेत्ति मण्णे ।

आर्य, अहमपि तथेति मन्ये ।

मातलिः— महाराजपुरन्दरः कामपि मनुजकन्यां कामयमानश्चिन्ताकुलो वर्तत इति किंवदन्ती भवत्याः कर्णपथं गतैव ।

वासन्तिका— तहेत्ति सुणीअदि ।

तथेति श्रूयते ।

मातलिः— तन्मूलेयमस्वस्थता देवराजस्य, तथैव पुष्पविष्टम्भश्च । अनेनैव कर्मणा देवी कीदृशी वर्तते ।

वासन्तिका— किं अण्णं विमुत्तसुहोवभोआ केवळं दुंमणायमाणा वट्टइ ।

किमन्यत्, विमुक्तसुखोपभोगा केवलं दुर्मनायमाना वर्तते ।

मातलिः— भद्रे वासन्तिके, सा मनुष्यकन्यका निषधराजे गाढमनुरक्ता तमेव स्वयंवरे वरिष्यति । ततस्तस्यां स्वामिनो मनःप्रवृत्तिः केवलमायासायेति मन्ये ।

वासन्तिका— होदु देवीए सआसं गच्छम्हि ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

भवतु, देव्याः सकाशं गच्छामि ।

मातलिः— अहमपि समयमन्विष्य स्वामिनं द्रक्ष्यामि । आवयोः विस्रम्भजल्पितानि अनितरकथनीयानि ।

[इति निष्क्रान्तौ ।

॥ **मिश्रविष्कम्भः** ॥

——*——

(ततः प्रविशत्यासनस्थो महेन्द्रः ।)

इन्द्रः— (ध्यानं नाटयन् सव्यथम्)

यत्सौन्दर्यमदृष्टपूर्वमतुलं स्वर्गाङ्गनादुर्लभं
श्लाघं श्लाघमुदीरितं कुतुकिना वीणामुनीन्द्रेण मे ।
सेयं भीमसुता श्रुता यदसकृद्धन्या हि कर्णद्वयी
यद्दृष्टा चपलेक्षणा न सकृदप्यक्ष्णां सहस्रं वृथा ॥

(विमृश्य) कथमेकाधिकरणेष्वप्यस्मत्करणेषु हर्षव्यसनयोः संविभागः ।

संस्कृतप्राकृतभाषयोर्मिश्रणात्, मिश्रविष्कम्भः । **यदिति** । वीणामुनीन्द्रेण नारदमहर्षिणा, यत् सौन्दर्यं, श्लाघं श्लाघमिति णमुलन्तमेतत् । पुनः पुनः श्लाघित्वेत्यर्थः । 'आभीक्ष्ण्ये णमुल् च' इति णमुल् । 'नित्यवीप्सयोः' इति द्वित्वम् । यत् न दृष्टा, ततः, अक्ष्णां सहस्रं वृथा इति योजना ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

यतः,

कर्णौ यद्यपि तद्गुणामृतरसास्वादेन मे निर्वृतौ
तद्ध्यानानुभवेन शश्वदधुना चेतश्च विश्राम्यति ।
बाष्पं मुञ्चति चक्षुषां दशशती दृष्टा न तन्वीति मे
गात्रं तत्परिरम्भदुर्विधतया प्रायेण संक्लिश्यति ॥१२॥

(विचिन्त्य निश्वस्य) स्वप्नादिषु कामिनामिष्टजनध्यानधारापरिष्कृतहृदयसंस्कारगोचरतया तत्प्रतीतिः स्यादिति केचिदामनन्ति । तदपि मम दुर्लभं मन्ये ।

यतः,

जात्या वा व्यसनेन वा न हि कदाप्यायाति निद्रा ततः
स्वप्ने वीक्षितुमप्यभाग्यवशतः सा सुन्दरी दुर्लभा ।
तत्सौन्दर्यविलासभावविभवा नालोकिता यन्मया
तन्मन्ये सुलभा न सुन्दरमुखी सङ्कल्पशिल्पोऽपि मे ॥

ततः क्वचिद्विरलमरुत्प्रचारमनोहरं स्थानमास्थाय चिन्ताज्वरविधुरीकृतमात्मानं विनोदयामि ।

कर्णाविति । निर्वृतौ सुखितौ । विश्राम्यति खेदं विमुञ्चति । परिरम्भः आलिंगनं तस्य दुर्विधतया दारिद्र्येण आलिंगनाभावादित्यर्थः । **जात्येति** । जात्या अस्वप्नजात्या वा, व्यसनेन वा, भैमीप्राप्त्यभावनिबन्धनदुःखेन वा, यत् यस्मात् , मया, विभवाः, नालोकिताः, तत् तस्मात् मे, संकल्पशिल्पेऽपि, सा सुन्दरमुखी न

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

अथवा,

यद्यप्यस्ति निवस्तुमद्भुततमं क्रीडावनं नन्दनं
स्थातुं काञ्चनहर्म्यशृङ्गमतुलं दीपप्रभाभासुरम् ।
शैलः क्रीडितुमुन्नतस्सुरसरित्संफुल्लहेमोत्पला
तत्सर्वं सुखकृद्भवेन्मम यदि प्रीतिं विदध्यात्सुदृक् ॥

भवतु किमनेन मनोरथपरिवाहेन । संप्रति पुनः,

सन्त्वायताक्ष्याः सरसा विलासाः
प्रतिक्षणोद्यत्स्मयविस्मयाढ्याः ।
यशस्यमाशास्यमनन्यलभ्यं
तस्याः सकृद्दर्शनमेकमेव ॥ १५ ॥

यद्यपि तदुपलब्धिमार्गोऽपि मया प्रवर्तित एव । तथापि तत्र मे न निश्चयः । कुतः,

सुरमुनिवचनेषु प्रत्ययादव्यपेक्षं
मनुजपतिसुतायां मानसं मे प्रसक्तम् ।

सुलभेति मन्ये इत्यन्वयः । **यद्यपीति** । निवस्तुं निवासार्थमिति यावत् । हेमोत्पलानि स्वर्णतामरसानि शोभने दृशौ यस्याः सा सुदृक् दमयन्तीति यावत् । **सन्त्विति** । उद्यद्भ्यां उन्मिषद्भ्यां स्मयविस्मयाभ्यां आढ्याः पूर्णाः । स्मयः मन्दहासः यौवनगर्वः मदनगर्वो वा, विस्मयः आश्चर्यम् । **सुरमुनीति** । प्रत्ययात् विस्रंभात् अव्यपेक्षं साधनान्तरानपेक्षं सत्, तस्याः भैम्याः अनुनयविधाने प्रेमोत्पादने आवर्ज-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

तदनुनयविधाने मातलिः संप्रयुक्तः
स तु घटयति नो वा तत्र भाग्यं प्रमाणम् ॥

(ततः प्रविश्य मातलिः)

मातलिः— विजयतां देवराजः ।

इन्द्रः— मातले, अपि कुशलं विदर्भनरेन्द्रस्य ।

मातलिः— (स्वगतं) अनभिज्ञे राजनि महान्खलु गौरवातिशयस्त्रिदशेश्वरस्य । (प्रकाशं) स्वामिनः प्रसादलिप्सूनां कथमकुशलं स्यात् ।

इन्द्रः— मातले, अपि सुविहितं भवता कुसुमशरतन्त्रसाचिव्यम् ।

मातलिः— दुहितुश्चित्तमनुवर्तमानेन विदर्भराजेन यथाभिलषितमस्मदभ्यर्थनं नाभिनन्दितम् । किन्तु पुत्र्याः स्वयंवरमहे तत्रभवता महाराजेनापि समागन्तव्यमिति अनिर्देशपूर्वकमिदमभिहितम् ।

इन्द्रः— (सव्यथम्) कथमित्थं व्यवसितं भीमराजेन, सर्वथा सा वरारोहा स्वयंवरमहे चतुष्पथमण्टपस्तम्भसालभञ्जि-

---

न्व्यापारे वा, प्रमाणं हेतुः । **तत इत्यादि** । लिप्सूनां लब्धुमिच्छूनां, साचिव्यं साहाय्यं, दुहितुः पुत्र्याः दमयन्त्याः । अनुवर्तमानेन अनुसरता, निर्देशः विशिष्य नाम्ना व्यक्त्यभिख्यापनं सः पूर्वः यस्मिन् कर्मणि

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

केव सर्वैरप्यवलोकिता स्यात्। तत्र तु कार्यसिद्धिः भाग्यायत्ता। अतः स्वयमस्मदभ्यर्थने संप्रति तेन राज्ञा किमुपकृतं भवेत् । (विचिन्त्य आकाशे लक्ष्यं बध्वा, साभ्यर्थनं) भो विदर्भनरेन्द्र ।

सखासीस्त्वं पूर्वं नृपतिलक देवासुरमहे
मया दत्तं तुभ्यं सुरसदसि चार्धासनमपि ।
सुशीलां पौलोमीमहमगणयित्वा शुभगुणा-
मभूवं कन्यार्थी तदभिलषितं पूरय जवात् ॥१७॥

मातलिः— (स्वगतं) तदिदं खलु प्रसिद्धेषु पद्मरागेषु गैरिकायामभिनिवेश इव ।

यतः,

विख्याता मुनयोऽपि मुक्ततपसो यद्वाञ्छया मोहिता-
स्त्यक्त्वा मानुषभोगमाहृतमखा नाकं भजन्ते द्विजाः ।
भूपाला अपि शस्त्रपूतवपुषः सङ्ख्ये तथा ताः स्वयं
हित्वा दिव्यवधूरयं सुरपतिर्मर्त्याङ्गनामोहितः ॥१८॥

तत् तथा न भवतीति अनिर्देशपूर्वकम् । सालभञ्जिकेव पांचालिकेव । **सखेति** । देवासुरमृधे देवासुरयुद्धे, तत् तस्मात्, अभिलषितं वाञ्छां जवात्, पूरयेति योजना । **तदित्यादि** । गैरिकायां ताम्रलोहप्रकृतिभूते गिरिप्रदेशस्थे मृत्खण्डे । **विख्याता इति** । आहृतमखाः अनुष्ठित-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

(प्रकाशम्) अनात्मज्ञे राजनि स्वामिनः प्रार्थनामिमामनौपयिकीं मन्ये ।

इन्द्रः— (पुनर्विचिन्त्य) हन्त महान्खलु कष्टस्संवृत्तः ।

यतः,

याचे मर्त्यवधूमिति प्रतिमुहुः क्रुद्धा शची वर्तते
मन्यन्ते मयि लाघवं रविमुखाः सर्वेऽपि बर्हिर्मुखाः ।
नाभ्येत्यन्तरनारदात्सुरगुरुर्मौनी सुधर्मां सभां
यन्मामप्सरसो हसेयुरफलं तन्मे मनो दूयते ॥ १९ ॥

मातलिः-- देवराज, विदर्भराजेन दुहितृचित्तानुवर्तनव्यपदेशेन यदा स्वयंवरमह्नाय संकल्पितं तदैव मत्प्रवृत्तिर्विफलेति विदितमेव ।

यज्ञाः, नाकं स्वर्गं, सङ्ख्ये युद्धे । **अनात्मेत्यादि** । आत्मानं जानातीति आत्मज्ञः स न भवतीत्यनात्मज्ञः तस्मिन्, पुरुषतारतम्यज्ञानशून्ये इत्यर्थः राजनि भीमराजे, उपाय एव औपयिकी सा न भवतीति अनौपयिकी तां अप्रयोजिकामित्यर्थः । उपायशब्दात् स्वार्थे ठक् । इकादेशश्च । **याच इति** । बर्हिर्मुखाः देवाः, सुरगुरुः बृहस्पतिः । मौनी वाचंयमस्सन्, अनादरात् तिरस्क्रियया, सुधर्मां सभां अन्तः नाभ्येति इत्यन्वयः । अफलं भैमीप्राप्तिरूपफलरहितं, मां, अप्सरसः, हसेयुरिति यत्, तत् , मे, मनः, दूयते, दूनयतीत्यर्थः । अन्तर्भावितण्यर्थकमेतत् । यद्वा, यत्, यस्मात् हसेयुः, तत् तस्माद्धेतोः मे मनः दूयते दुःख्यतीति

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

इन्द्रः— (सव्यथम्)

गुणोत्कर्षेण कञ्जाक्ष्याः स्नेहेन च महीपतेः ।
मुनेर्गिरा विरोधेन विधेर्वा वञ्चितोऽस्म्यहम् ॥२०॥

(विचिन्त्य) किं विशेषतः कथनेन ।

दातुं व्यवस्यति मुदा न नृपः सुतां स्वां
भीता न रज्यति बलापहृता यदि स्यात् ।
मन्ये स्वयंवरमहे वरयेन्नळं सा
दूतीमुखादनुनयस्तु हितप्रयोगः ॥ २१ ॥

मातलिः— अहमप्येवं मन्ये ।

किंच,

कल्पद्रुदत्तैः कुसुमैः सुगन्धै-
श्चितांशुकैश्चारुविभूषणैश्च ।

यथावस्थित एवार्थः । **गुणोति** । कञ्जे पद्मे इव अक्षिणी यस्याः सा कञ्जाक्षी तस्याः, कमिति मान्तमव्ययं जलवाचि । समासान्तः षच् । षित्त्वान्ङीष् । **दातुमिति** । न व्यवस्यति न प्रयतते । 'षो अन्तकर्मणि' इत्यस्य व्यवपूर्वस्य लटि रूपम् । सा भीता सती, न रज्यति अनुरागं न बध्नाति । 'रञ्ज रागे' दिवादिः । सा नळं वरयेत् इति मन्ये । अनुनयस्तु अनुनय एव, तुरवधारणार्थकः । हितः भविष्यत्काले श्रेयःप्रदः, प्रयोगः उपायः । **कल्पेति** । अन्येषां सामान्याः साधारणाः अन्यसामान्याः गुणाः येषां ते अन्यसामान्यगुणाः ते न भवन्तीति अ...गुणाः तैः, स्वासाधारणगुणसहितैरित्यर्थः । कुसुमैः अन्यैश्च सा

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

अनन्यसामान्यगुणैः कृशाङ्गी
वश्या भवेत्सा नवयौवनस्था ॥ २२ ॥

अन्यश्च कामतन्त्रविदोऽप्येवमुदाहरन्ति ।

इन्द्रः— मातले, युक्तमाह भवान् । कः कोऽत्र भोः ।

(प्रविश्य प्रतीहारी)

प्रतीहारी— आणवेदु महाराओ ।

आज्ञापयतु महाराजः ।

इन्द्रः— मदनलेखे, मद्वचनादुच्यतां दूततन्त्रनियोगनिपुणा गन्धर्वयोगिनी चित्रलेखा । अद्यैव कल्पपादपेभ्यः मर्त्यलोकदुर्लभान्महनीयवसनभूषालङ्कारकुसुमफलाद्युपहारान्संगृह्य महीतलमुपेत्य च भवत्या कुण्डिनेशदुहिता यथा मयि विहितविस्रंभा स्यात्तथानुनेतव्येति ।

प्रतीहारी— जं आणवेदि ।

यदाज्ञापयतीति । (इति निष्क्रान्ता ।)

इन्द्रः— मातले, विदर्भदुहितुस्तच्चित्तचोरस्य निषधराजस्य च प्रवृत्त्युपलंभाय सत्वरमावामपि कुण्डिनपुरं प्रति प्रस्थितौ भवावः ।

मातलिः— तथा ।

(इत्युभावपि रथेन गगनपथादवतारं नाटयतः)

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

मातलिः— देवराज, मेघमण्डलपथमवतीर्णोऽस्मद्रथः ।
कुतः,

रथापातक्षोभात्सरभसमधश्चातकगणाः
पलायन्ते भीताः सलिलकणसंक्लिन्नगरुतः ।
पतन्त्यग्रे नेमिक्षतजलदकीर्णाश्च करका-
स्तटित्कान्त्या लिप्तं ज्वलति पुरतः पुष्करतलम् ॥

इन्द्रः — (भूविभागान्विलोक्य) मातले, पश्य ।

वेगादस्मिन्प्रचलति रथे व्योममार्गादधस्ता-
त्सन्दृश्यन्ते जलधय इमे हन्त पर्यायकुल्याः ।
कुर्वन्त्येते खलु कुलधराः कुब्जवल्मीकशङ्कां
स्निग्धश्यामाकृतिरविषमा सर्वतो भाति पृथ्वी ॥

मातलिः— भगवन्पाकशासन, कुण्डिनपुरोपकण्ठगगनाङ्गणवीथीमवतीर्णो रथः ।

कृशाङ्गी वश्या भवेत् इति योजना । **रथेति** । रथापातः वेगेन स्यन्दनागमनं तन्निबन्धनात् क्षोभात् । संक्लिन्नाः आर्द्राः गरुतः पक्षाः येषां ते तादृशाः पलायन्ते धावन्ति । नेमिः चक्राग्रभागः, करकाः वर्षोपलाः । पुष्करतलं नभोऽङ्गणम् । **वेगादिति** । प्रचलति सति गच्छति सति, सप्तम्यन्तमेतत् । पर्यायकुल्याः कुल्यासदृशा इत्यर्थः । कुलधराः महेन्द्राद्याः सप्त कुलाचलाः, कुब्जानि अत्यन्तं ह्रस्वानि यानि वल्मीकानि तच्छङ्कां कुर्वन्ति, दूरादालोके पृथुला अपि कुलाचलाः ह्रस्ववल्मीकानीव भान्तीत्यर्थः । पृथ्वी भूमिः, सर्वतः परितः, अविषमा

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

इन्द्रः— (विलोक्य) इदमेव तत्कुण्डिनपुरोद्यानम् । पश्य,

स्निग्धश्यामं तरुणविपिनं नित्यनृत्यन्मयूरी
मुग्धालापैर्मुखरितमिदं भाति चेतोहरं नः ।
अस्मिन्क्रीडाभवनरुचिरे कामिनो मुक्तशङ्काः
कान्ताश्लिष्टाः सुरतविरतौ शर्मनिद्रां लभन्ते ॥२५॥

अपि च ।

उन्मीलत्कुसुमोद्गतैः परिमलैरामोदिताशामुखाः
प्रच्योतन्मकरन्दबिन्दुनिकरैरश्यानपृथ्वीतलाः ।
शाखासक्तफलौघनम्रशिरसस्सुच्छायरम्योदराः
कामोद्यानवने विभान्ति शिखरैरभ्रंलिहाः पादपाः ॥

(पुनर्विलोक्य) अहो रमणीयता लीलोद्यानस्य ।

निम्नोन्नतप्रदेशमन्तरा सर्वत्र समा, भाति । स्निग्धेति । मुग्धालापैः सुन्दरैः केकारवैः, मुखरितं स शब्दं, इदं, नः अस्माकं, चेतोहरं चित्ताकर्षकं, वर्तते इति शेषः । विरतौ अवसाने, शर्म सुखं । उन्मीलदिति । पादपाः, कामोद्यानवने विभान्ति इत्यन्वयः । उन्मीलद्भ्यः विकसद्भ्यः कुसुमेभ्यः उद्गतैः उत्पन्नैः, आमोदितानि वासितानि आशामुखानि दिङ्मुखानि यैस्ते, अश्यानं आर्द्रं, शोभना छाया सुच्छायं 'विभाषा सेनासुराच्छायाशालानिशानाम्' इत्यनेन छायाशब्दस्य पाक्षिकं नपुंसकत्वं, तेन 'ह्रस्वो नपुंसके' इत्यनेन ह्रस्वत्वं च । अभ्राणि मेघमण्डलानि लिहन्ति स्पृशन्तीति अभ्रंलिहाः 'वहाभ्रे लिहः' इति खश् । मुमागमश्च । क्वचिदिति । कन-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

तथाहि,

क्वचिदरुणितं रक्ताशोकद्युतिप्रसरैरिदं
कनकनिकषच्छायारम्यं क्वचिन्नवचम्पकैः ।
क्वचिदविरळस्निग्धश्यामं तमालकदम्बकै-
र्विकिरति मुदं कामोद्यानं चिरान्मम चक्षुषाम् ॥

मातलिः— भगवन्पाकशासन, पश्यतु भवान् । इतो वन-मध्ये किमप्यनिर्देश्यं तेजःपटलमिव संदृश्यते ।

इन्द्रः— (विलोक्य साश्चर्यम्)

एकीभूतः किमु समुदयो भाति सौदामिनीनां
हैमज्योतिर्वलयमपि किं चारुसंस्कारशुद्धम् ।
सौन्दर्याणामुत किमु सरः किन्नु लावण्यसारः
सान्द्रं तेजः स्फुरति किमिदं निर्विकल्पप्रकारम् ॥

कस्य निकषः शाणोपले घर्षणं तस्य छाया कान्तिः तद्वत् रम्यं, तमालकदंबकैः तमालवृक्षषण्डैः, विकिरति ददातीत्यर्थः । **एकीभूत** इति । सौदामिनीनां तटितां, समुदयः समूहः, किमु, चारुणा रुचिरेण संस्कारेण गुणाधायकशलाकोट्टङ्कनतैजसपुळिनसम्मार्जनादिना, शुद्धं नैर्मल्यमापादितं, हैमानां हेमसंबन्धिनां ज्योतिषां दीप्तीनां वलयं मण्डलं किम् इति वितर्कः । उत अथवा, सौन्दर्याणां सरः किमु । विकल्पात् निर्गतः निर्विकल्पः तादृशः प्रकारः स्वभावः यस्य तत् , इदमित्थमिति निर्धार-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

(सम्यङ्निर्वर्ण्य, सस्नेहकौतुकम्)

सहजसुभगमुग्धं कामिनीबिम्बमेकं
विलसति महनीयं तेजसां चक्रमध्ये ।
स्वजननफलभाजां स्नेहविस्तारितानां
जनयति च निकामं चक्षुषामुत्सवं मे ॥ २७ ॥

(पुनर्निर्वर्ण्य)

इयं पुनः सहजसुन्दरमनोहराकृतिर्दिव्यलावण्यपुञ्जरञ्जिता वरवर्णिनी ।

सञ्चारे वियति प्रमादपतिता किं वा सुपर्वाङ्गना
क्षोण्यां क्रीडितुमागता कुतुकिनी गन्धर्वकान्ता नु किम् ।
साहाय्याय जगज्जये निजपतेरन्वागता किं रतिः
सेयं खञ्जनलोलचारुनयना मन्ये मनुष्याङ्गना ॥ २८ ॥

(विचिन्त्य) अस्याः पुनः,

चितुमशक्यमित्यर्थः । सहजेति । तेजसां महसां, चक्रस्य मण्डलस्य मध्ये अभ्यन्तरे, नित्यसापेक्षत्वेन सामर्थ्यस्यानुपक्षीणत्वात् चक्रशब्दस्य मध्यशब्देन समासः । संचार इति । वियति आकाशे, संचारे गमनसमये, प्रमादेन अनवधानेन, पतिता, सुपर्वाङ्गना देवस्त्री, निजपतेः स्वभर्तुः मन्मथस्येति यावत् । खञ्जनवत् खञ्जरीटपक्षिवत् लोल चञ्चले चारुणी मनोज्ञे नयने नेत्रे यस्याः सा तादृशी, मनुष्याङ्गना मनुष्य-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

सौन्दर्यसंपदतिविस्मयकृत्कृशाङ्ग्याः
कुत्राप्यनन्यसुलभेयमदृष्टपूर्वा ।
चक्षुर्विलासविभवश्चिदशाङ्गनानां
कन्दर्पशिल्पविभवश्च कथं घटेत ॥ २९ ॥

(इति सस्नेहं विलोकयन् स्थितः)

मातलिः— (विभाव्य) आः परिज्ञातं, इयमेव सा कुण्डिनेन्द्रदुहिता । तापोपशमननिमित्तमुपवनं गतेति तर्कयामि ।

इन्द्रः— (विलोक्य सहर्षं) साधुदर्शिनी खलु तव धिषणा । अन्यथा कथमीदृशी रूपसंपत्स्यात् । शृणु तावत् ।

अक्ष्णां सहस्रं मम निर्निमेषं
व्यर्थं विधात्रा कृतमित्यवेत्य ।
स्थितस्य दैवादधुना कृशाङ्गीं
संपश्यतो मे सफलं बभूव ॥ ३० ॥

स्मीति मन्ये इति निश्चयान्तः सन्देहः । सौन्दर्येति । कृशाङ्ग्याः तन्वङ्ग्याः, सौन्दर्यसम्पत् रूपसमृद्धिः, अतिविस्मयकृत् अत्याश्चर्यकारिणी । सुखेन अनायासेन लब्धुं शक्या सुलभा अन्यस्य अन्यत्र वा सुलभा अन्यसुलभा सा न भवति इति अनन्यसुलभा, इयं, कुत्रापि, क्वचिदपि देशे पूर्वं दृष्टा दृष्टपूर्वा सा न भवतीति अदृष्टपूर्वा । कथं घटेत कथमपि न सङ्गच्छेतेत्यर्थः । अक्ष्णामिति । व्यर्थं कृतमित्यवेत्य स्थितस्य, दैवात्, अधुना, कृशाङ्गीं, संपश्यतः, तत्, अक्ष्णां सहस्रं,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

मातले, कथमियमुपलभ्येति महती मम हृदयभेदिनी चिन्ता।

व्यर्थं स्वर्गपदं वृथा सुरनदी कल्पद्रुमैरप्यलं
किं तेनाप्सरसां गणेन च कृतं सौधेन वा मेऽधुना।
पौलोमी महनीयभावसुभगा साप्यस्तु वा सुन्दरी
वैदर्भी वशगा न चेत्तदखिलं नास्त्येव मे सर्वथा॥

मातलिः— (स्वगतम्) अकुण्ठितप्रसरः खल्वस्य कामाभिनिवेशः। अस्य प्रतिक्रिया कथं स्यादिति मे संशयः। (प्रकाशम्) भगवन्, देवराज, गुणाभिनिवेशिनी खलु तव चित्तवृत्तिः। तस्याः सङ्घटनोपाये पुरुषप्रयत्ने सत्यपि विधिनापि सहायेन भवितव्यम्।

इन्द्रः— मातले, तत्कथं भविष्यति मे मन्दभाग्यस्य।

पश्यतः पङ्कजाक्षीं मे गाढमुत्कण्ठते मनः।
अव्याजसुन्दरी सा मामनुगृह्णाति वा न वा॥

मातलिः— महाराज, तथा नाशङ्कनीयम्।

इन्द्रः— (विचिन्त्य)

काङ्क्षते यं मृगाक्षीयं स धन्यः सुकृती पुमान्।

सफलं सप्रयोजनं, बभूव। व्यर्थमिति। स्वर्गपदं स्वर्गस्थानं, व्यर्थं विफलं कल्पद्रुमैरपि, अलं, कल्पद्रुमा अपि माभूवन्। वृथेत्यर्थः। अलमत्र वारणे। पश्यत इति। गाढम् अत्यन्तम्, उत्कण्ठते

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

यत्कृतं तेन सुकृतं न मया चरितं हि तत् ॥ ३२ ॥

मातलिः— विदर्भराजकुमारीं कामयमानस्स निषधाधिपोऽपि प्रागेव कुण्डिनपुरीमुपेत्य स्वमनोरथसन्धानपरः परिभ्रमतीति वार्ता श्रूयते ।

इन्द्रः— भवतु, कुण्डिनपुरं प्रति प्रहितायाश्चित्रलेखायाः प्रत्यावृत्त्या तत्प्रवृत्तिमुपलभ्य पश्चात्करणीयं चिन्तयावः ।

(इति निष्क्रान्तौ)

इति तृतीयोऽङ्कः ॥

अभिलषति । कांक्षत इति । सुकृती पुण्यवान्, तेन नलेन, यत् सुकृतं कृतं तत् मया नाचरितं हि ॥

इति श्रीवाधूलश्रीनिवाससूरिविरचितायां दीपिकाख्यायां व्याख्यायां तृतीयोऽङ्कः समाप्तः ॥

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

॥ चतुर्थोऽङ्कः ॥

(ततः प्रविशति व्योमयानेन गन्धर्वयोगिनी चित्रलेखा ।)

चित्रलेखा— (आत्मनि महिमातिशयं विचिन्त्य । सगर्वम् ।)

जगत्सु निखिलपुरुषार्थसम्पादनकुशलासु सकलास्वपि तत्त-त्कुलविद्यासु मम योगविद्या बहुमता ।

यतः,

क्वचन प्रकटं क्वचिन्निगूढं
भुवने वीतभयं सदा चरन्त्याः ।
दिवि वा भुवि वाथ दिक्षु वा मे
महता योगबलेन किं न लभ्यम् ॥ १ ॥

किं च,

किं जानाति स कौशिको नवमुनिर्जानन्ति किं मायिनो
मिथ्या केवलमैन्द्रजालिकविधिस्तज्ज्ञाः पुनस्त्वल्पकाः ।

तत इत्यादि । व्योमयानेन विमानेन, योगिनी योगप्रभाववती, पुरुषैः अर्थ्यन्ते याच्यन्ते इति पुरुषार्थाः धर्मादयः । क्वचनेति । क्व चन कुह चित् प्रदेशे, प्रकटं प्रकाशं यथा तथा, इदं चरिक्रिया-विशेषणम् । क्व चित्, निगूढं निभृतं च, सदा अनारतं चरन्त्याः मे, दिवि वा आकाशे वा, भुवि वा, दिक्षु वा, महता योगबलेन ; किं न लभ्यं ? सर्वं सुलभमेवेति भावः । वसन्तमालिकावृत्तम् । किमिति ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

लोकान्स्तम्भयितुं क्षणात्तिरयितुं कर्तुं च धातास्तु वा
शक्ताहं खलु साहसिक्यकुशला सर्वेषु तन्त्रेष्वपि ॥ २ ॥

आदिष्टास्मि खलु महाराजपुरंदरेण विद्याकौशलबलेन स्वपरिणीतये वशीकर्तव्या भीमसुतेति । तदात्व एवाहं पुनः ।

गत्वा भुवं योगबलान्निगूढा
विशङ्कमाविश्य नृपस्य गेहम् ।
तद्वर्यनारीव धृतात्मरूपा
सन्धानकृत्ये निपुणं प्रवृत्ता ॥ ३ ॥

सः तादृशप्रसिद्धियुक्तः, नवमुनिः नूतनऋषिः, कौशिकः विश्वामित्रः । किं जानाति किमपि न वेत्तीत्यर्थः । मायाविनः मायिनः मयशम्बरमारीचादयः, किं जानन्ति । न किमपीत्यर्थः । ऐन्द्रजालिकानां इन्द्रजालविद्याविशारदानां विधिः कृत्यं तु, मिथ्या केवलं असत्यमेव । केवलशब्दो निर्णयार्थकः । 'निर्णीते केवलमिति' इति कोशात् । तज्ज्ञाः पुनस्तु ऐन्द्रजालिकविधिज्ञास्तु, अल्पकाः अत्यन्तं अल्पाः 'अल्पे' इति सूत्रेण कन् । पुनश्शब्दस्तु भेदार्थकः 'पुनरप्रथमे भेदे' इति अमरः । धाता ब्रह्मा, स्तम्भयितुं स्थिरयितुं, तिरयितुं नाशयितुं, कर्तुं स्रष्टुं च अस्तु वा । वेत्यनादरे । साहसिक्ये साहसा वर्तते साहसिकी तस्या भावः साहसिक्यं, तस्मिन् कुशला समर्था अहं, सर्वेषु तन्त्रेष्वपि, शक्ता खलु । शार्दूलविक्रीडितं वृत्तम् । आदिष्टेत्यादि । कौशलं सामर्थ्यं । परिणीतये विवाहाय, तदात्व एव तत्काल एव । गत्वेति । निगूढा गुप्ता, विशङ्कं निर्भयं यथा तथा, आविश्य प्रविश्य, तस्याः भैम्याः वर्यः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

अथ स्वामिभक्त्यनुरूपं यथोचितं प्रवर्तितमपि तद्विफल-मिति मन्ये ।

यतः,

नर्मोक्तिं न ममाभिनन्दति गुणप्रस्ताविनीं वज्रिणो
नादत्ते धुरि दत्तमानतमुखी प्रेमोपहारादिकम् ।
पृष्टापि प्रणयेन सा न किमपि प्रत्युत्तरं वक्ति मे
बाला हन्त धुनोति केवलमियं मौनेन तिर्यक् शिरः ॥

किं च,

सख्येव बन्धुभिरिव स्वयमम्बयेव
सौहित्यभेदवचनैरनुबोधितापि ।
तिर्यङ् निवृत्य सुमुखी निषधाधिनाथं
सञ्चिन्त्य सीदति मनः कुरुते न शक्रे ॥ ५ ॥

तद्वर्गः तत्रभवा तद्वर्ग्या तादृशी नारीव योषिदिव, धृतं आत्मरूपं स्वस्वरूपं यया सा तादृशी सती, सन्धानकृत्ये संघटनकार्ये, निपुणं प्रवृत्ता अत्यन्तं प्रयत्नं अकार्षमित्यर्थः । वृत्तमुपजातिः । **नर्मोक्तिमिति** । वज्रिणः इन्द्रस्य गुणप्रस्ताविनीं वीर्यधैर्यादिगुणप्रख्यापिकां, मम, नर्मोक्तिं लीला-लापं, नाभिनन्दति । धुरि पुरस्तात्, दत्तं अर्पितं, नादत्ते न गृह्णाति । शिरः, तिर्यक्, धुनोति चलयति । शार्दूलविक्रीडितं वृत्तम् । **सख्येति** । सौहित्यं तृप्तिः तदुत्पादकैः भेदवचनैः (नळे विरज्य महेन्द्रे अभिलाषोत्पादकैः) भेदोक्तिभिः, अनुबोधितापि (महेन्द्रनळयोः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

(विचिन्त्य) अतिभूमिं गतः खलु निषधराजे तस्याः प्रेमाभिनिवेशः ॥

यतः,

न स्नाति नाङ्गकमलङ्कुरुते न भुङ्क्ते
किञ्चिन्न वक्ति च सखीभिरुदीरितापि ।
बाला कपोलफलके निहितैकहस्ता
निश्वासकम्पितकुचाश्रुमुखी सदास्ते ॥ ६ ॥

एवं दुर्विनयदग्धचित्तां मुग्धामिमां योगकलाप्रभावेन सरभसमाक्रम्य प्रभवे पुरन्दराय प्रदातुं शक्नोमि ।

तथापि,

भूताविष्टा तथोन्मत्ता रोगिणी मन्त्रमोहिता ।
न स्त्री रमयते कान्तं न स्वयं सुखमृच्छति ॥ ७ ॥

इति कामतन्त्रविधानवचनात्सम्प्रति तदेतद्युक्ततया न भासते ।

विद्यमानावुत्कर्षनिकर्षौ) प्रतिबोधितापि, सीदति ग्लायति । वसन्ततिलकं वृत्तम् । **अतीत्यादि** । अतिभूमिम् आधिक्यं । प्रेमाभिनिवेशः प्रीतिनिबन्धना अत्यासक्तिः । **न स्नातीति** । अङ्गकं देहं, नालंकुरुते न प्रसाधयति । उदीरितापि उक्तापि । कपोलफलके गण्डमण्डले । **एवमित्यादि** । दुर्विनयेन दुष्टेन नळे विद्यमानेन अभिनिवेशेन, दिग्धं आक्रान्तं चित्तं यस्याः सा, तादृशीं, मुग्धां इन्द्रगुणानभिज्ञां, इमां, सरभसं सत्वरं, आक्रम्य गृहीत्वा । **भूतेति** । भूतेन पिशाचेन आविष्टा आक्रान्ता, उन्मत्ता उन्मादवती, ऋच्छति अधिगच्छति । **इतीत्यादि** ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

ततस्तस्यां वक्रशीलायामपि स्त्रीत्वसंबन्धेन सानुकम्पया मया सम्प्रति क्षान्तम् । स्वयंवरमहे स्वामिनं बिडौजसं यदि न वरयिष्यति तदास्याः प्रतिक्रियां विधास्यामि । भवत्वद्य सा हताशा किं व्यवस्यति । (ध्यानं नाटयित्वा । विहस्य) सांप्रतं पुनरियं विरहतापलङ्घनार्थं उपवनं प्रति प्रस्थिता । नळोऽपि तामनुसर्तुकामः प्रमदवनमार्गे तिष्ठति । तद्यथावगतं स्वामिने निवेदयामि । (इति निष्क्रान्ता ।)

॥ शुद्धविष्कम्भः ॥

(ततः प्रविशति राजा नळो विदूषकश्चन्द्रकेतुश्च)

राजा— चन्द्रकेतो, कुण्डिनेशदुहिता कामोद्यानं गतेति कथमवगतं भवता ।

चन्द्रकेतुः— माधविकामुखात् ।

राजा— (विचिन्त्य) हन्त महत्खलु साहसं करोति सीमन्तिनी ।

रम्यं कूजति कोकिले नतमुखी कर्णौ पिधत्तेऽस्तु वा
चेलाञ्चेन वपुश्च कौसुमरजः पातात् भिया भामिनी ।

कामतन्त्रं वात्स्यायनमुनिप्रणीतं कामशास्त्रं तस्य यत् विधानं विधिः तद्रूपात् वचनात् । सानुकम्पया दयासहितया, मया, क्षान्तं मर्षितम् । भावे क्तः । महे उत्सवे । बिडौजसं इन्द्रं । प्रतिक्रियां प्रतिविधानं । किं व्यवस्यति किमाचरति । लङ्घनम् अतिवाहनं तदर्थं, अनुसर्तुं कामः यस्य सः अनुसर्तुकामः । रम्यमिति । कोकिले पिके, रम्यं मनोज्ञं यथा तथा,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

दिव्येनाननसौरभेण रभसाकृष्टा मदालिव्रजा
गायन्तो निपतन्ति चेदभिमुखं सा किं करोतु प्रिया ॥

भवत्वहमपि विस्रब्धं प्रियादेहसौन्दर्यदर्शनाय प्रमदावनमेव गच्छामि ।

विदूषकः— भो वअस्स, साहसभीरुओ खु तुमं । ता संपदं वसंतविळासळच्छीसमळंकिदं कामोज्जाणं मा पविसदु भवं ।

भो वयस्य, साहसभीरुकः खलु त्वम् । तत्साम्प्रतं वसन्तविलासलक्ष्मीसमलङ्कृतं कामोद्यानं मा प्रविशतु भवान् ।

राजा— धिङ् मूर्ख, तत्र प्रियादर्शनमस्त्येव । मम तत्प्रतीकारः भवतु । कामोद्यानमार्गमादर्शय ।

विदूषकः— इदो इदो भवं ।

इत इतो भवान् ।

(सर्वे परिक्रामन्ति ।)

कूजति सति, भामिनी चण्डी, कौसुमरजसः पुष्पधूलेः पातात् पतनात्, जायमानया भीत्या भयेन, वपुश्च, चेलस्य वस्त्रस्य अञ्चेन अञ्चलेन, पाथस्त आच्छादयाति । व्रजाः समूहाः । भवत्वित्यादि । विस्रब्धं निश्शङ्कं यथा तथा, इदं दर्शिक्रियाविशेषणम् । दरं ईषत् चलिताः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

विदूषकः— भो वअस्स, मळआणिळदरचळिदचूदपल्लवंगुळीहिं आआरअंती विअ पमदवणळच्छी ळक्खीअदि ।

भो वयस्य, मलयानिलदरचलितचूतपल्लवाङ्गुलीभिराकारयन्तीव प्रमदवनलक्ष्मीर्लक्ष्यते ।

राजा— (विलोक्य सहर्षम् ।)

पुष्पोद्गमेन रुचिरा मुहुराह्वयन्ती
मन्दानिलोच्चलितचूतलताङ्गुलीभिः ।
आमत्तकोकिलरुतैः श्रुतिलोभनीयै-
रापृच्छतीव कुशलं प्रमदावनश्रीः ॥ ९ ॥

(स्पर्शसुखमभिनीय)

रतिरभसविनृत्यत्कोकिलाधूतचूत-
प्रसवगळितमाध्वीबिन्दुसन्दोहबन्धुः ।
कुवलयनयनानां कुन्तळामोदहारी
मलयगिरिसमीरः स्पन्दते मन्दमग्रे ॥ १० ॥

चूतपल्लवाः रसालकिसलयान्येव अङ्गुळ्यः ताभिः, आकारयन्तीव आह्वयन्तीव । पुष्पेति । रुचिरा मनोज्ञा, मन्दानिलेन उच्चलिताः कम्पिताः, चूतलताः रसालयष्टय एव अङ्गुळ्यः करशाखाः ताभिः, आह्वयन्ती आकारयन्ती, प्रमदावनश्रीः, श्रुतिलोभनीयैः श्राव्यैः, आमत्तानां ईषन्मदानां कोकिलानां रुतैः स्वनैः, कुशलं क्षेमम्, आपृच्छतीवेत्युत्प्रेक्षा । वसन्ततिलकं वृत्तम् । रतीति । रतौ सुरतक्रीडायां रभः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

विदूषकः— भो वअस्स, पुढमं एव्व पमदवणं गदाए तत्तहोदीए अङ्गसङ्गसोभग्गसुरभिळमहुरसुउमारो मळयमारुदो सुहप्फंसेण अज्ज भवंतं सुहावेदित्ति तक्केमि ।

भो वयस्य, प्रथममेव प्रमदावनं गतया अत्रभवत्या अङ्गसङ्गसौभाग्यसुरभिळमधुरसुकुमारो मलयमारुतः सुखस्पर्शेन अद्य भवन्तं सुखयेदिति तर्कयामि ।

राजा— सखे सोमक ! सत्यमाह भवान् ।

तदङ्गसङ्गार्जितसौरभश्री-
स्तस्याः कुचाभोगनिरुद्धवेगः ।
अङ्गैरनङ्गज्वरभूरितप्तै-
रालिङ्गितुं शक्यमयं समीरः ॥ ११ ॥

रभसः संभ्रमः तेन विनृत्यद्भिः कोकिलैः आधूतेभ्यः समन्तात् कम्पितेभ्यः चूतप्रसवेभ्यः रसालकुसुमेभ्यः गळिता स्रवन्ती या माध्वी मकरन्दः तस्याः बिन्दूनां सन्दोहस्य समूहस्य बन्धुः तत्सहित इति यावत् । कुवलयनयनानां प्रमदानां, कुन्तलामोदं केशसौरभं हरति आनयतीति हारी (ताच्छील्ये णिनिः) मलयगिरिसमीरः, अग्रे, मन्दं, स्पन्दते किंचित् चलति । मालिनीवृत्तम् । तदङ्गेति । तस्याः भैम्याः अङ्गसङ्गेन देहसंबन्धेन आर्जिता सम्पादिता सौरभश्रीः परिमळसम्पत् येन सः, अयं, समीरः, आलिङ्गितुं, शक्यम् । सामान्ये नपुंसकं । वृत्तम् उपजातिः ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

चन्द्रकेतुः— महाराज, इतो दीयतां दृष्टिः ।

उल्लासिनी तरुणपल्लवबद्धरागा
विष्वक्परागपटवासचयान्किरन्ती ।
उद्गीतकैरनुसृता मधुपैः समन्ता-
दामोदमेति सततं प्रमदावनश्रीः ॥ १२ ॥

राजा— (कामोद्यानं प्रविश्य समन्तादवलोक्य सस्पृहम्)

उन्मीलत्कुसुमस्मिता सतिलका बालप्रवाळाधरा
माध्वीसिक्तपरागचन्दनलसद्विस्तारिगुच्छस्तनी ।
गायन्ती मधुरस्वनैर्मधुलिहामामोदभूमावहा
कान्तं प्राप्य वसन्तमद्भुतगुणा धत्ते वनश्रीः श्रियम् ॥

किंच,

पङ्क्तिश्चूतमहीरुहां मधुरजोजम्बालितप्राङ्गणा
सेयं केकिकुलावृता जलधरश्यामा तमालावळिः ।

उल्लासिनीति । विष्वक् समन्तात्, परागाः पुष्पधूळय एव पटवासाः गन्धचूर्णाः तेषां चयान् निकरान्, किरन्ती विक्षिपन्ती, उद्गीतकैः उच्चैर्गायद्भिः, मधुपैः । **उन्मीलदिति** । उन्मीलन्ति विकसन्ति कुसुमान्येव स्मितानि यस्याः सा । यद्वा उन्मीलत्कुसुमैः स्मितं मन्दहासः यस्याः इति । (प्रकृत्यादित्वादभेदे तृतीया) तिलकानि तिलककुसुमानि विशेषकं च, गुच्छाः पुष्पस्तबकाः, आमोदानां सौरभाणां मुदां च भूमानं आधिक्यं आवहतीति तादृशी, इयं, वनश्रीः, वसन्तं, कान्तं, प्राप्य, श्रियं शोभां धत्ते वहति । शार्दूलविक्रीडितं वृत्तम् । **पङ्क्तिरिति** । चूतमहीरुहां रसाल-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

एषा चम्पकवीथिका मधुकरश्रेणीवियुक्ताधुना
तन्मन्ये मदनार्तिदुर्बलतनुः स्थातुं व्यवस्येदिह ॥

(नेपथ्ये)

पिअसहि, समस्ससिहि समस्ससिहि ।

प्रियसखि, समाश्वसिहि समाश्वसिहि ।

चन्द्रकेतुः—— महाराज, बालानामालाप इव श्रूयते ।

राजा—— (दक्षिणतः कर्णं दत्वा। सस्पृहम्)

अपि किं निनदाः पिकाङ्गनानां
पटुवर्णाः किमु वा शुकीनिनादाः ।
मदयन्ति हि मानसं मदीयं
मधुरालापगिरः सुमध्यमानाम् ॥ १५ ॥

(दूरतो दृष्टिं दत्त्वा। सहर्षम्।) सखे, सोमक, सफलमद्य सञ्जातं चक्षुः । इतो नातिदूरे तरुणाशोकपादपच्छायायां स्फटिकशिलापट्टे शयाना सखीभ्यामुपास्यमाना दृश्यते सा विदर्भराजतनया ।

तरूणाम् । मधुरजोभिः मकरन्दमिश्रपरागैः जंबालितं कर्दमितं प्राङ्गणं यस्याः सा, केकिनां मयूराणां कुलैः वृन्दैः आवृता व्याप्ता, मदनार्त्या मन्मथबाधया दुर्बला तनुः यस्याः सा, सा, इह, स्थातुं, व्यवस्येत्, इति मन्ये । अपि किमिति । पिकाङ्गनानां परभृतस्त्रीणां पटवः अभिव्यक्ताः वर्णाः अक्षराः येषु ते, शोभनं मध्यमं अवलग्नः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

विरळभूषणभासुरमङ्गकं
विरहपाण्डु कृशं परिबिभ्रती ।
कतिपयैरुडुभिः समुपागता
शशिकलेव विभाति शरीरिणी ॥ १६ ॥

तद्वयं विटपान्तरिता भूत्वा तावदासां विस्रंभजल्पितानि शृणुमः । (इति तथा कुर्वन्ति ।)

(ततः प्रविशति पल्लवशय्यां गता स्मरतापमनुभवन्ती दमयन्ती, तस्याः सखी माधविका नवमालिका च ।)

सख्यौ— पिअसहि दमअंदि, समस्ससिहि समस्ससिहि । तुह किदे उवणीदाइ इमाइ णळिनीपत्ताइं, एदाइ बिस-तंतुजाळाइं इदं अ उसीरचंदणं । ता एदेहिं खणमेत्तेण तुह संदावो गमिस्सदि ।

प्रियसखि, समाश्वसिहि समाश्वसिहि । तव कृते उपनीतानि इमानि नळिनीपत्राणि एतानि बिस-तन्तुजालानि इदश्चोशीरचन्दनम् । तदेतैः क्षणमा-त्रेण तव संतापो गमिष्यति ।

राजा— (सकरुणम् ।)

यासां ताः तासां, मधुरस्य मनोज्ञस्य आलापस्य संबन्धिन्यः गिरः मदयन्ति मत्तं कुर्वन्ति । **विरळेति** । परिबिभ्रती वहन्ती, उडुभिः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

अव्याजसुन्दरमनोहरमम्बुजाक्ष्या
राजीवगर्भसुकुमारमिदं शरीरम् ।
दुर्वारतीव्रमदनानलजालतप्तं
संक्लिश्यतीति हृदयं परिदूयते मे ॥

विदूषकः— भो वयस्स, भवं एव्व तत्तहोदीए सन्दाव-काळणं ।

भो वयस्य, भवानेव तत्रभवत्याः सन्तापकारणम् ।

राजा— पुरन्दरोऽप्येनामभ्यर्थयत इति जनवादादपि तन्निमित्तः स्यादिति शङ्कते मे हृदयम् ।

(ततः प्रविशति रथेन महेन्द्रो मातलिश्च)

इन्द्रः— मातले भीमसुता कामोद्यानं गतेति गन्धर्वयोगिन्या यत्कथितं तत्सत्यं स्यात् ।

मातलिः— अप्रमेयप्रभावा खलु सा गन्धर्वयोगिनी ।

इन्द्रः— तर्हि तत्रैव गच्छावः । (इत्यवतरतः)

मातलिः— इदं कामोद्यानम् ।

इन्द्रः— विलोक्य (सहर्षं) मातले, पश्य सह सखीभ्यामिह

नक्षत्रैः, समुपागता संश्रिता, शरीरिणी मूर्तिमती, शशिकलेव विभाति प्रकाशते । अव्याजेति । अव्याजसुन्दरं नैसर्गिकसौन्दर्यसहितं अत एव मनोहरं मनोज्ञं, राजीवं तामरसं, मदनानलजालेन मन्मथाग्नि-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

दृश्यते वैदर्भी । (पार्श्वतो विलोक्य सासूयम्) अस्याः हृदयदस्युः स दुरात्मा नैषधोऽपि कथमत्रैव । भवतु तिरस्करिणीविद्यान्तर्हितौ भूत्वा समीपतस्तावदेषां विस्रंभभाषितानि शृणुवः । (इति तथा कुरुतः)

दमयन्ती— (चक्षुषी उन्मील्य, निश्वस्य) हळाओ सहीओ, जदा सहजसुन्दरमणोहराकिदी णवमम्महावतारो विअ महाभाओ सो णरणाहो चंदसाळासिअरंमि पुढमं दंसणपहं गदो, ततो आरहिअ मह संदावो वड्डइ ।

हे सख्यौ, यदा सहजसुन्दरमनोहराकृतिर्नवमन्मथावतार इव महाभागः स नरनाथः चन्द्रशालाशिखरे प्रथमं दर्शनपथं गतः तत आरभ्य मम सन्तापो वर्धते ॥

विदूषकः— भो वअस्स, अवि सुदं तत्तहोदीए वअणं । ता णिवुत्तसंसओ धीरो होहि ।

भो वयस्य, अपि श्रुतं तत्रभवत्या वचनम् । तन्निवृत्तसंशयो धीरो भव ।

राजा— सखे, सोमक, यद्यपि मम कार्यसाधने धृतिरस्ति । तथापि इयंता न पूर्तिं मन्ये ।

कुतः,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

चित्तानुवर्ती नृपतिः सुताया
मयि प्रसादेच्छुरियं कृशाङ्गी ।
अस्यां निषक्तं हृदयं दृढं मे
सन्धानकृत्यं तु विधेर्विधेयम् ॥

चन्द्रकेतुः— महाराज, भवतो विधिर्विधेय एव ।

पश्य,

दूतः श्वेतगरुद्द्विजो यदभवद्यच्चित्रसन्दर्शनं
दत्तो यत्प्रणयः स्वयं मृगदृशा सौधे कटाक्षाङ्कुरैः ।
तन्वी यद्विरहाकुला स्मृतिभुवः क्रूरैः शरैः पीड्यते
सर्वं दैवकृतं तदद्य भवतः सत्यं सहायो विधिः ॥

मातलिः— देवराज, अपि श्रुतं भैम्याः नलादीनाञ्च मुग्धप्रलपितम् ।

इन्द्रः— मातले, सम्यक् श्रुतं नायमवसरस्तत्प्रतीकारस्य ।

समूहेन तप्तं । **चित्तेति** । नृपतिः भीमराजः, सुतायाः पुत्र्याः, चित्तानुवर्ती अभिप्रायानुसारी । इयं कृशाङ्गी भैमी, मम, प्रसादं आत्मपाणिग्रहणरूपं इच्छुः अभिलषन्ती, अस्ति । निषक्तं संबद्धम् । संधानकृत्यं तु संघटनव्यापारस्तु, विधेः दैवस्य, विधेयं अधीनम् । **दूत इति** । श्वेतगरुत् द्विजः हंसः, मृगदृशा भैम्या, स्मृतिभुवः मन्मथस्य । देवराजेत्यादि । अपि: प्रश्ने । मुग्धप्रलपितं सुन्दरः सल्लापः ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

भवतु उपरि शृणुवः ।

माधविका— सहि णोमालिए, अदिभूमिं गदो खु इमाए पिअसहीए देहसन्दावो, एसो कहं उवसमं गमिस्सदि ।

सखि नवमालिके, अतिभूमिं गतः खलु अस्याः प्रियसख्या देहसन्तापः । एष कथमुपशमं गमिष्यति ।

नवमालिका— सहि माहविए, से पडिविहाणं किं करम्ह ।

सखि माधविके, अस्याः प्रतिविधानं किं कुर्वः ।

(उभे विमृश्य दमयन्त्या गात्रेषु नळिनीपत्राणि अर्पयतः ।)

विदूषकः— भो वअस्स, कीस माहविआ पुणो पुणो णळिणीपत्ताइं गिण्हादि विसज्जेदि अ ।

भो वयस्य, किमर्थं माधविका पुनः पुनः नळिनीपत्राणि गृह्णाति विसर्जयति च ।

राजा— (विलोक्य) अहो महानस्यास्तापातिशयः ।

तथा हि—

एकैकमम्बुजदळं हिमवारिसिक्तं
सख्या समीपविधृतं हृदये निधातुम् ।

तत्प्रतीकारस्य तत्प्रतिक्रियायाः । प्रतिविधानं प्रतीकारं । **एकैकमिति** । सख्या, हृदये, निधातुं, समीपविधृतं, हिमवारिणा शीतजलेन सिक्तं,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

तापोन्नतिव्यतिकरात्तरलायताक्ष्याः
क्रान्तं मुहुः पतति तद्बहुशो विशीर्णम् ॥

दमयन्ती— हळाओ सहीओ, इमिणा सन्दावेण ण सक्कुणोमि जीविदं धारेदुं ।

हळा सख्यौ, अनेन सन्तापेन न शक्नोमि जीवितं धारयितुम् ।

सख्यौ— पिअसहि, समस्ससिहि समस्ससिहि ।

प्रियसखि, समाश्वसिहि समाश्वसिहि ।

(इति बिसतन्तुजालकानि तस्याः गात्रेषु नियोज्य विलोक्य)

अह्महे कहं ण दीसंदि बिसतंदुजाळआइं ।

अहो कथं न दृश्यन्ते बिसतन्तुजालकानि ।

(इति परस्परं मुखमवलोकयतः ।)

विदूषकः— भो वअस्स किं एदं ।

भो वयस्य किमेतत् ।

राजा—

आर्द्रं शरीरनिहितं बिसतन्तुजालं
भस्मीकृतं वरतनोर्मदनाग्निवेगात् ।

अम्बुजदळं तामरसदळं; तत् एकैकं, मुहुः, क्रान्तं, बहुशो, विभिन्नं च, पतति इति योजना । **आर्द्रमिति** । बिसतन्तूनां मृणाळसूत्राणां जालं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

निश्वासमारुतविधूतमतो न सख्यो-
र्हा हन्त तन्नयनगोचरतामुपैति ॥

मातलिः— महाराज, दुस्सहोऽयमस्याः शरीरसन्तापः ।

इन्द्रः— (सासूयम्) मातले, मन्निमित्तश्चेदयमस्याः शोभनं भवेत् । इतरनिमित्तत्वे त्वस्याः प्रसरतु दुश्शीलायास्तापातिशयः ।

दमयन्ती— हळाओ सहीओ, इमिणा उवआरेण मह संदावो ण णिक्कमदि । ता तुह्माणं आआसआरिणी होम्मि ।

हळा सख्यौ, अनेनोपचारेण मम सन्तापो न निष्क्रामति । तद्युवयोः केवलमायासकारिणी भवामि ।

सख्यौ— सहि दमअंदि, खणमेत्तं धीरत्तणेण अत्ताणं धारेहि । (इति तस्याः गात्रेषु उशीरचन्दनानि गाढमवलिप्य अपसर्पतः ।

सखि दमयन्ति क्षणमात्रं धैर्येणात्मानं धारय ।

विदूषकः— भो वअस्स, तत्तहोदीए अङ्गेसु उसीरचंदणाणुलेवणं कदुअ किंणिमित्तं सहीओ अवसप्पंदि ।

भस्मूदः, अभस्म भस्म संपद्यमानं कृतं भस्मीकृतं । विधूतं निस्सारितं ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

भो वयस्य तत्रभवत्या अङ्गेषु उशीरचन्दनानुलेपनं कृत्वा किंनिमित्तं सख्यावपसर्पतः ।

राजा— (विलोक्य सातङ्कम्)

अङ्गेषु द्रुतविरहज्वराभितप्ते-
ष्वालिप्तान्यधिकमुशीरचन्दनानि ।
सन्तापक्वथितविभिन्नमुक्तबन्धा-
न्यत्युष्णान्यभिमुखमुत्पतन्ति वेगात् ॥

तच्छकलपाते तापभयात्सख्यावपसर्पत इति शङ्के ।

दमयन्ती— हा अंब, हा ताद, हा अय्यउत्त, (इत्यर्धोक्ते) कुदो मे तारिसो विहवो । हा महाभाअ, एआरिसं विपदं गदाए मह ण कोवि सरणं अत्थि । (इति मूर्छति ।)

हा अम्ब, हा तात, हा आर्यपुत्र, कुतो मे तादृशो विभवः । हा महाभाग, एतादृशं विपदं गताया मम न कोऽपि शरणमस्ति ।

सख्यौ— (संभ्रान्ते तस्याः प्रत्यङ्गं हिमजलानि अवकिरतः ।)

राजा— सखे सोमक, पश्य पश्य ।

अंगेष्विति । द्रुतविरहज्वरेण पटुतरविरहतापज्वरेण, अभितप्तेषु परितः सन्तापितेषु, अङ्गेषु, अधिकं यथा तथा, आलिप्तानि सर्वतः उपदिग्धानि, क्वथितानि पक्वानि अत एव विभिन्नानि स्फुटितानि मुक्त-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

तप्तायसे निपतिताम्बुवदम्बुजाक्ष्याः
सिक्तं तुषारसलिलं सुचिरं कथित्वा ।
गात्रे निलीनमभवन्मदनानिलोष्णे
किं ब्रूमहे कथमियं सहते स्मरार्तिम् ॥

सख्यौ— कहं अज्ज वि पिअसही सण्णं ण लहेदि ।
ता किं करम्ह ।

कथमद्यापि प्रियसखी संज्ञां न लभते । तत्किं कुर्वः ।

राजा— (विचिन्त्य)

वक्त्रेन्दौ कमलं विधातुमुचितं नास्याविरोधान्मिथः
कर्पूरं कुचकोकयोर्वपुषि वा तापाय चन्द्राह्वयम् ।
वातं निन्दति सुन्दरी तमधुना किं तालवृन्तानिलैः
सख्यः किं कलयन्ति वा वरतनोस्तापोपशान्तिक्रमे ॥

बन्धानि शिथिलसंघटनानि, चन्दनानि । **तप्तेति** । तप्तायसे अग्नि-सन्तापितायसशरावे, कथित्वा क्वाथं प्राप्य, स्मरार्तिं मदनबाधां, इयं, कथं, सहते तितिक्षते । **वक्त्रेति** । अस्याः भैम्याः, वक्त्रेन्दौ मुखचन्द्रे, मिथः अन्योन्यं, विरोधात् कमलं, निधातुं, नोचितम् । कमलचन्द्रयोर्विरोधस्य जगत्प्रसिद्धेरिति भावः; वा अथवा, चन्द्राह्वयं कर्पूरं घनसारः, 'घनसारश्चन्द्रसंज्ञः' इत्यमरः । कुचकोकयोः स्तन-मण्डलाकारचक्रवाकयोः वपुषि, तापाय तापनिवृत्तिमुद्दिश्य निधातुं 'क्रियार्थोपपदस्य' इत्यादिना चतुर्थी । नोचितम् । वरतनोः भैम्याः, किं कलयन्ति वा कीदृशं प्रतीकारं कुर्वन्ति वा । वेत्यनवधारणे ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

सख्यौ— (विचिन्त्य) होदु एव्वं करम्ह ।

भवतु एवं कुर्वः ।

(इति तस्याः गात्रेषु मलयजपल्लवतल्लजरसानुलेपनं कृत्वा नयने च प्रमृज्य, स्तनपटेन वीजयतः ।)

दमयन्ती— (दृशावुन्मील्य लब्धसंज्ञा सख्यौ विलोकयति)

राजा— दिष्ट्या लब्धसंज्ञा सुन्दरी ।

भूषा भूवलयस्य लोचनभृतां सन्तानवल्ली मुदां
निर्व्याजाद्भुतरामणीयकनिधिर्माङ्गल्यसीमाबला ।
सेयं मङ्गलदेवता समुदिता वैदर्भदुग्धाम्बुधे-
र्यत्प्रत्यागतजीविता शशिमुखी लोकांस्तथा लोकये ॥

नवमालिका— हळा माहविए, बलिअं खु पिअसहीए विरहज्जरातङ्को ।

सखि माधविके, बलवान् खलु प्रियसख्या विरह-ज्वरातङ्कः ।

माधविका— हळा णोमाळिए, अण्णं अ से चित्ताव-क्खेवकाळणं वट्टइ ।

भवत्वित्यादि । पल्लवतल्लजाः श्रेष्ठाः पल्लवाः । वीजयतः वातं प्रचारयतः । **भूषेति ।** लोचनभृतां चक्षुष्मतां, वल्ली शाखा, मंगलदेवता लक्ष्मीः, दुग्धं क्षीरं, लोकये पश्यामि । **हळेत्यादि ।** आतङ्कः पीडा, चित्ताव-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

सखि नवमालिके, अन्यश्चास्याः चित्तावक्षेपकारणं वर्तते ।

नवमालिका— किं तं ।

किं तत् ।

माधविका— महाराअपुरन्दरो वि पिअसहिं पत्थेदित्ति लोअवादेण देवदूदीए कुडिलवअणाणुरोहेण अ तह जइ तादो तस्स मणोरहं पूरइस्सदि तदा किं करिस्सं त्ति से महंतो खु चित्तावक्खेवो, तेण कालणेण पिअसहीए ईरिसो दसापरिणामो संवुत्तो ।

महाराजपुरन्दरोऽपि प्रियसखीं प्रार्थयते इति लोकवादेन देवदूत्याः कुटिलवचनानुरोधेन च तथा यदि तातः तस्य मनोरथं पूरयिष्यति तदा किं करिष्यामीति अस्या महान् खलु चितावक्षेपः । तेन कारणेन च प्रियसख्या ईदृशो दशापरिणामः संवृत्तः ।

नवमालिका— हळा माहविए, णिअदुव्विळासविसेसेण कुविदगउदमसुणिसावोवणद्व्वणकिणसहस्सदूसिदविरूव - सरीरसणिगवेमस्स सुणासीरस्स कहं अरुहदि विळसंतपु-

---

क्षेपस्य मनश्चाञ्चल्यस्य, दशायाः अवस्थायाः परिणामः परिपाकः, शोभनं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

णलावण्णमणोरहा णो पिअसही दमअंदी ।

सखि माधविके, निजदुर्विलासविशेषकुपितगौतमुनिशापोपनतव्रणकिणसहस्रदूषितविरूपशरीरसन्निवेशस्य शुनासीरस्य कथमर्हति विलसत्पुण्यलावण्यमनोहरा नः प्रियसखी दमयन्ती ।

माधविका— सहि, मा एव्वं भण । महाणुभावो खु तत्तभवं पुरंदरो । तह वि महाभाए तस्सिं णळमहाराअम्मि गुणाहिळासेण मोहिदा णो पिअसही दमअंदी ।

सखि, मैवं भण । महानुभावः खलु तत्रभवान् पुरन्दरः । तथापि महाभागे तस्मिन् नळमहाराजे गुणाभिलाषेण मोहिता नः प्रियसखी दमयन्ती ।

इन्द्रः— (आत्मानं नळञ्च विलोक्य, आत्मगतं)

तारुण्यलक्ष्मीरमणीयगात्रं
शुचिस्मितं सुन्दरमिन्दुवक्त्रम् ।
दृष्ट्वा नळं काममिव द्वितीयं
स्पृहेत किं मां सुदती गुणज्ञा ॥

नासीरं सेनामुखं यस्य सः शुनासीरः तस्य । तारुण्येति । द्वितीयं काममिव अन्यं मन्मथमिव स्थितं, सुदती भैमी, मां वाञ्छेत किम् । प्रार्थनायां लिङ् ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

(प्रकाशम्) विचक्षणा खलु माधविका ।

मातलिः— देवराज, अपि श्रुतमधिक्षेपवचनं नवमालिकायाः ।

इन्द्रः— पुरा खलु सौन्दर्यसंपदा सकलजगदानन्दजननीं शतानन्दजननीं विलोक्य चक्षूरागेण मोहितं मां तस्याः पतिर्गौतमः किञ्चिदधिक्षिप्तवान् । तेन मनागाक्षिप्तमनाः कृपालुर्भगवान् कमलासनो मत्कृते स्वयमनुरूपरूपविभवगुणरमणीयानप्सरोगणान्निर्माय नर्मालापविहारपरिहासविलासेषु बहुशस्तान्विलोकयितुमखिलेष्वपि ममाङ्गेषु अक्ष्णां सहस्रमसृजत् । तत्त्वानभिज्ञेयं कुट्टिनी केवलपौराणिकगाथाविप्रलम्भमोहिता झिल्लिकेव कुहरगता यत्किञ्चित्प्रलपितवती । तत्किमनेन उपरि शृणुवः ।

दमयन्ती— हळाओ, पुढमं चंदसाळासिहरगदाए मए स्वणमेत्तं पञ्चक्खीकिदो स महाभाओ अज्ज मं सुमरेदि वा ण वेत्ति संसएण वेवदि मे हिअअं ।

हळा सख्यौ, प्रथमं चन्द्रशालाशिखरगतया मया

पुरेत्यादि । चक्षूरागेण संदर्शनक्षणसमुत्पन्नया प्रीत्या, मनाक् ईषत्, कमलासनः ब्रह्मा, मत्कृते मदर्थे, (अव्ययमेतत्) निर्माय सृष्ट्वा नर्मालापः क्रीडावचनम्, तत्तत्त्वस्य तादृशस्य भूतार्थस्य अनभिज्ञा अज्ञात्री, कुट्टिनी शंभळी, विप्रलंभः वञ्चनावचनं, झिल्लिकेव अटव्यां तमिस्रायां

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

क्षणमात्रं प्रत्यक्षीकृतः स महाभागोऽद्य मां स्मरति वा न वेति संशयेन वेपते मे हृदयम् ॥

विदूषकः— भो वअस्स, उज्झिदरज्जकज्जं रत्तिंदिवं तत्थहोदीं अणुचिन्तयन्तो चिट्ठसि । तह वि तत्थहोदी एव्वं भणादि ।

भो वयस्य, उज्झितराजकार्यं रात्रिंदिवं तत्रभवतीं अनुचिन्तयंस्तिष्ठसि । तथापि तत्रभवत्येवं भणति ।

राजा— अयि वरवर्णिनि, कथमेवमाशङ्कसे ।

विबोधे मुग्धे ते शुभगुणकथावर्णनरसैः
समुद्यत्सङ्कल्पव्यतिकरसुखैर्ध्यानविधिषु ।
निशि स्वप्ने दृष्टैरनुपमविलासैर्नवनवै-
स्त्वदायत्तं चेतः सुमुखि सततं मामकमिदम् ॥

इन्द्रः— (सासूयं) अयि विदर्भनन्दिनि ।

ना कर्णारुन्तुदं शब्दायमानः कीटविशेषः । **निबोध इति** । हे सुमुखि, मामकं, इदं, चेतः (कर्तृ) विबोधे जागरदशायां, मुग्धे सुन्दरि, समुद्यता आविर्भवता सङ्कल्पव्यतिकरेण मनोव्यापारनिष्पादितसमागमेन जायमानैः सुखैः, त्वदायत्तं त्वदधीनम् । शिखरिणी वृत्तम् ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

नाकं परित्यज्य विमुच्य देवीं
　　त्वामेव कामादनुवर्तमानम् ।
विचक्षणे मां किमुपेक्षसे त्वं
　　किमस्ति लभ्यं तव मर्त्यडिम्भात् ॥

दमयन्ती— अहं उण अविण्णादहिअअं तं राएसिं पत्थअन्ती अत्तणो वि लज्जेमि । तस्स किदे पडिक्खणजिंभमाणमअणज्जुरपीडिदाए वि मह जीविदं वज्जलेवोवणद्धं विअ हिअआदो ण णिक्कमदि ।

अहं पुनरविज्ञातहृदयं तं राजर्षिं प्रार्थयन्ती आत्मनोऽपि लज्जे। तस्य कृते प्रतिक्षणजृम्भमाणमदनज्वरपीडिताया अपि मम जीवितं वज्रलेपोपनद्धमिव हृदयान्न निष्क्रामति ।

विदूषकः— भो वअस्स, सव्वहा तुह किदे तत्थहोदी एआरिसं मअणवेअणं अणुहोदि ।

भो वयस्य, सर्वथा तव कृते तत्रभवती एतादृशीं मदनवेदनामनुभवति ।

राजा— सखे, संप्रति किमत्र कर्तव्यम् ।

नाकमिति । नाकं स्वर्गं, विचक्षणे समर्थे इति संबोधनम् । डिम्भात्

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

कामः काममुपैतु कालसमतां चन्द्रोऽपि कल्पाग्निता
वातश्चाशनितां तथा गरळतामन्ये वसन्तादयः ।
मय्यालंब्य समीपगे प्रणयिनीं किं तैर्वृथारंभणै-
स्तादृकृत्यवियोगिनो मम पुनर्धिग्जन्म धिग्जीवितम् ॥

दमयन्ती— मअणो उण सहजसुन्दरस्स महाभाअस्स सरीरसोहाणिज्जिदो तस्स पुरदो ठादुं वि ण प्पहवदि । तदो एव्व तस्सिं महाभाए णिउत्तमणोरहोत्ति बद्धळक्खो मम्महो मं एव्वं बाहेइ ।

मदनः पुनः सहजसुन्दरस्य महाभागस्य शरीरशोभानिर्जितस्तस्य पुरतः स्थातुमपि न प्रभवति । तत एव तस्मिन्महाभागे नियुक्तमनोरथेति बद्धलक्ष्यो मन्मथो मामेवं बाधते ।

माधविका— हळा पिअसहि दमअंदि पुरंदरो भवदीं पत्थेदित्ति तस्स किदे तादेण तुह सुअंवरमहो संकप्पिदो । तस्सिं तुह अ नळमहाराअस्स अ दुवेणं वि पुण्णसंघटिदं अण्णोण्णाणुराअं पज्जुंमो झत्ति सफळं करिस्सदि । ता

शिशोः । काम इति । प्रणयिनीं प्रेयसीं, आलम्ब्य तां निमित्तीकृत्येत्यर्थः । समीपगे, मयि, कामः, कालसमतां, कामम्, उपैतु । वृथारंभणैः मामुज्झित्वा अबलायां व्यर्थहिंसाविधायकैः तैः कामादिभिः किं । न किमपिसाध्यमिति भावः । तादृकृत्यवियोगिनः तादृशकामादिकर्तृक-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

मह वअणंमि पच्चएण पच्चाशाळंबिणी धीरा होहि।

प्रियसखि, पुरन्दरो भवतीं प्रार्थयते इति तस्य कृते तातेन स्वयंवरमहः संकल्पितः। तस्मिन् तव च नळमहराजस्य च द्वयोरपि पुण्यसंघटितमन्योन्यानुरागं प्रद्युम्नो झटिति सफलं करिष्यति। तन्मम वचने प्रत्ययेन प्रत्याशाळंबिनी धीरा भव।

नवमालिका— हळा पिअसहि माहविआ सच्चं भणादि,

प्रियसखि, माधविका सत्यं भणति।

दमयन्ती— हळाओ सहीओ, कहं मे धीरत्तणं भविस्सदि॥

प्रियसख्यौ, कथं मे धैर्यं भविष्यति।

पहरइ सुमबाणो भीसणो रोसणो मं
महुरसबिसतेळ्ळारूसिदेहिं सरेहिं।
सरणविरहिदाए मोहिताए हिताए
ण हु ण हु सुळहो मे वल्लभो दुल्लभो सो॥

प्रहरति सुमबाणो भीषणो रोषणो मां
मधुरसविषतैलारूषितैः शरैः।
शरणविरहिताया मोहिताया हिताया
न खलु न खलु सुलभो मे वल्लभो दुर्लभः सः॥ १

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

यद्यस्या नैषधस्तन्व्याः दुर्लभस्तत्प्रियं भवेत् ।
यदयं नः प्रियप्रेप्साविधानेष्वर्गळायते ॥

मातलिः— देवराज, अपि श्रुतं माधविकावचनम् ।

इन्द्रः— अस्या वचः श्रुतं, विदर्भस्य शठत्वञ्चावगतम् ।

विदूषकः— भो वअस्स, अवि सुदं तत्थहोदीए उवाळंभवअणं ।

भो वयस्य, अपि श्रुतं तत्रभवत्या उपालम्भवचनम् ।

राजा—

आनन्दनमिदं तन्व्या मधुवन्मधुरं वचः ।
पुनर्गरळवत्तीक्ष्णं मोहञ्च तनुते मम ॥

चन्द्रकेतुः— महाराज तत्रभवत्याः सन्निधिमभिगन्तुमयमेवावसरः ।

राजा— तथा इति सधैर्यमुपसृत्य । अयि कळभाषिणि, विचक्षणापि मामेवं कथमाशङ्कसे । शृणु तावत् ।

अपश्यं सौधे त्वां शशिमुखि यदा स्निग्धनयनां
यदा मामावव्रुस्तव विवलितभ्रूविलसिताः ।

रविश्लिष्टस्य, मम । यद्दीति । अर्गळ इवाचरति अर्गळायते । प्रतिबन्धको भवति । आनन्दनमिति । गरळवत् विषवत् । अपश्य-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

अपाङ्गास्तत्सङ्गात्पुळकितवपुर्मोहमगमं
तदानन्दस्फूर्त्या जगदपि विलीनं सह मया ॥

संज्ञां ततः समुपलभ्य कथञ्चिदारा-
त्सर्वासु दिक्षु मम दत्तदृशः समन्तात् ।
कर्णावतंसकलिताशुगकार्मुकाणा-
माविर्बभूव धुरि चित्तभुवां सहस्रम् ॥

ततश्च,

एकोऽपि पञ्चविशिखो बहुभिः स्वरूपै-
राक्रम्य मां विलसदक्रमविक्रमश्रीः ।
मुग्धे त्वदर्थमखिलैर्निजशस्त्रजालैः
कां कां न मे कलयति स्म दशामसीमाम् ॥

किं बहुना—

मिति । सौधे राजसदने, यदा यस्मिन् समये, आवव्रुः समन्तात् आचक्रमुः । आनन्दस्य स्फूर्तिः अभिवृद्धिः अभिव्यक्तिर्वा तस्यां जगदपि, मया सह, विलीनं द्रवीभूय निमग्नम् । संज्ञामिति । समुपलभ्य प्राप्य, आरात् दूरे समीपे वा 'आराद्दूरसमीपयोः' इत्यमरः । आशुगा बाणाः कार्मुकाणि धनूंषि, धुरि पुरस्तात्, चित्तभुवां मन्मथानां- एकोऽपीति । विशिखाः शराः, विलसन्ती प्रकाशमाना अक्रमा क्रम- रहिता विक्रमश्रीः पराक्रमसंपत् यस्य सः । तुभ्यं त्वदर्थम्, मे असीमां

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

विद्धोऽपि कामविशिखैर्व्यथितोऽपि वातैः
सन्तापितोऽपि बहुशः शिशिरांशुपादैः ।
त्वत्प्रेमसम्पदवलम्बितजीवितोऽहं
कष्टान्प्रसह्य दिवसान्गमयामि कृच्छ्रात् ॥

(सर्वा राजानं विलोक्य संभ्रान्ताः समुत्तिष्ठन्ति । दमयन्ती लज्जावनतमुखी किञ्चिद्विवृत्य स्थिता ।)

इन्द्रः— (सासूयं) अयमपि दुरात्मा मर्त्यविटः कथमस्य समीपं गतवान् । (दमयन्तीं विलोक्य सस्पृहम् ।)

सविनयमियं व्यावृत्त्येषत्स्थिता विटपान्तरे
ललितललितैर्व्रीडालोलैर्विलासविलोकितैः ।
पुलकिततनुर्बाला धन्यं नृपं मुहुरीक्षते
वयमिह पुनः स्थित्वा दूरे हता विधिवञ्चिताः ॥

माधविका— महाभाअ इअं णो पिअसही भट्टिदारिआ दमअंदी । (इति हस्तेन निर्दिश्य) तुह किदे केवळं पञ्चहं विरहकिसपंडरेहिं अङ्गेहिं दुस्सहं मअणज्जुरसंदावं अणुहोंतीए इमाए किं वि असंबद्धं उवाळद्धं ता मरिसदु

अनवधिं, कां कां दशां न कलयति स्म, विविधा दशाः उदपादयदित्यर्थः ।
विद्धोऽपीति । विद्धोऽपि ताडितोऽपि, पादैः किरणैः । **सविनयमिति ।** विनयेन सह वर्तत इति सविनयं, ईषत् मनाक्, विधि

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

महाभाओ । (इति दमयन्तीं राज्ञः समीपमानीय तस्या हस्ताभ्यामञ्जलिं घटयति ।)

महाभाग, इयं नः प्रियसखी भर्तृदारिका दमयन्ती तव कृते केवलं प्रत्यहं विरहकृशपाण्डुरैरङ्गैः दुःसहं मदनज्वरसन्तापमनुभवन्त्यानया किमप्यसंबद्धमुपालब्धम् । तन्मर्षयतु महाभागः ।

इन्द्रः— मातले माधविकायाः पश्य दौश्शील्यं सन्धानकौशलञ्च ।

राजा— माधविके तव सख्या न किञ्चिदप्यपराद्धम् (इति सधैर्यमुत्थाय स्वहस्ताभ्यामञ्जलिं विघटयति । स्पर्शसुखमभिनीय । सानन्दं)

मनो मे सन्धत्ते मदपरवशां कामपि दशां
सुखस्फूर्त्या मोदस्तिमितमनिवेद्यप्रसरया ।
वपुः स्विन्नं जाड्यं भजति पुलकोद्भेदजटिलं
निरूढः सर्वाङ्गे किमपि कुरुते हन्त मदनः ॥

दमयन्ती— हळा पिअसहि माहविए, अस्स महाभा-

दैवेन, वञ्चिताः प्रतारिताः, अत एव हताः नाशिताः । **मन इति ।** मदपरवशां मदाधीनं, मोदेन हर्षेण स्तिमितं निश्चलं, निवेदयितुं योग्यः निवेद्यः अनिवेद्यः प्रसरः यस्याः सा तया । इदमित्थमिति वक्तुमशक्यत्यर्थः । स्विन्नं स्वेदयुक्तं, जाड्यं जडतां, पुलकानां रोमाञ्चानाम्

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

अस्स अविणअकिदो करकमलप्पंसो मह अंगेसु कं वि विआरं उप्पादेदि ।

प्रियसखि माधविके, अस्य महाभागस्य अविनय-कृतः करकमलस्पर्शो ममाङ्गेषु कमपि विकारमु-त्पादयति

माधविका— (सस्मितं राजानं पश्यति)

राजा— (दमयन्तीं विभाव्य स्वगतं)

राकेन्दुसुन्दरमुखीमखिलाभिनन्द्यां
देहप्रभापटलरञ्जितदिग्विभागाम् ।
आलिङ्ग्य गाढमधुनाधरविम्बमस्याः
पातुं मनो मम हि वाञ्छति किं करोमि ॥

(नेपथ्ये कलकलः)

सर्वे आकर्णयन्ति, (पुनर्नेपथ्ये)

वैदर्भीमतुलां स्वयंवरमहे द्रष्टुं समुत्कण्ठया
सेनाधूळिपरम्पराभिरभितः सञ्छादिताशामुखाः ।

उद्रेकेन उत्पत्त्या, जटिलं निचितं । **राकेति** । राकेन्दुवत् पूर्णिमाचन्द्र-वत् सुन्दरं मुखं यस्याः सा तां, पटलं समूहः, तेन रञ्जिताः अल-ङ्कृताः दिग्विभागाः हरिदन्तराणि यया तां । **वैदर्भीमिति** । अतुलां असदृशीं, महे उत्सवे, समुत्कण्ठया वाञ्छया, अपदानानि प्राक्तनानि

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

भेरीशङ्खमृदङ्गनादमुखरप्रान्ताः समायान्त्यमी
भूपालाः पटुवन्दिबृन्दपठितस्वस्वापदानक्रमाः ॥

(ततः प्रविशति पटाक्षेपेण कञ्चुकी)

कञ्चुकी— भद्रे दमयन्ति, भवत्याः स्वयंवरमङ्गळारम्भायास्मिन्दिने कुलदेवताप्रार्थनाकृते महाराजः सह सखीभ्यां भवतीं दिदृक्षते, त्वर्यतां सदनागमनाय ।

दमयन्ती— (संभ्रान्ता राजानं विलोकयन्ती सह सखीभ्यां निष्क्रान्ता ।

इन्द्रः— मातले, किमत्र प्रतिविधेयं । अथवा वयमपि स्वयंवरमहाय गत्वा तत्र प्रवृत्तिमवधार्य पश्चाद्यथोचितं प्रतिविधास्यामः ।

[इति निष्क्रान्तौ]

राजा— (विलोक्य)

व्याजेन सुन्दरमुखी वदनं विवृत्य
शश्वद्गता तरळदृष्टिभिरीक्षमाणा ।
छन्ना कचित्कचिदियं विटपावलीषु
वातेरिते शशिकलेव शरत्पयोदे ॥

ततः स्वयंवरमहे अभिनवमण्डनमनोहरां विदर्भराजतनया-

जयोदाहरणानि । व्याजेनेति । व्याजेन केन चिन्मेषेण, वदनं मुखं,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

मिमां निश्शङ्कमवलोक्यात्मानं कृतार्थयामि ।

(इति निष्क्रान्ताः सर्वे)

चतुर्थोऽङ्कः ॥

विवृत्य परावृत्य, आवलीषु परंपरासु, वातेरिते पवनविक्षोभिते, शरत्प-
योदे शरत्कालमेघे ॥

इति श्रीवाधूलश्रीनिवाससूरिविरचितायां दीपिकाख्यायां व्याख्यायां
चतुर्थोऽङ्कः समाप्तः ॥

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

॥ पञ्चमोऽङ्कः ॥

(ततः प्रविशति व्योमयानेन गन्धर्वयोगिनी चित्रलेखा)

चित्रलेखा— (सरोषहासं) अहो दुश्शीलता दमयन्त्याः ।

भूपेषु दिक्पतिषु सत्सु समागतेषु
कन्यार्थिनि त्रिदशभर्तरि पार्श्वगेऽपि ।
अन्तर्निरूढसुदृढप्रणयानुकूलं
बाला स्वयंवरमहे नळमेव वव्रे ॥ १ ॥

ततश्च,

वैदर्भेण यथोचितं नृपतयः सर्वेऽपि सम्मानिताः
सामोदाः स्वपुरीं गता वरतनोर्दृष्ट्वा विवाहोत्सवम् ।
वामाक्ष्या समुपेक्षितः सुरपतिर्दुर्वारचिन्ताकुलः
सावज्ञः स्वयमेत्य मां सकरुणं सस्नेहमादिष्टवान् ॥

भूपेष्विति । दिक्पतिषु दिक्पालेषु, भूपेषु राजसु, समागतेषु सत्सु मिळितेषु सत्सु, त्रिदशानां देवानां भर्तरि महेन्द्रे, अन्तः मनसि निरूढः निष्पन्नः सुदृढः अत्यन्तं स्थिरः यः प्रणयः प्रेमा तेन तस्य वा अनुकूलं अनुगुणं । वसन्ततिलकं वृत्तम् । **वैदर्भेणेति** । वैदर्भेण भीमेन राज्ञा, वामाक्ष्या सुन्दरनेत्रया, समुपेक्षितः सुतरामनादरविषयी-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

यथा,

निन्दन्त्वप्सरसो हसन्तु विमताः कुप्यन्तु सप्तर्षयो
मौनी चास्तु गुरुः शची च विमनास्सीदत्वसूयत्वपि।
वैदर्भी मम नापराध्यति सुताचित्तानुवृत्त्याऽस्तु वा
भैमी संसदि मामुपेक्षितवती तन्मे मनः कृन्तति ॥

ततः तत्प्रतिक्रिया कर्तव्येति। (विचिन्त्य)

हन्त मर्त्याङ्गनायाः कृते महता दुरन्तेन चिन्तातङ्केन त्रिदिवमपि परित्यज्य विदर्भपुरोपकण्ठे चिरं परिभ्रमति मरुतां पत्यौ चिरन्तनद्वेषिणाश्छिद्रान्वेषिणो दानवास्त्रिविष्टपमाक्रामेयुरिति शङ्कते मे हृदयम्। भवतु स्वामिनः प्रार्थनानिर्वहणेन आत्मानमनृणं करोमि। (इति परिक्रम्य विमृश्य सकोपाट्टहासम्)

कृतः, सावज्ञः अवमाननासहितः। **निन्दन्त्विति**। अद्भ्यः सरन्ति इति अप्सरसः रंभोर्वशीप्रभृतयो देववारवनिताः। क्षीरोदमथनसमये ततः तासामाविर्भावादिति भावः। विमताः शत्रवः, गुरुः बृहस्पतिः, शची इन्द्राणी, विमनाः चिन्तावशादन्तर्लीनमनस्का, 'दुर्मना विमना अन्तर्मनाः स्यात्' इत्यमरः। सीदतु ग्लायतु, असूयतु तापं वहतु, 'असु उपतापे' कण्ड्वादिः। अनुवृत्त्या अनुसरणेन हेतुना, अस्तु वा इत्यसूयया अभ्युपगमः। 'असूयोपगमेऽस्तु च' इत्यमरः। संसदि सभायाम्। **तत इत्यादि**। मर्त्याङ्गनायाः कृते मनुष्यस्त्रीनिमित्तं, दुष्टः अन्तः अवसानं यस्य सः तेन, आतङ्केन व्यथया, त्रिदिवं स्वर्गम्, उपकण्ठे समीपे, मरुतां देवानां पत्यौ स्वामिनि इन्द्रे, छिद्रं अनर्थो-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

वैदर्भ्याऽविनयात्स्वयंवरमहे धिक्कृत्य मत्स्वामिनं
कण्ठे यन्निषधेश्वरस्य निदधे माङ्गल्यहारावलिः ॥
तत्तस्याः पितृभर्तृबान्धवसखीबाष्पाम्बुपूरैरहं
सद्यो निष्करुणा करोमि निखिलं लोकं नदीमातृकम् ॥

(इति निष्क्रान्ता)

॥ शुद्धविष्कम्भः ॥

(नेपथ्ये)

अब्रह्मण्यमब्रह्मण्यम् ।

क्रीडागेहे रहसि सुचिरप्रार्थितं यत्नलब्धं
नक्तं भर्त्रा सह रतिसुखं भूय एवानुभूय ।
सुप्ता सौधे सुलभपवने गूढरूपेण केना-
प्येका बाला द्रुतमपहृता नेक्ष्यते राजपुत्री ॥५॥

(ततः प्रविशति संभ्रान्तो राजा वैदर्भः देवी कलावती च)

त्पादनावसरं, त्रिविष्टपं स्वर्गं, निर्वहणेन निर्वर्तनेन, अनृणं ऋणरहितम् । **वैदर्भ्येति** । धिक्कृत्य तिरस्कृत्य, नदी माता यस्य सः तं नदीमातृकं सिक्तमित्यर्थः । 'देशो नद्यंबुवृष्ट्यंबुसंपन्नव्रीहिपालितः । स्यान्नदीमातृकोदेवमातृकश्च यथाक्रमम् ।' इत्यमरः । अब्रह्मण्यं आपत्प्राप्तिबोधकः अमङ्गळशब्दविशेषः 'अब्रह्मण्यमवध्योक्तौ, इत्यमरः । **क्रीडेति** । क्रीडागेहे लीलागृहे, रहसि उपह्वरे, सुचिरप्रार्थितं बहोः कालादाशंसितं,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

कलावती— अय्यउत्त, चंदसाळासिअरंमि सुत्ताए मम वच्छाए दमअंदीए किं वि अच्चाहिदं विअ सुणीअदि । ता जुळणंमि पविट्ठं विअ मे हिअअं ।

आर्यपुत्र चन्द्रशालाशिखरे सुप्ताया मम वत्सायाः दमयन्त्याः किमप्यत्याहितमिव श्रूयते । तज्ज्वलने प्रविष्टमिव मे हृदयम् ।

वैदर्भः-- कञ्चुकिनो बामनस्येव वचः श्रूयते । तदेनं पृच्छामि, (नेपथ्याभिमुखमवलोक्य)

भो वामन, किमिदमत्याहितम् ।

कर्णस्य तीक्ष्णशल्यं तदिदं हृदयस्य विषमिव क्रूरम् ।
अङ्गारजालमिव मे सर्वेष्वङ्गेषु वेदनां तनुते ॥ ६ ॥

(प्रविश्य पटाक्षेपेण कञ्चुकी)

कञ्चुकी-- (सास्रं 'क्रीडागेहे' इति तदेव पद्यं पठति ।)

वैदर्भः-- हन्त प्रमादः संवृत्तः । हा वत्से, निस्तुलशुद्ध-

यत्नेन प्रयत्नेन लब्धं अधिगतं, रतिसुखं (कर्म) नक्तं रात्रौ, भर्त्रा सह दयितेन सार्धं, भूय एवानुभूय, सुलभपवने सौधे, सुप्ता निद्राणा, एका असहाया, बाला, गूढं प्रच्छन्नं रूपं आकारः यस्य सः, तेन, केनापि अज्ञातनामरूपेण प्राणिना, द्रुतं झटिति अपहृता आक्षिप्ता । मन्दाक्रान्तावृत्तम् ॥ **तत इत्यादि** । संभ्रान्तः त्वरया सहितः । चन्द्रशाला शिरोगृहम्, अत्याहितं महाभीतिः । **कर्णस्येति** । तदिदमत्या-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

चरित्रे, हा बन्धुजनप्रिये, हा त्रिभुवनानन्दिनि, हा वि-
दर्भकुलदेवते, हा दमयन्ति, ईदृशस्ते परिणामः। (सशोकं)

एकाकिनी क नु गतासि विना सखीभ्या
मस्मिन्निशीथसमये निबिडान्धकारे।
सन्त्यज्य बान्धवजनान्पितरौ तथावां
नन्वीदृशी किमिति निष्करुणासि वत्से ॥७॥

कलावती—— हा वच्छे, तिहुवणाळङ्कारळच्छी मं उज्झि-
अ कहिं गदासि। मे मुहकमळं दंसेह।

हा वत्से, हा त्रिभुवनालङ्कारलक्ष्मि मामुज्झित्वा
कुत्र गतासि। मे मुखकमलं दर्शय।

वैदर्भः—— हा वत्से,

अङ्कस्य भूषणमभूरुरसस्तथा मे
बाल्ये निकाममनवद्यगुणाभिरामा।

हितं, कर्णस्य, तीक्ष्णशल्यं निशितायश्शलाकेवारुन्तुदं, जालमिव समूह-
इव। हन्तेत्यादि। प्रमादः अनवधाननिबन्धना विपत्। निस्तुलं
असदृशं, प्रियाः बन्धुजनाः यस्याः सा, तस्याः संबुद्धिः। एकाकि-
नीति। सखीभ्यां विना सख्यौ परित्यज्य, निशीथसमये अर्धरात्रे,
पितरौ मातापितरौ आवां सन्त्यज्य, नन्वत्रामन्त्रणे। अङ्कस्येति।
बाल्ये, त्वं, मे, अङ्कस्य उत्संगस्य, तथा, उरसश्च, भूषणं, अभूः।
अनवद्यैः निर्दोषैः गुणैः, अभिरामा मनोज्ञा, सर्वसहेव भूमिरिव।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

सर्वसहेव जगतामभिनन्द्यशीला
दृष्टिं न नन्दयसि किं मम संप्रति त्वम् ॥

कलावती--- अय्यउत्त पुण्णपरिणामलद्धो तिहुवणालं-
कारभूदो तारिसो जामादा दुल्लहो खु मम वच्छाए ।
एआरिसे परिणामे तस्स मुहकमलं कहं पेक्खिस्सम् ।

वैदर्भः-- (सकरुणम्)

वैदर्भाणां नैषधानाञ्च लोके
सम्बन्धोऽयं श्लाघ्य इत्यभ्युपेत्य ।
जामातुस्तान्सद्गुणान्वीक्ष्य दत्ता
वत्सा नेदं सह्यते हन्त केन ॥ ९ ॥

(ततः प्रविशति शोकाविष्टो राजा नलः विदूषकः चन्द्रकेतुः सख्यौ च ।)

राजा-- हन्त प्रमादः ।

सुप्ते मयि प्रणयिनी प्रविहाय शय्यां
वातायनानिलनिषेवणकाङ्क्षया द्राक् ।

आर्यपुत्रेत्यादि । आर्यपुत्र नाथ, परिणामः परिपाकः, जामाता कन्याभर्ता, वैदर्भाणामिति । अभ्युपेत्य अङ्गीकृत्य, हन्तेति खेदे । सुप्त इति । मयि सुप्ते सति, प्रणयिनी दयिता दमयन्ती, वातायनानिलस्य गवाक्षरन्ध्रनिस्सरन्मारुतस्य निषेवणे आसेवने काङ्क्षया

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

सौधं गता सपदि केन चिदाहृतेति
श्रुत्वा गिरं विषमयीं विधिना हतोऽस्मि ॥१०॥

कलावती— अय्यउत्त, मम वच्छा भवणस्स दीवळेहा विअ णअरस्स मंगळदेवदा विअ उज्जणस्स कप्पवळ्ळी विअ धरणीमंडळस्स धम्मवळ्ळरी विअ तारिसी पुत्तिआ कहिं गदा कीरिसी वट्टदित्ति ण आणे ।

आर्यपुत्र, मम वत्सा भवनस्य दीपलेखेव नगरस्य मङ्गळदेवतेव उद्यानस्य कल्पवल्लीव धरणीमण्डलस्य धर्मवल्लरीव तादृशी पुत्रिका कुत्र गता कीदृशी वा वर्तत इति न जाने ।

वैदर्भः— (पुनस्सशोकं) हा वत्से दमयन्ति,

मद्वंशमण्डनमणिर्भुवनस्य लक्ष्मीः
कान्तस्य चित्तपरितोषणकल्पवल्ली ।
माङ्गळ्यसञ्चयनिधेरधिदेवता त्वं
क्व प्रस्थिता प्रतिवचो न ददासि किं मे ।

कलावती— हा वच्छे, तुए विणा खणमेत्तं वि ण जीविस्सं ।

वाञ्छया, द्राक् झटिति । मद्वंशेति । मण्डनमणिः अलङ्करणरत्नम् , माङ्गल्यसंचयानां मंगलकरद्रव्यसमूहानां निधेः आकरस्य अधिदेवता

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

हा वत्से, त्वया विना क्षणमात्रमपि न जीविष्यामि ।

वैदर्भः— (सक्रोधशोकं निश्वस्य) हन्त कष्टं ।

भीमस्य भीममनवेक्ष्य भुजप्रतापं
नीताद्य केन तनया शिखिनश्शिखेव ।
मन्ये किमन्यदथवा सुकृतैकभोग्यं
मुष्टं जगत्त्रितयमण्डनरत्नमेतत् ॥ १२ ॥

राजा— (विचिन्त्य) हा कष्टमकाण्डे कथमिदं संवृत्तम् ।

बाला श्लाघ्यगुणोन्नता प्रणयिनी पुण्येन लब्धापि सा
निर्व्याजं विपदं गतेति तदिदं दैवस्य दुश्चेष्टितम् ।
सौहित्यं सहजाद्भुतं श्वशुरयोः स्मृत्वा विदर्भान्वये
सम्बन्धश्च समस्तलोकमहितं चित्तं ममोत्ताम्यति ॥

कलावती— अय्यउत्त, मम वच्छा दमअंदी कहिं गदा कीरिसं विपरिणामं अणुहोंती मं उद्दिसिअ, हा अज्जू अज्जूत्ति रोदिस्सदित्ति तं सुमरिअ मह उदरब्भंतरं

अधिष्ठानदेवता, त्वं, क कुत्र, प्रस्थिता । मे, प्रतिवचः, किं न ददासि । हेत्यादि । हेति खेदे । त्वया विना त्वद्रहिता, क्षणमात्रमपि क्षणकालमपि, अत्यन्तसंयोगे द्वितीया । **भीमस्येति** । भीमं भयङ्करं, अनवेक्ष्य अगणयित्वा, शिखिनः अग्नेः, शिखेव ज्वालेव, भैम्याः वह्निशिखासाम्येन विलक्षणं पारिशुद्ध्यं तदपहर्तुर्विनाश्यत्वं चाभिव्यंजितम् । मुष्टं अपहृतम् । 'मुष स्तेये, क्र्यादिः । अकाण्डे असमये । **बालेति** ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

दज्जइ । ता किं करिस्सं, (इति रोदिति)

आर्यपुत्र, मम वत्सा दमयन्ती कुत्र गता कीदृशं परिणामं अनुभवन्ती मामुद्दिश्य हा आर्ये आर्ये- इति रोदिष्यतीति तां स्मृत्वा ममोदराभ्यन्तरं दह्यते । तत् किं करिष्यामि ।

वैदर्भः— देवि, समाश्वसिहि, समाश्वसिहि । (इति तस्या अश्रूणि प्रमृज्य) केनेदमपकृतं स्यात् (विचिन्त्य।)

वत्सा मे वरवर्णिनी वरगुणा प्रीत्यावृणोन्नैषधं
वृत्रारिर्विमुखो बभूव तदिदं दैवेन निर्वर्तितम् ।
तस्मिन्कश्चन नापराध्यति तथाप्यन्तः क्रुधान्धो हरि-
र्यद्दृष्टस्तदवैमि तस्य तदिदं दुश्चेष्टितं स्यादिति ॥१४॥

निर्गतः व्याजः हेतुः यस्मिन् कर्मणि तत् निर्व्याजं, गमनक्रियाविशेषणमेतत् । निमित्तं विनैव, विपदं आपदं, गता प्राप्ता कर्तरि क्तः । श्वश्रूश्च श्वशुरश्च श्वशुरौ 'श्वशुरः स्वश्र्वा' इत्येकशेषः । सौहित्यं तृप्तिं, उत्ताम्यति अत्यन्तं दूयते । **वत्सेति ।** वरवर्णिनी उत्तमस्त्री 'वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी' इत्यमरः । वरस्य वरेषु वा गुणेषु प्रीत्या, अवृणोत् भर्तृत्वेन वृतवती वृत्रारिः इन्द्रः, तदिदं मद्विषयकं इन्द्रस्य पराङ्मुखत्वं, दैवेन विधिना, निर्वर्तितं निष्पादितं, हरिः इन्द्रः, क्रुधा कोपेन अन्धः कर्तव्याकर्तव्यविषयज्ञानविकलः, यत् यस्मात्, दृष्टः । तत् तस्मात्, तदिदं वत्सापहरणरूपं कृत्यं, तस्य

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

भवत्वद्यैव सर्वतः प्रणिधीन्प्रस्थाप्य वत्सायाः प्रवृत्ति-लाभाय प्रयतिष्ये, (इति देव्या कञ्चुकिना च सह निष्क्रान्तः)

(ततः प्रविशति महेन्द्रो मातलिश्च)

इन्द्रः— मातले, कुटिलचित्ता दमयन्ती योगबलादाहृत्य नन्दनवनं नीता इति गन्धर्वयोगिन्या यत्कथितं तत्सत्यं स्यात् ।

मातलिः— स्वामिनः शासनं कथमन्यथा भवेत् ।

इन्द्रः— तर्हि तदन्वेषणप्रवृत्तानां नळप्रमुखानां परिदेवितविलोकनेन भैमीदुर्विनयाव्यसनकर्शितमात्मानं विनोदयामि । (इति परिक्रम्य समीपतः स्थित्वा तिरस्करिणीविद्यान्तर्हितावुभावपि तथा कुरुतः ।)

राजा— (पुनर्विचिन्त्य) अहो दैवस्य वैषम्यम् ।

यतः ।

त्रिभुवनमहनीया प्रेयसी पुण्यलक्ष्म्या
कथमपि मम लब्धा संविधानक्रमैश्च ।

दुश्चेष्टितं, स्यादिति, अवैमि जानामि । **भवत्विंत्यादि** । प्रणिधीन् गूढपुरुषान्, 'प्रणिधिरपसर्पश्चरः स्पशः । चारश्च गूढपुरुषः ।" इत्यमरः । प्रवृत्तेः वृत्तान्तस्य, लाभाय, अन्वेषणे गवेषणे, प्रवृत्तानां व्यापृतानां, परिदेवितं विलपनं, भैम्याः दमयन्त्याः, दुर्विनयात् मदनादरणपूर्वकनैषधवरणरूपात् दौष्ट्यात्, तिरस्करिणीविद्या द्रष्टृजननयनानां दर्शनसामर्थ्यापह्नवकरी मायाशक्तिः । तथा अन्तर्हितौ गूढौ । **त्रिभुवनेति** । त्रयाणां भुवनानां समाहारः त्रिभुवनं, तेन

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

इति मुदमयतो मे निर्वृतस्यापि भूयः
कथमभवदकस्माद्दुर्विपाको दुरन्तः ॥ १५ ॥

इन्द्रः— अरे दुरात्मन् मर्त्यपोत ममैव वैषम्यात् भैमी-गन्धर्वयोगिन्या नन्दनवनं नीता,

राजा— (विमृश्य) कष्टम्,

बालाऽऽश्लिष्टा कथमपि सकृच्चुम्बिता यत्नलब्धा
क्रीडोद्भेदो बहुविधपरीरंभणोज्जृम्भणं वा ।
तन्व्या व्रीळातरळमनसा हन्त नाविष्कृतं त-
न्मन्ये तावत्सुचरितफलं तेन कान्ता विलुप्ता ॥

इन्द्रः— अरे दुरात्मन्नैषध, सकृच्चुम्बनमालिङ्गनं वा लब्ध-मात्रं बहुमन्यस्व । इतः परं तदपि दुर्लभमेव ।

महनीया पूजनीया, प्रेयसी प्रियतमा भैमी, मम, पुण्यलक्ष्म्या सुकृतसमृद्ध्या, संविधानानां संघटनौपयिककृत्यरचनानां क्रमैश्च, कथ-मपि अतिप्रयासेन, लब्धा अधिगता । अयतः प्राप्नुवतः (इण्धातोः शतरि रूपम्) निर्वृतस्यापि सुखितस्यापि, मे, अकस्मात् अतर्किता-गमनं यथा तथा, अभवदित्यन्वयः । अव्ययमेतत् । **बालेति** । आश्लिष्टा आलिङ्गिता, सकृत् एकवारं, उद्भेदः आविष्करणं, परीरम्भ-णानां आलिङ्गनानां उज्जृंभणं नवनवः प्रादुर्भावः, यत् यस्मात् नावि-ष्कृतं, तत् तस्मात्, सुचरितफलं पुण्यफलं, तत् परिमाणम् अस्य तावत् परिमितम्, इति मन्ये । **अरे इत्यादि** । दुरात्मन् दुष्टहृदय । लब्धमेव लब्धमात्रं यल्लब्धं तदेवेत्यर्थः । बहुमन्यस्व बहुमानविषयं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

राजा— सखे सोमक, न सह्यते मे शोकावेगः ।

तापो महानवयवानभितः प्रसर्प-
न्संवेदनामयमनुक्षणमातनोति ।
दुःखाग्निना प्रसरता परिपच्यमानं
हा हन्त हन्त शतशः स्फुटतीव चेतः ॥

इन्द्रः— स्फुटत्वद्यैव ।

विदूषकः— (स्वगतम्) कहं वि विहिणा संघाडिदे सव्वं-वरमहूसवे तत्थहोदीं समासादिअ संपुण्णमणोरहेण रण्णा समं णअरं गदुअ णिअवरंमि अंबाए बम्हणीए अमुहं पेक्खिस्संति अहं विसेसदो उस्सुओ ठिदो । संपदं उण भूद-ग्गहेण विमुत्तस्स उम्माओ संकंतो विअ । जेण दुस्सह-विरहदुक्खविसपरवसदाए विसमवणराइसु गिरिकुहरसण्णि-वेसेसु अ तत्थहोदीं विचिणोदुं पउत्तस्स रण्णो पिट्ठदो अणुधावणेण मम वि दुःखाणुहवव्वेइअरो हविस्सदि । ता किं करिस्सं ! होदु । (प्रकाशं) भो वअस्स, किं एदेण परिदेविदेण । धीरो हविअ तत्थहोदीए उत्तंदावगमप्प-वुत्तो होहि ।

यत्नं कृतवती । ताप इति । संवेदनां आर्तिं, क्षणे क्षणे अनुक्षणं, प्रसरता वर्धमानेन, परिपच्यमानं समन्ताद्दह्यमानं, स्फुटतीव विशरणं प्राप्नो-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

कथमपि विधिना सङ्घटिते स्वयंवरमहोत्सवे तत्रभवतीं समासाद्य संपूर्णमनोरथेन राज्ञा समं नगरं गत्वा निजगृहे अंबाया ब्राह्मण्याश्च मुखं प्रेक्षिष्ये इति अहं विशेषतः उत्सुकः स्थितः। साम्प्रतं पुनर्भूतग्रहेण विमुक्तस्य उन्मादः सङ्क्रान्त इव। येन दुःसहविरहदुःखावेशपरवशतया विषमवनराजिषु गिरिकुहरसन्निवेशेषु च तत्रभवतीं विचेतुं प्रवृत्तस्य राज्ञः पृष्ठतोऽनुधावनेन ममापि दुःखानुभवव्यतिकरो भविष्यति। तत्किं करिष्यामि। भवतु (प्र) भो वयस्य किमेतेन परिदेवितेन। धीरो भूत्वा तत्रभवत्या वृत्तान्तावगमप्रवृत्तो भव॥

इन्द्रः— अरे विप्रवटो, वृथापरिदेवनमिति यदुक्तं तत्सत्यमेव। भैम्याः प्रवृत्त्युपगमस्तु कथं भविष्यति।

चन्द्रकेतुः— महाराज, सोमकस्सत्यं ब्रवीति। ततः

तीव। **कथमित्यादि**। संघटिते संयोजिते, राज्ञा समं नळमहाराजेन सह, ब्राह्मण्याः मत्पत्न्याः, भूतग्रहेण पिशाचावेशेन, उन्मादः चित्तविभ्रमः। विषमासु कण्टकोपलप्रायनिम्नोन्नतभूप्रदेशासु, वनराराजिषु कानन्श्रेणीषु, गिरिकुहराणां अद्रिकन्दराणां सन्निवेशेषु स्थल विशेषेषु, विचेतुम् अन्वेष्टुं व्यतिकरः संबन्धः प्रवृत्त्युपगमः वृत्तान्तोपलम्भः,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

सम्यक् प्रभातायां रजन्यां सर्वतः प्रान्तारामगिरिकान्तारवर्त्मसु तत्रभवत्याः तत्र तत्र परिमार्गणे प्रयतितव्यम् ।

राजा— चन्द्रकेतो, क्व प्रभातं । वर्धते खलु विभावरी ।

चन्द्रकेतुः— (समन्तादवलोक्य) पश्यतु, महाराजः,

आलक्ष्यन्ते तिमिरनिकरैर्मुच्यमाना दिगन्ताः
संलीयन्ते वियति शनकैस्तारकाः कोरकाश्च ।
प्राचीभागेऽप्यरुणकिरणाः प्रायशस्संवलन्ते
हित्वा नीडद्रुममभिमुखं पक्षिणस्सञ्चरन्ति ॥

राजा— तर्हि सर्वेऽपि अन्वेषयामः, [इति परिक्रामति]

इन्द्रः— मातले, मुधा परमटव्यामटन्तीमे मूर्खाः ।

सख्यौ— (सकरुणम्) हा महुरभासिणि, हा सहीअणवच्छले, हा दमअंदि, अंबाए कळावदीए उच्चङ्गपरिवड्ढिदाए तुह कहं एआरिसो दसापरिणामो संवुत्तो ।

गमः परिमार्गणे अन्वेषणे, प्रभातं प्रत्यूषम्, विभावरी रात्रिः, वर्धते वृद्धिं प्राप्नोति, 'त्रुटि युगायते त्वामपश्यताम्' इतिवत् विरहिजनस्याहीव रात्रौ कालयापनोपायाभावात् तस्यास्तथात्वमिति भावः । खलु वाक्यालङ्कारे 'निषेधवाक्यालङ्कारजिज्ञासानुनये खलु । इत्यमरः । **आलक्ष्यन्त इति ।** वियति आकाशे, शनकैः अद्रुतं यथा तथा, (अव्ययमेतत्) कोरकाः कलिकाः, अरुणकिरणाः सूर्यकिरणाः, संवलन्ते

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

हा मधुरभाषिणि, हा सखीजनवत्सले, हा दमयन्ति, अम्बायाः कलावत्याः उत्सङ्गपरिवर्धितायास्तव कथमेतादृशो दशापरिणामस्संवृत्तः ।

इन्द्रः— विधिमूर्खौ दुष्टसंरुयौ, समुचितः खल्वस्याः परिणामः ।

राजा— हा प्रिये दमयन्ति ;

कामस्य तीक्ष्णविशिखैरभिहन्यमानः
कान्ते त्वया करुणया परिरक्षितोऽस्मि ।
सम्प्रत्यकाण्डविनिवर्तनदारुणा त्वं
भूयोऽपि पातयसि तस्य करे कथं माम् ॥ १८ ॥

(विचिन्त्य) भो भीमनरेन्द्रनन्दिनि, प्रिये, कथमद्यापि निरनुक्रोशासि ।

कोपेन त्वमुपेक्ष्य मामकरुणा लीनासि किं कुत्र चि-
त्क्रोधस्यात्मनि कारणं न किमपि प्रायेण संलक्षये ।
तच्चेदप्यथवा समेत्य निकटं दण्डो विधेयोऽधुना
कान्ते किं प्रभुतास्ति ते न सुदृशां कोपप्रसादौ हितौ ॥

समन्तादाक्रामन्ति, नीडद्रुमं कुलायवृक्षम् । कामस्येति । अकाण्डे असमये विनिवर्तनेन पराङ्मुख्येन दारुणा क्रूरा सती, तस्य मन्मथस्य, करे, कथं, मां, पातयसि । कोपेनेति । लीनासि निगूढा तिष्ठासि किं । तच्चेत् कोपकारणमस्ति चेत्, (अपिः प्रश्ने) निकटं समीपं, समेत्य

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

इन्द्रः— मातले, अयमुन्मत्त इव प्रलपति दुर्मतिः । भवतु पश्यावः ।

सख्यौ— (सकरुणं) हळा पिअसहि, एव्वं भणादि खु महाभाओ । तह वि णिक्करुणा तुमं अज्जवि कहं विळंबसि ।

हा प्रियसखि, एवं भणति खलु महाराजः । तथापि निष्करुणा त्वमद्यापि कथं विळंबसे ।

राजा— हा प्रिये, सर्वथा त्वं साहसरसिकासि ।

एकस्यास्ते निशि कथमभून्मां विमुच्य प्रयाणं
नैतद्युक्तं शफरनयने स्नेहसारप्रवृत्तेः ।
कामं कान्ते मयि करुणयाभ्येत्य वा नन्दय त्वं
मां वा भद्रे गमय सहसा तत्र ते मा विलंबः ॥

इन्द्रः— अये नरडिम्भ; भैमी मया विमुक्ता चेद्भवन्त-

प्राप्य, कान्तेषु वल्लभेषु (विषये) सुदृशां, कोपप्रसादौ, हितौ । **एकस्या इति** । एकस्याः असहायायाः, शफरौ मीनाविव नयने यस्याः सा शफरनयना तस्याः सम्बुद्धिः शफरनयने, स्नेहसारस्य उत्कृष्टानुरागस्य (संबन्धिनी) या प्रवृत्तिः वृत्तान्तः चेष्टा वा तस्याः । हे कान्ते । मयि (विषये) करुणया, अभ्येत्य आगत्य, कामं आनन्दय अत्यन्तं सुखितं कुरु । वा अथवा, भद्रे कल्याणि, सहसा, तत्र सर्वथा ते, विलंबः, मास्तु इति योजना । मन्दाक्रान्तावृत्तम् । अये

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

मभ्येष्यति ।

विदूषकः-- (अपवार्य) भो चंदकेदो, अप्पडिआरगोअरो पिअवअस्सस्स रण्णो महंतो खु दुःखातंको । ता किं करंह ।

भोः चन्द्रकेतो, अप्रतीकारगोचरः प्रियवयस्यस्य राज्ञो महान् खलु दुःखातङ्कः । तत्किं कुर्वः ।

चन्द्रकेतुः— आर्य सोमक, किमन्यदत्र कर्तव्यम् । इयतो दिवसान्यथा वयं राज्ञा सह सुखभागिनः तथाद्य दुःखभागिता च संवृत्ता । (प्रकाशं) महाराज, किमत्र वृथा विलपनेन । आर्यायाः प्रवृत्तिमार्गमन्वेषयामः ।

राजा-- (विचिन्त्य सव्यथं)

गात्राणि सुकुमाराणि सुखार्हाण्यम्बुजेक्षणा ।
कथं ग्लापयितुं कोपात्प्रवृत्ता विषमे वने ॥ २१ ॥

इत्यादि । नरडिम्भ मनुष्यशिशो, अभ्येष्यति प्राप्स्यति । अप्रतीकारगोचरः प्रतिक्रियाया अविषयः, इयतः एतावतः, दिवसान् दिनानि, अत्यन्तसंयोगे द्वितीया । दुःखभागिता दुःखानुभवः । प्रवृत्तिमार्गं वृत्तान्तसरणिं । **गात्राणीति** । अम्बुजे तामरसे इव ईक्षणे यस्याः सा अम्बुजेक्षणा, सा, कोपात् सुकुमाराणि मृदूनि अत एव सुखार्हाणि सौख्योचितानि, गात्राणि अङ्गानि (कर्म) विषमे कण्टककूर्पादिभिः सञ्चरितुमनर्हे, वने, कथं, ग्लापयितुं म्लानिमापादयितुं, प्रवृत्ता

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

(पुनर्विचिन्त्य साभ्यर्थनम्)

पृथ्वी कोमलतां प्रयातु तपनस्तापं जहातु द्रुतं
स्वेदाम्भःकणमामृशन्मृदुगतिः वातः प्रवात्वग्रतः ।
दुष्टास्सत्वगणा विमुच्य पदवीं गच्छन्तु दूरे बहि-
र्यद्बाला कुपिता वने गतिवशादेकाकिनी भ्राम्यति ॥

भवतु उपवनं गच्छामः (इति तथा कृत्वा) चन्द्रकेतो, तत्र तत्र दृश्यतां प्रियायाः पदपाङ्क्तिः ।

पद्यां गता प्रणयिनी यदि पांसुगर्भे
दृश्येत वर्त्मनि नवा पदपङ्क्तिरस्याः ।
अभ्युन्नता च पुरतो विनता च पश्चा-
न्मुद्राङ्किता पृथुनितम्बभरालसायाः ॥ २३ ॥

इन्द्रः— (विहस्य) नभःपथेन नीतायाः कथं पृथिव्यां पदविन्यासः स्यात् ।

राजा— अथवा अहमेवं मन्ये ।

चूतोद्गताविरळधूळिमधूळिजालै-
र्जम्बालितेषु वनवर्त्मसु पङ्कजाक्षीम् ।

पृथ्वीति । तपनः सूर्यः, जहातु त्यजतु । आमृशन् अपहरन्, प्रवातु सम्यक् प्रसरतु । सत्वानां वन्यानां मृगाणां गणाः संघाः, **पद्भ्यामिति** । प्रणयिनी प्रेयसी मैत्री, मुद्राभिः सौभाग्यसूचकैः पादगतैः चिह्नैः अङ्किता लक्षिता अलङ्कृता वा। **चूतेति**। चूतानि रसा-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

सौन्दर्यसारविजिता वनदेवतास्तां
हस्तेन हस्तमधिरोप्य शनैर्नयेयुः ॥ २४ ॥

चन्द्रकेतुः— महाराज तत्रभवत्याः तादृशदेहसौन्दर्यलक्ष्मी-विलासस्य इयता बहुमानेन न पर्याप्तिम्मन्ये ।

विदूषकः— (सश्लाघं) सच्चं भणादि चंदकेदु ।

सत्यं फणति चन्द्रकेतुः ।

इन्द्रः— अहमप्येवं मन्ये ।

राजा— (पिकरुतश्रुतिमाभिनीय सादरं)

जगद्विजयडिण्डिमस्त्वमसि कामपृथ्वीपते-
र्धुनोषि च वियोगिनो युवजनान्कुहूनिस्वनैः ।
स्वयं घटयासि प्रियैर्झटिति कामिनीर्मानिनी-
र्वनप्रिय तदर्थये विनतधीरिह त्वामहम् ॥ २५ ॥

लकुसुमानि मधूलयः मकरन्दरसाः, जम्वालितेषु पङ्किलेषु, विजिताः अवज्ञाताः, वनदेवताः, तां, हस्तेन हस्तम् अधिरोप्य एकस्या हस्तेनान्यस्या हस्ते अधिरोहणं कारयित्वा, शनैः अद्रुतं यथा तथा, नयेयुः (स्थलान्तरं) प्रापयेयुः । **जगदिति** । हे कोकिल त्वं, काम-पृथ्वीपतेः मदनमहाराजस्य डिण्डिमः जयघोषणवाद्यविशेषः, धुनोषि तापयसि । कुहूनिस्वनैः कुहूइत्याकारकैः शब्दैः, मानिनीः मानवतीः प्रिये अन्यस्त्रीसङ्गते ईर्ष्यया कृतः स्त्रीणां कोपो मान इति ' शृङ्गारतन्त्रमर्मज्ञाः । अहं विनता प्रह्वा धीः मतिः यस्य सः तादृशः सन्, इह त्वां,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

कलरवमधुरिम्णा मत्प्रिया भीमपुत्री
पिक विजितवतीति त्वं व्यथां मा स्म गच्छः ।
इह विपिनपदे सा लीलया सञ्चरन्ती
सुरभिलसुमलोभाद्ब्रूहि दृष्टा श्रुता वा ॥ २६ ॥

(विलोक्य) कथमस्मदभ्यर्थनामनादृत्य स्वकान्तानुवर्ती गतो विहङ्गहतकः ।

विन्यस्याण्डं काकनीडे स्वकीयं
शावत्राणं कैतवात्कारयन्त्याः ।
मातुश्शाठ्यं जन्मसिद्धं पिकैत-
न्मूढ स्वैरं दर्शितं मय्यपि द्राक् ॥ २७ ॥

इन्द्रः— मातले, पश्य नलस्य वैमत्यानुतपनम् ।

बलवति विरोधबन्धो दुष्करदुरितानुवर्तनं पुंसाम् ।
सद्यः फलं प्रसूते किञ्चिदभिज्ञोऽपि तत्र मूढोऽयम् ॥

अर्थये याचे । **कलरवेति** । कलरवस्य अव्यक्तमधुरस्वरस्य मधुरिम्णा माधुर्येण, विजितवती जिगाय, इति, त्वं व्यथां, मा स्म गच्छेः । नायं माङ् । किं तु मा शब्दः । सुमानि पुष्पाणि । **विन्यस्येति** । काकस्य बलिभुजः नीडे कुलाये, स्वकीयं आत्मीयं, अण्डं, विन्यस्य निक्षिप्य, शावत्राणं शिशुसंरक्षणं, कैतवात् कपटात्, कारयन्त्याः, मातुः जनन्याः, शाठ्यं वञ्चना, द्राक् झटिति । **बलवतीति** । बलवति वीर्याधिके (पुरुषे) विरोधबन्धः वैरानुबन्धः, पुंसां नृणां,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

मातलिः-- (स्वगतं) आत्मनोऽप्येतद्वचनं तथाप्ययं स्वदोषं नाभिजानाति, (प्रकाशम्) सामान्यबोधिनी खलु स्वामिनो नीतिविधानोक्तिः ।

राजा-- (कति चित्पदानि गत्वा, पुरो विलोक्य ।)

समविकचगुलुच्छप्रच्युतैर्धूळिजालैः
सुरभिलवनसीमा छादयन्दिङ्मुखानि ।
मधुमदमुदितानां झङ्कृतैर्बम्भराणां
मुखरितगगनान्तो वर्तते बालचूतः ॥ २९ ॥

तावदेनमभ्यर्थये, (उपसृत्य, सविनयं)

दुरितानुवर्तनं पापानुवृत्तिरेव, पापानुवृत्तिकार्ये विरोधबन्धे तत्कारणाभेदव्यपदेशः उपचारात् । यद्वा, अनुबन्धः अनुवर्तनं, सद्यः फलं प्रसूते । किञ्चित् अभिज्ञोऽपि अयं तत्र (विषये, मूढः मुग्धः इति योजना । **आत्मन इत्यादि** । एतद्वचनं 'किंचि...मूढोऽयम्" इत्येतद्भाषितम्, आत्मनोऽपि स्वस्यापि समानमिति शेषः । नीतिविधानस्य नयप्रचारस्य उक्तिः कथनं, समानानां भावः सामान्यं साम्यं तत् बोधयति अवगमयतीति सामान्यबोधिनी, विशेषमन्तरा स्वस्मिन् परस्मिंश्च तुल्यत्वार्थप्रतिपादिकेत्यर्थः । **समेति** । गुलुच्छेभ्यः पुष्पस्तबकेभ्यः प्रच्युतैः स्रंसमानैः, धूळिजालैः परागनिकरैः, बम्भराणां भ्रमराणां मुखरितः शब्दितः गगनान्तः अम्बरतलं येन सः,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

पान्थान्पल्लवपाणिनाऽऽतपगतानाहूय संत्रायसे
छायाभिर्द्विजमण्डलं फलरसैस्संप्रीणयस्यन्वहम् ।
आमोदं वहसि स्वयं मृदुहसद्वासन्तिकालिङ्गितः
श्लाघ्यस्सर्वमहीरुहेषु भुवने चूतस्त्वमेकः कृती ॥

किञ्च,

वेणी सर्पमनोहरा मधुकरश्रेणीव लोले भ्रुवौ
वाणी साम्यमुपैति कोकिलरुतैः पाणी तथा पल्लवैः ।
मालत्या तुलिता शरीरलतिका तत् ज्ञातचिह्ना त्वया
सा बाला महनीयसुन्दरगुणा दृष्टा यदि ब्रूहि मे ॥

(विमृश्य) कथं न मे प्रतिवचनं दिशति । हन्त स्थावरः खल्वयम् ।

मधुकरपरपुष्टपल्लवानां
मधुनिलयः स्वयमाश्रयो रसालः ।

बालचूतः रसालपोतः । पान्थानिति । आतपं क्रूरं सूर्यकप्रकाशं गतान् प्रामान्, पान्थान् अध्वगान्, सन्त्रायसे रक्षसि । द्विजानां पक्षिणां मण्डलं समूहं, मृदु मन्दं यथा तथा हसन्त्या सद्यो विकसन्त्ये त्यर्थः [वासन्त्या माधवीलतया, आलिङ्गितः, आमोदं सन्तोषं वासनां च, वहसि बिभर्षि । कृती कुशली । वेणीति । लोले चञ्चले भ्रुवौ चिल्लिके यस्याः सा लोलभ्रूः तस्याः भैम्याः, वेणी रचनाविशेषालङ्कृतः केशकलापः, शरीरलतिका गात्रयष्टिः मालत्या जातीलतया, तुलिता सदृशी । मधुकरेति । मधुकराः भ्रमराः मद्यपायिनश्च, पर

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

अहह सुमशरस्य मूर्ध्नि बाणा-
न्पथिकवधाय बिभर्ति पाप एषः ॥ ३२ ॥

तदयं सर्वथा दूरतः परित्याज्य एव (इत्यन्यतः परिक्रामति ।)

इन्द्रः— मातले, पश्य नलस्य चूतशाखिनि कोपातिशयम् । सर्वथा विषयासक्तचेतसां बुद्धिर्युक्तं न पश्यति ।

मातलिः— (स्वगतं) आत्मनोऽप्येवमित्ययं नाभिजानाति । (प्रकाशं) युक्तमभिहितं स्वामिना ।

राजा— (पुरोऽवलोक्य)

वातकम्पितशिखण्डमण्डनो
वारिवाहदरदत्तलोचनः ।
केकिनीवलयमध्यगश्शिखी
व्याकरोति मदनृत्तमण्डलीम् ॥ ३३ ॥

तावदेनमहमभ्यर्थये, (उपसृत्य) भो भो मयूरराज ;

पिण्डादाः पापाश्च, पल्लवाः किसलयानि विटाश्च तेषां आश्रयः आस्पदं, मधूनां मकरन्दरसानां मद्यानां च, एषः पापः, रसालः आम्रः, पथिकवधाय, पान्थहननाय, बिभर्ति वहति । वातेति । शिखण्डमण्डनं चूडालङ्करणं, वारिवाहे दरं ईषत् दत्तं लोचनं येन सः, केकिनीनां मयूरीणां वलयस्य मण्डलस्य मध्यं अन्तरं गच्छतीति मध्यगः, शिखी

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

अस्तु क्षणं त्वशिखिनीषु विहारकृत्यं
किञ्चिद्विहृत्य कृपयाऽत्र मनः कुरु त्वम् ।
कान्तावियोगविधुरः कुटिले समन्ता-
त्कान्तारवर्त्मनि चरंस्त्वदुपान्तमागाम् ॥ ३४ ॥

अपि च,

चिह्नं तस्यास्सुभग कथये जन्मसिद्धं प्रियायाः
वाणी रम्भा भुवनमहिता तद्गतिर्वा तयेव ।
स्निग्धश्यामद्युतिविलसिता बर्हमालेव वेणी
भ्रातस्तादृग्गुणपरिमळा सा त्वया किन्नु दृष्टा ॥

(विलोक्य सासूयं) हन्त किमयमपि स्वकान्तानुवर्तनपर-स्तदभिमुखमेव परिभ्रमति । (सक्रोधं) रे रे मूर्ख मयूरापशद, किं न श्रुतं 'राजा कालस्य कारणम्' इति । भवतु ।

कालो गमिष्यति जवाज्जलदप्रणेता
हंसावतंसरुचिरा शरदेष्यति द्राक् ।

मयूरः, व्याकरोति विस्तृणोति । **अस्त्विति** । विहारकृत्यं लीलाव्यापारः विधुरः विह्वलः, कुटिले वक्रे, मार्गाभावेन गन्तुमशक्य इत्यर्थः । त्वदुपान्तं तव समीपं, आगां प्राप्तवानस्मि । **चिह्नमिति** । सुभग सुन्दर अथवा कामिनीवल्लभ, बर्हमाला पिञ्छभारः । **काल इति** । जलदानां मेघानां प्रणेता प्रेरकः, कालः वर्षासमय इत्यर्थः । हंसरूपैः अवतंसैः अलङ्कारैः रुचिरा मनोज्ञा, द्राक् झटिति, एकाकिनः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

एकाकिनो घनलताकुहरस्थितस्य
तस्यां तत्र क नु मदः क च वा प्रमोदः ॥

इन्द्रः— (सामर्षं) आः पाप मदायत्ततया मेघानां निर्यापणस्य वा शरदस्समानयनस्य वा कथं ते शक्तिरस्ति ।

राजा— हन्त सर्वत्र कथमिदं मे याञ्चावैमुख्यम् । हा प्रिये, त्वत्कृते नळस्य ईदृशः परिणामः । सखे सोमक न सह्यते खलु शोकावेगः ।

गरीयानुद्वेगस्तनुमतितरां कम्पयति मे
तमोरुद्धं चक्षुर्भ्रमति च मनः खेदमयते ।
विशीर्यन्ते बन्धाः प्रसरति च मोहव्यतिकरः
प्रियाया विश्लेषः प्रळय इव जातो निरवधिः ॥

इन्द्रः— प्रियं नः प्रियं नः ।

विदूषकः— भो वअस्स, कहं एक्कपदे धीरत्तणं मुञ्चेसि ।
भो वयस्य कथमेकपदे धीरत्वं मुञ्चसि ।

असहायस्य, घनाः निबिडाः, लताकुहरे लतानिकुञ्जमध्ये । **आः पापेत्यादीति** । आः कोपे, मदायत्ततया मदधीनतया, निर्यापणस्य प्रस्थापनस्य, हन्तेति विषादे । याञ्चायां वैमुख्यं पराङ्मुखत्वं । **गरीयानिति** । गरीयान् गुरुतरः उद्वेगः व्यथा, तमसा अन्धकारेण रुद्धं पिहितं, अयते प्राप्नोति, विशीर्यन्ते शिथिलीक्रियन्ते, निरवधिः अव-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

राजा— सखे, मम धैर्यमस्त्येव । तथापि कान्तामनुस्मृत्य शोकावेगेन द्रवति मे हृदयम् ।

एकीकर्तुं निखिलभुवनान्यव्यपेक्षं तथाब्धी-
न्भेत्तुं मुख्यानपि कुलधरान्भूयसी शक्तिरस्ति ।
कान्ताध्रुण्मे यदि स विषयो नेत्रयोः श्रोत्रयोर्वा
शौर्यं धैर्यं मम खलु तदा साधु दृश्येत सर्वैः ॥३०॥

मातलिः— अपि श्रुतं नळस्योद्दृप्तवचनं स्वामिना ।

इन्द्रः— तदिदं दुःखप्रलपितं नाम । भवतु, उपरि पश्यावः ।

राजा— (अन्यत्र परिक्रम्य पुरोऽवलोक्य)

अनवरतनिमज्जत्सुन्दरीगण्डभित्ति-
स्तनतटघुसृणौघैः शोणितप्रान्तभागा ।

स्नानरहितः । एकीकर्तुमिति । एकीकर्तुं अभिन्नतया विधातुं, न विद्यते व्यपेक्षा कर्तव्यविषयिणी वाञ्छा यस्मिन् कर्मणि तत् अव्यपेक्षं । एकीकरणक्रियाविशेषणमेतत् । अनायासेनेत्यर्थः । कुलधरान् कुलाचलान्, कान्तायै द्रुह्यतीति कान्ताध्रुट् "वाद्रुहमुह" इत्यादिना ढहः पाक्षिकं ढत्वम् । "क्रुधद्रुहेर्ष्या" इत्यादिना द्रुहिना योगे कान्तायाः सम्प्रदानत्वम् । अपीत्यादि । अपिः प्रश्ने । प्रलपितम् अनर्थकं वचनम् । अनवरतेति । अनवरतं निरन्तरं यथा तथा निमज्जन्तीनां स्नान्तीनां सुन्दरीणां गण्डभित्त्योः कपोलफलकयोः स्तनतटयोश्च विद्य-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

पवनचलितपद्मस्यन्दिमाध्वीकधारा-
द्विगुणितजलपूर्णा दृश्यते कापि वापी ॥

(विभाव्य) सखे सोमक, पश्य तिरश्चामपि कान्तानुवृत्ति-
चातुर्यम् ।

हंसः प्रागुपसंहृतं बिसचयं न्यस्यन्मुखाग्रे क्षिप-
न्पक्षत्योः प्रविकीर्णयोश्च मरुता चञ्चूमुखेनोल्लिखन् ।
पक्षेण स्वयमुद्धृतेन विनतः क्रीडातपत्रं धर-
न्प्रेयस्याः प्रणयेन तत्परिचयप्रागल्भ्यमभ्यस्यति ॥

तदस्मिन्कान्ताप्रवृत्त्यभ्यर्थनं युक्तरूपं मन्ये ।

मानानां घुसृणानां कुङ्कुमानाम् ओघैः प्रवाहैः निकरैर्वा, शोणितः रक्तवर्णताम् आपादितः प्रान्तभागः कूलसमीपदेशः यस्याः सा तादृशी, माध्वीकः मकरन्दः । हंस इति । हंसः, उपसंहृतं आर्जित भक्षणाय खण्डितं च, बिसचयं मृणालनिकरं, मुखाग्रे प्रेयस्याः वक्त्राग्रभागे, क्षिपन् स्वयमर्पयन्, मरुता वायुना, प्रविकीर्णयोः विशीर्णयोः, पक्षत्योः पक्षमूलयोः (सप्तम्यन्तमेतत्) कर्मणः अधिकरणत्वविवक्षायां सप्तमी । पक्षती इति यावत् । चञ्चूमुखेन तोट्यग्रेण, उल्लिखन् ऋजूकरणाय परामृशन्, विनतः विशेषेण नमनं प्राप्तः, स्वयं स्वेन, उद्धृतेन उत्क्षिप्तेन, पक्षेण गरुता, प्रेयस्याः, क्रीडातपत्रं, प्रणयेन प्रेम्णा, धरन् बिभ्राणः, तस्याः मराळ्याः परिचये अनुवृत्तौ, प्रागल्भ्यं चातुर्यं, अभ्यस्यति परिचिनोति । तदित्यादि । अत्यन्तं युक्तं युक्तरूपं, प्रत्ययः विस्रम्भः, मल्लिकाक्षः हंसविशेषः, प्रमाणं

MTE Sastry Library Free Digitisation Indoscripts.org (ISRT)

विदूषकः— (अपवार्य) भो चन्दकेदो, एसो मराळओ तत्तहोदीए पवुत्तिं णिवेदइस्सदित्ति पिअवअस्सस्स रण्णो महन्तो खु पच्चओ ।

भोः चन्द्रकेतो, एष मराळकः तत्रभवत्याः प्रवृत्तिं निवेदयिष्यतीति प्रियवयस्यस्य राज्ञो महान्खलु प्रत्ययः ।

चन्द्रकेतुः— आर्य सोमक नन्वत्र प्रथमघटको मल्लिकाक्षः प्रमाणम् ।

विदूषकः— (स्वगतं) भोदु दक्खिस्सं । प्रकाशं । भो वअस्स अहं वि तह मण्णे ।

भवतु द्रक्ष्यामि । भो वयस्य अहमपि तथा मन्ये ।

राजा— सरः कूलमास्थाय । सविनयं । भो भो राजहंस ।

मुख्यो नैषधभूभुजां नळ इति ख्यातः पृथिव्यामहं
कश्चित्कांचनकान्तिमानघटयद्याम्मे मराळः पुरा ।
सा बाला दयिता विदर्भदुहिता कोपेन वा केन वा
हित्वा मां विपिनं गता शशिमुखी न क्वापि सन्दृश्यते ॥

ततः ।

प्रमाता । मुख्य इति । निषधानां राजानः नैषधाः, विदर्भ-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

सञ्चारस्ते दिवि भुवि तथा दिक्षु वा निर्निरोधः
तत्सर्वेषामहमभयदोऽप्यर्थितां त्वय्युपैमि ।
दृष्टा बाला यदि कथय मे केन वा कुत्र नीता
तादृक्कर्मा यदि स मघवाप्यग्र हन्तव्य एव ॥ ४२ ॥

इन्द्रः—— (सक्षोभम्) आः पाप, नैषधापशद, दुरात्मन्, कथं ममाप्यधिक्षेपः । ततो वैदर्भीकृते प्रबलापकारिणं त्वामद्यैव निहन्मि (इत्युत्तिष्ठन् मातलिना निवारितस्तिष्ठति ।)

राजा— (विचिन्त्य सकरुणम्)

परिणयविधावेकः सन्धिं व्यधत्त मृगीदृशः
खगवर इति ख्यातिर्लोके बभूव कुलस्य ते ।
तदुपकरणे द्राक्मा भूयाद्वृथा विधिवैशसं
सुभग शुभदां बुद्धिं कृत्वा यतस्व ममेहिते ॥

किं विशेषतः कथनेन,

कान्तां काम इवाशु सङ्घटय मे विश्लेषदुःखाकुलां
सङ्क्षोभात्कलुषां मतिं कतकवत्पाथः प्रसन्नां कुरु ।

दुहिता विदर्भराजपुत्री, । संचार इति । निर्निरोधः निष्प्रत्यूहः, अर्थितां याञ्चां, मघवा इन्द्रः । परिणयेति । परिणयविधौ उद्वाह कृत्ये, तद् तस्मात्, उपकरणे मदुपकारविषये, विधिवैशसं दुर्विधिविल सितनिबन्धनं औदासीन्यं, वृथा, मा भूयात् मा भवतु । ईहिते अभीष्टे । कान्तामिति । संक्षोभात् दौस्थ्यात्, कलुषां अप्रसन्नां,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

आधत्स्व स्वयमादरेण सुमनोमोदं वसन्तो यथा
त्वद्वर्ग्येण विनिर्मितां प्रथमतः ख्यातिं भुवि ख्यापय ॥

इन्द्रः— मातले, गन्धर्वयोगिन्या नीयमानां नृपतनयामपि कथयेद्विहङ्गहतकः ।

मातलिः— विहङ्गजातिषु कुशलः खलु राजहंसः ।

इन्द्रः— (सासूयं) भो भो विहङ्गहतक,

यदि कथयसि भैमीं भूपतेः साहसिक्या-
द्रुतिमिह तव हन्यां मानसाय प्रयुक्ताम् ।
कुलगुरुरथवा ते वैधसो राजहंसः
कितव मयि विरोधात्तीक्ष्णदण्डं विदध्यात् ॥

मतिं, पाथः तोयं, कतकेन तुल्यं कतकवत् पङ्कच्छित्फलवत्, त्वं, प्रसन्नां निर्मलां कुरु । वसन्तः मधुमासः सुमनसां पुष्पाणां मोदं विकासं, यथा तनोति, तथा, स्वयम्, आदरेण, सुमनसां सुहृदयानां मादृशां कामिनां कामिनीनां च मोदं तुष्टिं, आधत्स्व उत्पादय । तव वर्गः त्वद्वर्गः तत्र भवः त्वद्वर्ग्यः तेन हंसेन, प्रथमतः विनिर्मितां उत्पादितां ख्यातिं "दिव्यो हंसः अवनितलालङ्कारौ परस्परं बद्धानुरागौ दुःसहमदनबाधासन्तप्तौ दमयन्तीनैषधौ निरुपाधिकया करुणया संयोजयामास' इत्येवंरूपां प्रसिद्धिं, भुवि, ख्यापय बहुलीकुरु । **यदीति** । कुलगुरुः अन्वयकूटस्थः, वेधसः ब्रह्मणः अयं वैधसः, राजहंसः चतुर्मुखवाहनीभूतो मरालराज

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

मातलिः— (स्वगतं) हन्त नृपस्योन्मत्तता बलरिपोरपि संक्रान्ता ।

राजा— (विलोक्य) कथमयं स्वप्रेयसीमपि हंसीमुत्सृज्य उत्तरेणाम्भः समुत्पतितः । (विचिन्त्य सश्लाघं) सत्यमयं मत्प्रियान्वेषणाय प्रस्थितः स्यात् ।

इन्द्रः— अरे रे नैषध वैधेय, स्वप्रियायाः बिसखण्डसंपादनाय गतं हंसं कथमन्यथा शङ्कसे ।

राजा— भवत्वन्यत्र गच्छामि । (इति परिक्रम्य वनान्तरं गत्वा विलोक्य) हन्त सर्वतः प्रियाशून्यं दृश्यते वनमिदम् । (सशोकम्) हा प्रिये विदर्भराजनन्दिनि, क्व गतासि । देहि मे प्रतिवचनं,

मुग्धस्मितं मुहुरुदित्वरकान्तिकान्तं
कर्णान्तपूर्णनयनं वदनं त्वदीयम् ।
दृष्टं सकृत्सुमुखि केळिगृहे मया त-
न्दूयाऽपि दर्शय मम प्रणयाभिरामम् ॥

विदूषकः— (सकरुणम्) एसो महाराओ महाणुहावो वि-

इत्यर्थः । कितव वञ्चक । तीक्ष्णदण्डं क्रूरदण्डं । हन्तेत्यादि । उन्मत्तता चित्तविभ्रमः, बलरिपोरपि इन्द्रस्यापि, उत्तरेण उत्तरदिग्भागेन (एनबन्तमव्ययमिदम्) वैधेय मूर्ख । मुग्धेति । मुग्धं सुन्दरम्, उदि-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

हिणो दुव्विलसिदेण विसमवणराइसु अहिणवपल्लवकोमळेहिं चळणेहिं परिब्भमन्तो एआरिसं दुःक्खं अणुहोदि ।

एष महाराजः महानुभावो विधेर्दुर्विलसितेन विषमवनराजिषु अभिनवपल्लवकोमलाभ्यां चरणाभ्यां परिभ्रमन् एतादृशं दुःखमनुभवति ।

चन्द्रकेतुः— (विचिन्त्य सव्यथं ।)

गुणोत्कर्षे लोभाद्भुवनमहितो भीमदुहितु-
र्विमुच्य स्वं देशं विकलमतिरन्तःपुरमपि ।
भियाहेतोर्दैवे विगतकरुणे कुण्डिनपुरी-
वनान्ते दुःखेन भ्रमति निषधानामधिपतिः ॥

इन्द्रः— मयि स्थिते कथमस्य गुणोत्कर्षे लोभः । मूढः किं वृथा वने परिभ्रमति । अद्यैव स्वपुरीं प्रति यातु ।

सख्यौ— हळा पिअसहि दमअंदि, एसो तुह हिअअवल्लहो महाभाओ तव किदे अदिमेत्तं दुःखं अणुहोन्तो विळवदि खु । ता कहं अज्ज वि णिक्करुणासि । सव्वहा इदो वरं ण जुत्तं एव्वं ठादुं । झत्ति मुहकमळं दंसिअ पडिवअणं देहि ।

त्वरा उदिता । **गुणोत्कर्ष** इति । भीमदुहितुः वैदर्भ्याः गुणोत्कर्षे, लोभात् स्पृहया, विकला अधीरा मतिः यस्य सः तादृशः ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

हा दमयन्ति, एष तव हृदयवल्लभो महाभागः तव कृते अतिमात्रं दुःखमनुभवन् विलपति खलु। तत्कथमद्यापि निष्करुणासि सर्वथा। इतः परं न युक्तम् एवं स्थातुम्। झटिति मुखकमलं दर्शयित्वा प्रतिवचनं देहि।

राजा— (अन्यत्र गत्वा विलोक्य सस्नेहं)

वनभुवि चरन्नेणीयूथस्थितस्तरुणो मृगः
प्रकृतिचपलः कल्याणीनां विलोचनबान्धवः।
हृदयदयिताविश्लेषार्तं चिराय विभाव्य मां
दरविवलितग्रीवं किञ्चिद्विवृत्य विलोकते ॥४८॥

तदेनं पृच्छामि (इति दूरतः स्थित्वा किञ्चिदुच्चैः।)

आस्तामद्य प्लुतगतिरिह स्थीयतां किञ्चिदग्रे
मा ते मत्तस्सुभग मृगयासङ्गिनी भीतिरस्तु।

वनभुवीति। एणीनां हरिणीनां यूथे समूहे स्थितः, प्रकृत्या स्वभावेन चपलः चञ्चलः, कल्याणीनां सुन्दरीणां स्त्रीणां, दरम् ईषत् विवलिता ग्रीवा कण्ठः यस्मिन् कर्मणि तत्, विलोकनक्रियाविशेषणमेतत्। **आस्तामिति।** अद्य, प्लुतगतिः, आस्ताम्, इह, स्थीयतां, त्वयेति शेषः। सुभग। ते, मत्तः मत्सकाशात्, मृगयासङ्गिनी आखेटकसम्बन्धिनी, भीतिः, मास्तु। मार्गासस्या मार्गवशात्, विचिन्वन्

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

मार्गासत्त्या स्वयमुपगतोऽस्म्यत्र कान्तां विचिन्व-
न्सा चेद्दृष्टा हरिण मम च ब्रूहि तस्याश्च वार्ताम् ॥

किञ्च । भो भो सारङ्गपते, तव हितं ब्रवीमि ।

जानक्याः प्रियविप्रयोगकृदभून्मूढो मृगः कश्चिदि-
त्यव्याजादयशः कठोरमभवत्त्वज्जातिसाधारणम् ।
तन्मार्ष्टुं घटयाशु सुन्दरदृशा मां त्वं तथा चेदिदं
त्वद्वंशस्य विभूषणं कुलपतेरिन्दोः कुरङ्गस्य च ॥

चन्द्रकेतुः— (विलोक्य) कथमयं तुरङ्गप्लुतगत्या जवाद्गत एव । (विमृश्य) मद्वचः प्रमाणमिति प्रत्ययादङ्गीकृत्य प्रियान्वेषणप्रवृत्त इति मन्ये ।

इन्द्रः— अयि मूढ, सोऽयं कुरङ्गः स्वप्रियान्वेषणाय अभिनवशाद्वलस्थलीविलोकनाय च गत इति मन्यस्व ।

विदूषकः— (अपवार्य) भो चंदकेदो तत्तहोदी कीरिसं अवत्थं पडिवण्णा, जीवदि वा ण वेत्ति ण आणीअदि । ताए विप्पओअदु:खेण पिअवअस्सो पकिर्दि उज्झिअ उम्मत्तो विअ काणणेसु परिब्भमन्तो विळवदि । ता का गई ।

गवेषयन् । जानक्या इति । प्रियेण दयितेन श्रीरघुनन्दनेन विप्रयोग-कृत् विश्लेषकारी, अव्याजात् हेतुं विना, तव जातिः त्वज्जातिः तस्य

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

भो: चन्द्रकेतो तत्रभवती कीदृशीमवस्थां प्रतिपन्ना जीवति वा न वेति न ज्ञायते । तस्या विप्रयोगदु:खेन प्रियवयस्य: प्रकृतिं उज्झित्वा उन्मत्त इव काननेषु परिभ्रमन् विलपति । तत् का गति: ।

चन्द्रकेतु:— भवत्वन्यत्र नयाव: (प्रकाशं) महाराज, विपिनान्तरं गत्वा विलोकयाव: । (इति तथा कुर्वन्ति ।)

राजा— (तटिद्रुचिं विभाव्य) कथं कान्ताया: देहप्रभेव संदृश्यते । (सर्वतो दृष्टिं प्रसारयन् । ऊर्ध्वमवलोक्य) हन्त कथञ्चिल्लब्धा प्रियाप्रवृत्ति: ।

विदूषक:— (सहर्षं) कहं ळद्धा ।

कथं लब्धा ।

राजा— सखे पश्य ।

अङ्के निधाय दयितां मुहुरुन्मिषन्ती-
मभ्रास्थित: कुटिलतस्कर एष दृष्ट: ।
कोपादिमं यदि निहन्मि भयाद्विमुक्ता
कान्ता पतेद्भुवि तत: किमहं करोमि ॥ ५१ ॥

साधारणं सामान्यं, तत्, मार्ष्टुं अपनेतुं, मां, सुन्दरदृशा प्रणयिन्या घटय योजय । कुरङ्गस्य हरिणस्य । अङ्क इति । अङ्के उत्सङ्गे, उन्मि-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

विदूषकः— भो वअस्स, एसो जळभरभरिदसिणिद्धसा-मळो जळधरो खु अंबरअळे ळक्खीआदि । एदस्सिं परि-प्फुरंतिं सोदामिणिं पेक्खिअ तत्तहोदित्ति कहं मण्णेसि ।
भो वयस्य जलभरभरितस्निग्धश्यामलो जलधरः खल्वम्बरतले लक्ष्यते । एतस्मिन्परिस्फुरन्तीं सौ-दामिनीं प्रेक्ष्य तत्रभवतीति कथं मन्यसे ।

राजा— चन्द्रकेतो, अपि सत्यं सोमकवचनम् ।

चन्द्रकेतुः— महाराज, सत्यमियं विद्युदेव ।

राजा— तर्हि जलधरं पृच्छामि । (इति तदभिमुखः स्थित्वा सबहुमानं)

उच्चैरम्बुधर त्वमम्बरगतिर्धत्से जगज्जीवनं
पान्थानां श्रमहारिणीं कलयसि च्छायां वियुक्तानपि ।
यूनः सङ्घटयस्यनङ्गवशगान्विद्युत्प्रियालिङ्गित-
स्तस्मात्त्वां निखिलोपकारनिरतं संप्रार्थये सादरम् ॥

(विचिन्त्य सविनयम्)

षन्तीं प्रस्फुरन्तीं, अभ्रं मेघः । **उच्चैरिति** । हे अम्बुधर मेघ । त्वम्, उच्चैः उन्नतस्थाने, अम्बरे आकाशे गतिः गमनं यस्य सः तादृशः सन् , जगतां जीवनं जीवनहेतुभूतं तोयं, धत्से वहसि । युवतयश्च युवानश्च युवानः तान् यूनः "पुमान् स्त्रिया" इत्येकशेषः । विद्युत्

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

अयि जलद नमस्ते मुञ्च वैमत्यमस्यां
ननु विजितवती त्वां कुन्तळश्रीविलासैः ।
व्रजति दयितया ते विद्युता सख्यमेषा-
तदनघ समवेक्ष्य ब्रूहि कान्ता क याता ॥५३॥

इन्द्रः— परिभवदुःखी कथं कथयेत् ।

राजा— (घनगर्जितं श्रुत्वा सानुमोदं) तथेत्यङ्गीकृतमनेन । भवतु, भो भो वलाहक । कान्ताकृते भवता सहायेन भवितव्यम् ॥

दृष्ट्वा मन्द्रस्तनितसुभगं विद्युदालिङ्गितं त्वां
कान्ता दुःखप्रसरविवशा हन्त मूर्च्छामुपेयात् ।
दीनां सद्यः शिशिरमरुता सान्त्वयन्मत्प्रवृत्त्या
प्राणत्राणं कलय भगवन् प्राणिनां त्वं शरण्यः ॥

अन्यत्र गच्छामि (इति परिक्रम्य विचिन्त्य) हन्त, सर्वथा, निर्घृणोऽस्मि ।

तटिदेव प्रिया दयिता तया आलिङ्गितः आश्लिष्टः। **अयीति** । अयीति कोमलामन्त्रणे । जलद मेघ, वैमत्यं द्वेषं, एषा, ते दयितया, विद्युता, सख्यं, व्रजति, (कान्त्येति शेषः) न विद्यते अघं द्वेषरूपो दोषः यस्य सः अनघः तस्य सम्बुद्धिः अनघ । **दृष्ट्वेति** । दुःखस्य प्रसरेण वृद्ध्या विवशा परतन्त्रा उपेयात् प्राप्नुयात् । सान्त्वयन् अनुनयन्, मम

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

दुरन्ते कान्तारे मिहिरकरसंतप्तसिकते
चरन्ती बाष्पौघप्रसरनिबिडक्लिन्नपदवी ।
प्रिया मे दुःखार्ता बत महति कष्टे निपतिता
विचिन्त्य क्रूरं मां करुणमिह रोदिष्यति चिरम् ॥

इन्द्रः— अरे मूर्ख, त्वत्प्रिया नन्दनवने बन्दीकृता रोदिति ।

राजा— (पुनर्विचिन्त्य) अहो दैवस्य दौरात्म्यम् ।

लब्धव्या सुदती समस्तमहितेत्युत्कण्ठया तत्कृते
तादृक्साहससान्धिमार्गनिपुणस्तावान्प्रयत्नः कृतः ।
विघ्ने सत्यपि भूयसि प्रणयिनी प्राप्ता कथंचिन्मया
कष्टं कामफलोपभोगसमये वैषम्यमासीद्विधेः ॥

इन्द्रः— अरे दुरालापिन् भवता वञ्चितस्य कुतो मम क्षान्तिः ।

राजा— (निश्वस्य सशोकम्)

प्रवृत्तिः मत्प्रवृत्तिः तया मद्वृत्तान्तेन । दुरन्त इति । दुष्टः अन्तः नाशः यस्मिन् तादृशे । मिहिरस्य सूर्यस्य, करैः किरणैः, सन्तप्ताः सम्यक् औष्ण्यं प्रापिताः सिकताः पुळिनानि यस्मिंस्तत् तस्मिन्, ओघस्य प्रवाहस्य प्रसरेण निबिडं निरन्तरं यथा तथा क्लिन्ना आर्द्रतां नीता पदवी सरणिः यस्याः सा । लब्धव्येति । समस्तैः अखिलैः महिता पूजिता शोभनाः दन्ताः यस्याः सा सुदती भैमी, लब्धव्येति उत्कण्ठया उत्कटेन

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

स्वप्ने दृष्टं किमिदमधुना पूर्वजन्मानुभूतं
प्रौश्चर्यं प्रकटनपटुश्चेतसो वा विकारः।
व्यक्तीभूय क्षणमिह पुनर्वैद्युतं कर्म गूढं
मन्ये मायाविलसितमिदं [illegible] विदुद्भूय नष्टम् ॥

(विमृश्य) सर्वथा दैवेन वञ्चितोऽस्मि कुतः।

दैवेन सङ्घटयताद्भुतसंविधानं
सर्वं समर्थ्यत इति प्रमदं गतोऽस्मि।
सम्प्रत्यकाण्डकुटिलेन विमथ्य तन्मे
न्यासीकृतं मनसि निष्करुणेन दुःखम् ॥ ५८ ॥

इन्द्रः— तदिदं नः प्रियमेव।

विदूषकः— (सकरुणं) भो विहे, णिक्करुणोसि तुमं। जेण तुए पिअवअस्सो उव्वेळदुक्खपरिवाहविसमतरङ्गमाळासु परिब्भमइ।

भो विधे, निष्करुणोऽसि त्वं। येन त्वया प्रियवयस्य उद्वेलदुःखपरीवाहविषमतरङ्गमालासु परिभ्रमति।

अभिलाषेण, तत्कृते तदर्थं, वैषम्यं वैमुख्यं। स्वप्न इति। प्रकटने प्रकाशने पटुः समर्थः, विद्युत इदं वैद्युतं तटित्संबान्धि कर्म, इह, क्षणं, व्यक्तीभूय, पुनः गूढं लीनं वा, अदः तादृशं, मायाविलसितं (कर्तृ)। दैवेनेति। प्रमदं हर्षं, अकाण्डे असमये कुटिलेन वक्रेण,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

इन्द्रः— तथैव परिभ्रमतु मूर्खः ।

राजा— 'दैवेन संघटयतेति' पुनस्तदेव पद्यं पठन् शोकावेगेन मूर्च्छति ।

इन्द्रः— (सहासं) फलितमस्य कान्तान्वेषणप्रवृत्त्या ।

विदूषकः— (राजानं मूर्छितं दृष्ट्वा) हा हदोम्मि देव्वहदएण । जेण पिअवअस्सो एदस्सिं दिणअरकरव्वइअरसंतत्तवालुआदुव्विसहे काणणमहीअळे निपडिअ मोहं उवगदो । हा महाभाअ पिअवअस्स, हा वीरसेणणरेंदपुण्णपरिणामभूद । हा साहुजनवच्चळ, हा तिहुवणमङ्गलावदार, अंदेउरसुंदरीअणं उज्झिअ भीमणअरं पविट्ठस्स तुह कहं ईरिसो विसमपरिणामो संघडिदो । हा विदब्भराअणंदिणि, दमअंदि, तुह किदे पुण्णकित्तिणो णळस्स अपुव्वो विहिदुव्विळासो संवुत्तो । हा पुत्तवच्चळे अज्जे हा सीळरक्खिदे घरिणि देसंतरंमि मह पिअवअस्सस्स एक्कपदे विपरिणामो । तं विणा खणमेत्तं वि अहं ण जीविस्सं । तदो उवरि तुम्हाणं कीरिसी दसा हविस्सदित्ति ण आणे । (इति सशिरस्ताडनमधः पतित्वा मूर्छति ।)

हा हतोऽस्मि दैवहतकेन । येन प्रियवयस्य एतस्मिन् दिनकरकरव्यतिकरसंतप्तवालुकादुर्विषहे कानन-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

महीतले निपत्य मोहमुपगतः । हा महाभाग प्रिय-वयस्य, हा वीरसेननरेन्द्रपुण्यपरिणामभूत, हा साधुजनवत्सल, त्रिभुवनमङ्गळावतार, अन्तःपुर-सुन्दरीजनमुज्झित्वा भीमनगरं प्रविष्टस्य तव कथमीदृशो विषमपरिणामः सङ्घटितः। हा विदर्भ-राजनन्दिनि दमयन्ति, तव कृते पुण्यकीर्ते-र्नळस्य अपूर्वो विधिर्दुर्विलासः संवृत्तः । हा पुत्र-वत्सले आर्ये, हा शीलरक्षिते गृहिणि, देशान्तरे मम प्रियवयस्यस्य एकपदे परिणामः । त्वं विना क्षणमात्रमपि अहं न जीविष्यामि। तत उपरि युवयोः कीदृशी दशा भविष्यति इति न जाने ।

(सख्यौ राजानं विलोक्य दुःखेन भीतिमापन्ने परस्परमालिङ्ग्य रुदितः ।

चन्द्रकेतुः— हन्त महान्प्रमादः संवृत्तः। (इति सरभसमुपेत्य राज्ञो देहसक्तां धूळिमुन्मृज्य पटच्छायां कृत्वा सास्रं)

श्वेतातपत्रशतमध्यचरो महीपः
छायां गतः पटभवामिह मोहमाप्य ।

विमथ्य विशेषेण क्षोभमापाद्य । श्वेतेति । पटभवां वस्त्रोत्पादितां छायां

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

पृथ्वीतले कुटिलकण्टकपांसुजुष्टे
शेते कथं विधिवशाद्विषमे वनान्ते ॥ ५९ ॥

हा गूढपातकिनि दमयन्ति, जगद्विलयायैव त्वं विदर्भराजेन प्रसूतासि ।

प्राप्ता चेद्भवती लयं तव पतिस्तद्बन्धुमित्रादयो
माता ते जनकश्च तस्य सुहृदस्तद्बान्धवास्तद्भटाः
न स्थास्यन्ति परम्पराक्रमवशादित्थं समस्ता जना
लीयन्ते तदिह त्वया विकरुणे शून्यं जगज्जायते ॥

(विमृश्य सकरुणम्) अहो करुणस्य बहुधा परिवाहः । यतः ।

एको रसोऽयं करुणो विभिन्नः
प्रकारभेदैर्निषधाधिनाथे ।
उद्वेलतां गच्छति तोयराशौ
तरङ्गजालैरिव वारिपूरः ॥ ६१ ॥

इन्द्रः— प्रियं नः प्रियम् ।

अनातपं, आ आप्त्वा आप्य " समासेऽनञ्पूर्वे क्त्वो ल्यप् " इति ल्यप् । कण्टकाः तीक्ष्णाग्राः सूचीसमानाः शङ्कुविशेषाः । प्राप्तेति । इत्थं, समस्ताः अखिलाः, लीयन्ते नश्यन्ति । विकरुणे दयाहीने इति भैमीसम्बोधनम् । एक इति । एकः, अयं करुणो रसः करुणाविप्रलम्भरसः,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

चन्द्रकेतुः— भद्रे माधविके, नायमवसरो मुग्धप्रलपितस्य। तत्सत्वरं नळिनीदळसंपुटकेन नदीजलमाहर ।

माधविका— (तथा करोति)

चन्द्रकेतुः— (राज्ञो विदूषकस्य च हृदये सलिलमासिच्य नयने च प्रमृज्य आर्द्रपटेन वीजयति ।)

राजा— (चक्षुषी उन्मील्य उत्थाय) त्वमेव सखा सोमक।

विदूषकः— (लब्धसंज्ञो राज्ञः समीपमुपेत्य,) भो वअस्स, दिट्ठिआ भवदा पच्चुप्पण्णजीविदो जीवळोओ ।

भो वयस्य, दिष्ट्या भवता प्रत्युत्पन्नजीवितो जीवलोकः ।

राजा— (श्रममभिनीय) महती मे पिपासा ।

चन्द्रकेतुः— इतः पूर्वभागे दीयतां दृष्टिः ।

वियति कुसुमगन्धाः सर्वतः संप्लवन्ते
ध्वनति मधुपमाला पद्ममाध्वीकलोला ।

" पूर्वानुरागमानौ च प्रवासकरुणाविति "। इति विप्रलम्भः चतुर्धा विभक्तः। तोयराशौ समुद्रे, तरङ्गजालैः ऊर्मिपरस्पराभिः, वारिपूर इव, निषधाधिनाथे नळमहाराजे, प्रकारभेदैः नानाप्रकारैः विभिन्नः भेदमासादितः सन्, उत्क्रान्तः वेलायाः उद्वेलः तस्य भावः उद्वेलता तां उद्वेलतां मर्यादातिलङ्घनं, गच्छति । वृत्तम् उपजातिः । **वियतीति ।**

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

सुरभिलसुकुमारः स्पन्दते शीतवात-
स्तदनघ पुरतस्ते वाहिनी नातिदूरे ॥ ६२ ॥

(सर्वे परिक्रामन्ति)

राजा— (उदकोपगमं कृत्वा, सनिश्वासं नदीमवलोक्य ।)

अयि पुण्यवर्धिनि महाभागे,

संभूतिस्तव भूभृति स्वयमभूद्रत्नाकरे सङ्गमो
मर्यादामयसे वृणोषि कमलामोदं जगत्प्रीणनम् ।
सेवन्ते सुदृशो द्विजाश्च भवतीं नित्यप्रसन्नाशयां
तन्मन्ये वरवर्णिनीषु भवती मान्या गुणैरेधते ॥६३॥

ततस्त्वामभ्यर्थये ।

वियति आकाशे, संप्लवन्ते सम्यक् प्रसरन्ति । माध्वीके मधुरसे लोला सतृष्णा, स्पन्दते किंचित् चलति । वाहिनी नदी । उदन्या पिपासा । सम्भूतिरिति । तव, भूभृति पर्वते, राज्ञि च, संभूतिः उत्पत्तिः, रत्नाकरे समुद्रे रत्नानामाकरवत् अक्षयस्थाने निधीनामाश्रये पुरुषरत्ने च, सङ्गमः समागमः, मर्यादां कूलानतिवर्तिनीं स्थितिं, शास्त्रवश्यतां च, अयसे प्राप्नोषि । जगत्प्रीणनं लोकानन्दनं, कमलामोदं पद्मसौगन्ध्यं कमलयां लक्ष्म्या कमलाया वा हर्षं च, वृणोषि बिभर्षि वहसीत्यर्थः । सुदृशः उत्तमस्त्रियः शुभैकदृष्टयश्च, द्विजाः पक्षिणः ब्राह्मणाश्च, प्रसन्नाशयां निर्मलहृदयां, विमलागाधतीर्थां च वरवर्णिनीषु उत्तमस्त्रीषु, गुणैः, मान्या पूजनीया, एधते वर्धते ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

कान्ता कमलगन्धाढ्या कमनीयगुणोज्ज्वला ।
भीमभूभृद्भवा श्लाघ्या भवतीव विराजते ॥

किञ्च,

हंसस्येव गतिर्मुखं कमलवद्वक्षोरुहौ कोकव-
त्तन्वङ्ग्याः पुळिनोपमञ्च जघनं वेणी तवेवाद्भुता ।
नेत्रे चोत्पलसन्निभे कळरवस्तुल्यश्चकोरीगिरा
स्नातुं पातुमुताम्बु वा गतवती सा चेद्वद त्वं मम ॥

(विभाव्य) कथमवचना दुर्वृत्तासि ।

मुखं कमलसंज्ञया करयुगं तथाङ्घ्रिद्वयं
वरं पुळिनरूपतो जघनमूर्मिनाम्ना भ्रुवौ ।

कान्तेति । कमलस्य पद्मस्य गन्धेन सौरभेण आढ्या परिपूर्णा । अनेन भैम्याः पद्मिनीत्वं व्यञ्जितं । “ पद्मिनी पद्मगन्धा ” इति रतिरहस्ये । भीमभूभृतः भीमराजात् भवः उत्पत्तिः यस्याः सा भीमभूभृद्भवा । हंसस्येति । गतिः गमनम्, कमलेन तुल्यं कमलवत् “ तेन तुल्यं क्रिया चेद्वतिः ” इति वतिप्रत्ययः । वक्षोरुहौ स्तनौ, कोकवत् कोकीच कोकश्च कोकौ ताभ्यां तुल्यौ कोकवत्, चक्रवाकद्वंद्वसदृशावित्यर्थः । वेणी रचनाविशेषविशिष्टः केशहस्तः, तवेव त्वद्वेणीव त्वदीयप्रवाह इव, कलरवः अव्यक्तमधुरः कण्ठध्वनिः, चकोरीगिरा चकोरस्त्रीव्याहारेण, तुल्यः सदृशः मुखमिति । त्वया कर्त्र्या, विभज्य विभागं कृत्वा, सुदृशः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

दृशावसितनीरजे इति तदाख्यया धार्यते
विभज्य सुदृशस्त्वया विदितमत्र दुश्चेष्टितम् ॥

धिक् जडशीले तिष्ठ (इत्यन्यतः परिक्रामति ।)

इन्द्रः— अरे नृपतिपुङ्गव, सत्यमनयैव भैमी व्यापादिता । शूरः खल्वसि । मा मुञ्चैनाम् ।

राजा— परिश्रान्तोऽस्मि, कमन्यं पृच्छामि, (पुरोऽवलोक्य) दृश्यते खलु महान्पर्वतः । तदन्तिकं गच्छामि, (इत्युपसृत्य) भो भो महीधर,

त्वं भूभृद्भुवि विश्रुतो गजमदैरामोदिनी वाहिनी
त्वय्यास्ते विबुधा बुधाश्च परितस्त्वामाश्रयन्ते सदा ।
सद्वंशस्थितिमाबिभर्षि वहसि स्वेनोन्नतिं शाश्वतीं
तस्मात्तुल्यगुणः सखा भवसि मे संप्रार्थये त्वामतः ॥

तदत्रभवता क्षणं मेधा स्थिरीकर्तव्या ।

भैम्याः, (सम्बन्धि) मुखं, करयुगं, तथा, अङ्घ्रिद्वयं च, (कर्म) कमलसंज्ञया तामरसाख्यया, धार्यते उह्यते । जघनं अवलग्नः पुरोभागः, पुलिनरूपतः तोयोत्थितसैकतस्वरूपेण, धार्यते । भ्रुवौ, ऊर्मिनाम्ना तरङ्गाख्यया धार्येते । दृशौ नेत्रे, आसितनीरजे नीलोत्पले इति तदाख्यया, धार्येते । अत्र एतत्समये एतत्स्थले वा, दुश्चेष्टितं दुष्टमाचरणम्, विदितं ज्ञातम् । त्वमिति । विश्रुतः प्रसिद्धः, भूभृत् पर्वतः, पक्षे राजा । वाहिनी गिरिनदी, पक्षे सेना । विबुधाः देवाः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

क्रीडन्ति त्रिदशाङ्गना मम तटे तादृग्विलासादिकं
रूपञ्चाद्भुतमास्थिता इति मुधा मन्यस्व मा गौरवम् ।
अव्याजाद्भुतरामणीयकनिधेः पुत्र्या विदर्भेशितु-
स्तास्सर्वा अपि षोडशीमपि कलां नार्हन्ति पादद्युतेः ॥

इन्द्रः-- अपि श्रुतं भवता नृपस्य निन्दोक्तिर्जातिसाधारण्यादेवीं पौलोमीमपि स्पृशति ।

मातलिः-- देवराज, तदिदं गुणाधिक्यप्रतिपादनं स्तुतिवचनम् ।

इन्द्रः— भवतु यद्यप्यस्यां गुणाधिक्यमस्ति ।

राजा-- भो भो गिरीन्द्र,

बुधाश्च पण्डिताश्च, सदा सततं, परितः समन्तात्, त्वां, आश्रयन्ते आसेवन्ते । सतां उत्तमानां वंशानां वेणूनां पक्षे । अन्वयस्य, स्थितिं, आबिभर्षि वहसि, शाश्वतीं चिरन्तनीमनपायिनीं, उन्नतिं औन्नत्यं, स्वेन, वहसि । अतः अस्मात् कारणात्, त्वां, संप्रार्थये याचे । क्रीडन्तीति । त्रिदशाङ्गनाः देवास्त्रियः, मम तटे, क्रीडन्ति विहरन्ति । आसु अद्भुतं, तादृक्, विलासादिकं रूपं च, अस्तीति, मुधा वृथा, गौरवं, मा मन्यस्व । ताः सर्वा अपि, अव्याजं अकृत्रिमम् अद्भुतं च यद्रामणीयकं सौन्दर्यं तस्य निधेः आस्पदस्य, विदर्भेशितुः विदर्भराजस्य, पुत्र्याः दमयन्त्या -

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

मूलेनावनिमावृणोषि शिरसा व्योमान्तरं गाहसे
सर्वत्राविदितं न किञ्चिदपि ते वृत्तं यदौत्पातिकम् ।
गुप्ता सौधगृहे मम प्रणयिनी केनाप्यकाण्डे हृता
दृष्टा चेदवशा गता दिवि भुवि प्रीत्या तदाचक्ष्व मे ॥

(विभाव्य) कथमयं मौनेनास्ते ; (पुनरुच्चैः) भो भो भूभृद्वर, अपि न दृष्टा सा वरारोहा। (श्रुतिमभिनीय) न दृष्टा सा वरारोहेति कथमनेन प्रतिध्वनिना कथितम् ।

इन्द्रः—— पुरा लूनपक्षस्य गिरेरस्य वज्राद्भयमस्त्येव ।

राजा—— (निश्वस्य, सव्यथं) सखे सोमक, किमत्र कर्तव्यं ।

भ्रान्तं कान्तारमखिलं सर्वे निर्लज्जमर्थिताः ।
न क्वापि दयिता दृष्टा तत्प्रवृत्तिश्च न श्रुता ॥ ७० ॥

विदूषकः—— भो वअस्स, जह आगदं गच्छंम्ह । सव्वह तुह कुलदेवदाणं वणदेवदाणं अ अणुग्गहो होदु ।

भो वयस्य, यथागतं गच्छावः । सर्वथा कुलदे-

पादद्युतेः चरणकान्तेः, षोडशीं कलामपि, नार्हन्ति । **मूलेनेति** । मूलेन अधोभागेन, अवनिं भूमिं, आवृणोषि व्याप्नोषि । प्राणिनां शुभाशुभसूचको भूतव्यापारः उत्पातः, तेन निर्वृत्तम् औत्पातिकं यत् वृत्तम् चरित्रं, अकाण्डे असमये, अवशा अस्वाधीना । **भ्रान्तमिति** । तत्प्रवृत्तिः, तस्या वृत्तान्तः ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

वतानां वनदेवतानाञ्चानुग्रहो भवतु ।

राजा— भवतु, वनदेवताः पृच्छामि । (साञ्जलिबन्धं) भो भो वनदेवताः! वैरसेनिर्नलोऽहमभ्यर्थये तत्रभवत्याः किञ्चिदत्र विदाङ्कुर्वन्तु ।

कान्ताया मम मन्दिरे निवसतिर्दैवेन न क्षम्यते
तेनाभूद्विरहो महान्निरवधिस्तन्वी तदन्विष्यते ।
स्मृत्वा तां व्यसनाग्निना प्रसरता चेतः परं दह्यते
दृष्टा चेदनुमान्य सान्त्वनगिरा ब्रूत प्रसादान्मयि ॥

(आकाशे)

भैमी जीवति कल्याणी किञ्चित्कष्टोऽनुभूयते ।
अचिराद्दैवयोगेन पुनस्त्वां नन्दयिष्यति ॥ ७२ ॥

राजा— (श्रुत्वा सानन्दं) सखे, सोमक, वनदेवताभिरशरीरिण्या वाचा अनुगृहीतोऽस्मि । भवतु गच्छामः (इति सर्वे परिक्रामन्ति)

कान्ताया इति । निवसतिः स्थितिः, तेन हेतुना, महान्, निरवधिः, विरहः, अभूत् । तत् तस्मात्, अन्विष्यते विचीयते । दृष्टा चेत्, अनुमान्य मदुक्तैर्लिङ्गैः सैवेयमित्यनुमाय, यद्वा मत्प्रश्नस्योत्तरप्रदाने सम्मतिं प्रदर्श्य, मयि विषये, प्रसादात् हेतोः, सान्त्वनगिरा आश्वासनवचनेन, ब्रूत कथयत, दयिताप्राप्तिमिति शेषः । **भैमीति ।** कल्याणी मङ्गळकरी,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

(आकाशे) अब्रह्मण्यमब्रह्मण्यम् ।

इन्द्रः— (सरभसं कर्णं दत्वा) कथं देवानां विलाप इव श्रूयते ।

(पुनश्चाकाशे)

शक्रे भीमसुताकृते गतवति क्षोणीतलं दानवाः
छिद्रान्वेषणतत्पराः सपृतना नाकं निरुध्याभितः ।
रथ्यासु प्रचरन्ति हन्त विपुलक्ष्वेळाट्टहासोद्भटा
हस्तोद्धूतनिजायुधद्युतिभरैः प्रद्योतिताशामुखाः ॥

अपि च,

गृह्णन्त्यप्सरसो हसन्ति धिषणं निन्दन्त्युपेन्द्रं द्विषो
पश्यन्ति त्रिदशान्पुरः स्थितवतो धुन्वन्ति दिक्पालकान् ।
कृत्वा स्वस्वगृहान्कवाटघटितान्सर्वेऽपि नाकौकसो
लीयन्ते कतिचित्क्वचित्कतिपये भीताः सुमेरुं गताः ॥

अचिरात् विळंबमन्तरा, दैवयोगेन भाग्यसंबन्धेन । शक्र इति । भीमसुताकृते भैमीलाभार्थं, 'अर्थे कृते च शब्दौ द्वौ तादर्थ्येऽव्ययसंज्ञकौ" इति कोशः । छिद्रस्य अनिष्टोत्पादनार्हसमयस्य अन्वेषणे गवेषणायां, तत्पराः आसक्ताः, दानवाः असुराः, पृतनया सेनया सह वर्तन्ते इति सपृतनाः, नाकमभितः परितः स्वर्गं निरुध्य प्रतिषिद्धपौरजनगमनागमनं विधाय, क्ष्वेळा सिंहनादः, रथ्यासु, राजमार्गेषु, प्रचरन्ति संचरन्ति । गृह्णन्तीति । अप्सरसः देववारवनिताः, धिषणं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

इन्द्रः— (सातङ्कम्) मातले, हन्त प्रमादः संवृत्तः, यदिहमय्यमर्षावेशात्परिभ्रमति रन्ध्रान्वेषिभिर्दानवैः त्रिदिवमप्याक्रान्तमप्सरसश्च गृहीताः। ततः देवसेनाश्च विप्रकीर्णा इति मन्ये, तदितः सहायेन मया सत्वरं गत्वा जेतव्यास्ते दुरात्मान इति तर्कयामि। किमत्र प्रतिविधेयम्।

मातलिः— देवराज, अस्मिन्नतिक्रमे संप्रत्यत्र सन्निहितेन निषधराजेन जय्यास्ते दैतेयाः।

इन्द्रः— मातले, युक्तमुक्तं भवता। तदस्मत्सन्देशेन सत्वरन्नेतव्योऽयं नरपतिः। अहमग्रे गत्वा विप्रकीर्णां सुरवाहिनीं संयोजयिष्यामि। [इति निष्क्रान्तः]

मातलिः— (तिरस्करिणीविद्यामपनीय रथेन राज्ञः समीपं प्रविश्य] विजयतां निषधराजः।

राजा— (निर्विकारचित्तस्सादरमभ्युपेत्य) महेन्द्रसारथे, स्वागतं ते। अपि कुशली तत्रभवान् त्रिदशेश्वरः।

मातलिः— भवादृशवयस्यलाभेन।

बृहस्पतिं, उपेन्द्रं इन्द्रानुजं वामनरूपेणावतीर्णं विष्णुं द्विषः शत्रून् मथ्नान्ति प्रहरन्ति। नाकौकसः स्वर्गवासिनः देवाः। लीयन्ते अन्यैरदृश्या निगूढस्थले आत्मानं गोपायन्तीत्यर्थः। सुमेरुं महामेरुं। **मातले इत्यादि**। प्रमादः अनवधाननिबन्धना विपत्तिः। मयि परि-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

राजा— महेन्द्रसारथे, किमिहागमनप्रयोजनम् ।

मातलिः— असुरविमर्दे नासीरसीमनि भवता सहायेन भवितव्यमिति महाराजशुनासीरः त्वां दिदृक्षते । तत्र ते मनोरथास्सफलाः स्युः ।

राजा— अनुगृहीतोऽस्मि देवराजेन । इतः प्रस्थितोऽस्मि । चन्द्रकेतो, त्वमितस्सोमकेन समं प्रियायास्सख्यौ माधविकां नवमालिकाञ्च, कुण्डिनपुरं नीत्वा तत्र स्थापितै-रस्मदीयैरनुयात्रिकैः सहितः स्वपुरीमुपतिष्ठस्व । अहञ्च महेन्द्रं दृष्ट्वा सत्वरमागमिष्यामि ।

चन्द्रकेतुः— तथा (इति सोमकेन सखीभ्याञ्च सह निष्क्रान्तः)

राजा— (मातलिना सह रथमारुह्य सगर्वाटोपम् ।)

> **बिभर्तु निजसुन्दरीकुचकपोलपत्राङ्कुर-**
> **प्रसाधनविलेखने कुतुकितां शचीकामुकः ।**

भ्रमति सति समन्तादटाट्यमाने सति, त्रिदिवं स्वर्गः, तर्कयामि ऊहे । प्रतिविधातुं योग्यं प्रतिविधेयं, जेतुं शक्याः जय्याः' प्रविशीर्णा विप्रकीर्णा, सुरवाहिनीं देवसेनां, तिरस्करणीं विद्यां स्व-रूपातिरोधानकरीं विद्याशक्तिं, वयसा तुल्यः वयस्यः स्निग्धः, असुरविमर्दे दैत्यसंप्रहारे, नासीरसीमनि सेनामुखे, शुनासीरः इन्द्रः-बिभर्त्विति । शचीकामुकः महेन्द्रः, प्रसाधनम् अलङ्करणं विले,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

भुजो मम शरोर्मिभिर्दलितदैत्यकण्ठस्रुतै-
रसृग्भिरमरापगा प्रविदधातु शोणप्रभाम् ॥७२॥

(इति निष्क्रान्ताः सर्वे)

पञ्चमोऽङ्कः ॥

खनं विचित्रभक्तिभङ्गीविरचनं, तत्र, कुतुकितां कौतूहलं बिभर्तु वहतु । असृग्भिः रक्तैः, अमरापगां देवनदीं गङ्गामित्यर्थः ।

इति श्रीवाधूलश्रीनिवाससूरिविरचितायां दीपिकाख्यायां व्याख्यायां
पञ्चमोऽङ्कः समाप्तः ॥

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

षष्ठोऽङ्कः ॥

—*—

(ततः प्रविशति विमानयानेन गन्धर्वयुग्मम्)

प्रथमः— (समन्तादवलोक्य सभयरोमाञ्चम्)

सखे रत्नाङ्गद, कथमुपक्रान्तस्समरसन्नाहस्सुरासुरसैनिकैः । पश्य,

चञ्चत्खड्गलतातटिद्विलसिता व्यक्तेन्द्रचापोज्ज्वला
शश्वत्ताडितदुन्दुभिध्वनिघनध्वानेन संपूरिता ।
माद्यन्माद्यदनेकपौघविसरद्दानाम्बुसंवर्षिणी
सेना भाति नभो निरुध्य परितः कादम्बिनीवाग्रतः ।

रत्नाङ्गदः— (ससंभ्रमं) सखे चित्राङ्गद ; पश्य,

चञ्चदिति । चञ्चन्त्यः चञ्चलाः खड्गलताः निस्त्रिंशा एव तटिद्विलसितानि सौदामिनीविलासाः यस्यां सा, व्यक्तैः स्पष्टं यथा तथा भासमानैः इन्द्रचापैः शक्रधनुस्समानैः नानावर्णैः शरासनैः उज्ज्वला दीप्यमाना, दुन्दुभीनां वाद्यविशेषाणां ध्वनिरेव घनध्वानः मेघध्वनिः तेन, अनेकपानां गजानां ओघात् समूहात् विसरत् प्रवहत् यत् दानाम्बु मदजलं तदेव धाराजलं सम्यक् वर्षतीति संवर्षिणी, तादृशी, सेना चमूः कादम्बिनीव मेघमालेव, भाति प्रकाशते इति

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

रोषोन्मेषविसारिभूरिकथितस्वस्वापदानोद्भटाः
स्पन्दन्ते विजयैषिणः परमभी हन्तोभये सैनिकाः ।
वाहान्व्यूहयतां गजान्गमयतां पद्भ्यां पुनर्धावतां
कुन्ताः खड्गलताश्च वैरिभयदा वल्गन्त्यमीषां करे ॥

चित्राङ्गदः— हन्त प्रवृत्तं खलु महदुभयेषामप्यायोधनम् । पश्य,

क्रोधोत्सिक्तपरस्परोद्यमकृतक्ष्वेळाट्टहासोद्भटं
शस्त्राशस्त्रिकचाकचिप्रस्तमरं दैवासुरं भासुरम् ।
टङ्कारैर्धनुषामनुक्रमभवैरुद्दामढक्कारवैः
उद्वेलं महनीयमद्भुततमं जन्यं समुज्जृम्भते ॥ ३ ॥

रत्नाङ्गदः— सखे पश्य,

योजना । **रोषेति** । अमी उभये द्वेधा विभिन्नाः, सैनिकाः सेनायां समवेताः वीराः, रोषस्य क्रोधस्य उन्मेषेण उद्गमेन विसारीणि निस्सरन्ति भूरि अधिकं यथा तथा कथितानि उक्तानि यानि स्वस्वापदानानि आत्मीयानि प्राक्तनशौर्यकृत्यानि तैः उद्भटाः उद्वृत्ताः, विजयैषिणः विजयाशंसिः स्पन्दन्ते एकत्रावस्थितिं न लभन्ते । हन्तेति हर्षे । वाहान् हयान्, व्यूहयतां रचनाविशेषेण विभजतां अमीषां, करे, कुन्ताः आयसाः प्रहरणविशेषाः, खड्गलताश्च, वैरिणां शत्रूणां भयदाः भयङ्कराः, वल्गन्ति कम्पन्ते । **क्रोधेति** । क्रोधेन कोपेन उत्सिक्तानां अत्यन्तं दर्पितानां परस्परेषां अन्योन्येषां उद्यमेन प्रयत्नेन कृतः यः क्ष्वेळाट्टहासः सिंहनादाडंबरः तेन उद्भटं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

तटिद्भिरिव सर्वतः क्वचन दीप्तमभ्राङ्कणं
क्वचिद्घनपयोधरैरिव निरन्तराशामुखम्।
क्वचित्तिमिरवल्लरीवलयसंवृतञ्चाभितः
सुरासुररणाङ्कणं भुवनभीषणं लक्ष्यते ॥ ४ ॥

तदावां दूरतः स्थितौ पश्याव: (इति विमानमन्यतः प्रसारयतः)

चित्राङ्गदः— (विलोक्य) सखे पश्य; पश्य।

क्वचिद्धूमैश्श्यामैरभिनवतमालावळिसमै-
र्वलक्षैराळक्ष्यैः क्वचन शरगुच्छप्रतिभटैः।
क्वचिज्ज्वालालीढैरळिकुळयुताशोकतुलितैः
समन्तादाक्रान्तं विलसति नभः काननमिव ॥ ५ ॥

उद्धतं, शस्त्रैश्च शस्त्रैश्च प्रहृत्य युद्धं प्रवृत्तं शस्त्राशस्त्रि, तादृशेन युद्धेन कचेषु कचेषु प्रगृह्य युद्धं प्रवृत्तं कचाकचि, तादृशेन च युद्धेन प्रसृमरं प्रचुरं, भासुरं दीप्यमानं, अनुक्रमभवैः क्रममनुसृत्योत्पन्नैः, उद्दामैः अधिकाधिकैः ढक्कारवैः वाद्यविशेषस्वनैश्च, उद्वेलं वेलामतिक्रान्तं उद्वेलं समन्तादाक्रान्तमिति यावत्। महनीयं श्लाघनीयं, अद्भुततमं, अत्यन्तमाश्चर्यावहं, जन्यं युद्धं, समुज्जृंभते सम्यगभिवर्धते। **तटिद्भिरिति।** अभ्राङ्कणं मेघमण्डलं, क्वचित् घनैः निबिडैः पयोधरैः मेघैरिव, निरन्तराणि नीरन्ध्रतया व्याप्तानि आशामुखानि दिङ्मुखानि यस्मिंस्तत् तादृशं, तिमिराणि अन्धकाराणि तान्येव वल्लर्यः वीरुधः तासां वलयेन मण्डलेन संवृतं आच्छन्नं च, सुरासुररणाङ्कणं देवासुरसमरभूः, भुवनभीषणं जगद्भयङ्करं, लक्ष्यते दृश्यते। **क्वचिदिति।**

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

(विभाव्य) हन्त प्रयुक्तं खलु सुरसैन्येषु वैश्वानरमस्त्रं दैतयैः ।

रत्नाङ्गदः— (विलोक्य) कथमतिक्रम्यते दैत्यहतकैः पश्य,

आग्नेयेऽस्त्रे विमुक्ते प्रसरति रिपुभिर्धूमसंरुद्धनेत्राः
कीर्णैरुल्कासहस्रैर्युधि विबुधभटा हन्यमानाः पतन्ति ।
दह्यन्ते स्यन्दनानां ध्वजशिखरपटास्सैनिकास्सर्वतोऽमी
क्रोशन्ति क्वास्ति वायुः क्व च जलपतिरित्याहयन्तोऽतिदूनाः ॥ ६ ॥

चित्राङ्गदः— (सोपहासं) सखे, इतः पश्य ।

क्वचित् कस्मिंश्चित् स्थलविशेषे, अभिनवानां नूतनानां तमालानां तापिञ्छवृक्षाणां या आवलिः श्रेणी तत्समैः तत्तुल्यैः, श्यामैः नीलवर्णैः, क्वचन कुहचित् प्रदेशे, वलक्षैः धवलैः, अत एव, शराणां काशकुसुमानां ये गुच्छाः स्तबकाः तेषां प्रतिभटैः सदृशैः, आलक्ष्यैः समन्तात् दर्शनीयैः, अलिकुलयुताशोकतुलितैः भ्रमरकदंबकाश्लिष्टाशोककुसुमसदृशैः, धूमैः, समन्तात् सर्वतः, आक्रान्तं व्याप्तं, नभः वियत् (कर्तृ) काननमिव अरण्यमिव, विलसति भाति । **कथमित्यादि ।** दैत्यहतकैः दुष्टैः दैत्यैः, अतिक्रम्यते अविकतया शौर्यं प्रकटीक्रियते । **आग्नेयेति ।** रिपुभिः शत्रुभिः, विमुक्ते प्रयुक्ते, आग्नेयास्त्रे अग्निदेवताके अभिमन्त्रितशस्त्रे, प्रसरति सति संरुद्धनेत्राः संछन्ननयनाः, कीर्णैः विशीर्णैः, उल्कासहस्रैः अपरिमितैः निर्गतज्वालैः अग्निकणैः,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

निस्तन्द्रप्रसरैस्तमिस्रविसरैर्दैतेयमायोद्गतै-
र्निर्विण्णास्सुरसैनिका विमनसो मुह्यन्ति रुद्धेक्षणाः ।
पार्श्वस्थे तपने विधौ हुतवहेऽप्यस्तौजसस्ते पुन-
स्त्वात्मत्राणकलाविधावनिपुणास्सीदन्ति तद्बाधया ॥

रत्नाङ्गदः— (विलोक्य) सखे, कोऽयमतिगम्भीरमधुराकृति-र्वीरवर्यश्शताङ्गेन धावं धावं विमतबलैरभिहन्यमानान्गीर्वाणभटान्निवार्य सान्त्वयन् भिनत्ति शरनिकरैः प्रत्यर्थिकुलानि ।

चित्राङ्गदः— (निर्वर्ण्य) आः परिज्ञातं द्विषद्विजयसाहाय्यकृते मनुष्यलोकादानीतः निषधाधिपतिर्नलः (पुनर्विभाव्य, सस्नेहं) कथमीदृशस्संवृत्तः ।

हन्यमानाः हिंस्यमानाः, विबुधभटाः देववीराः, पतन्ति । स्यन्दनानां रथानां, अमी सैनिकाः पुरो दृश्यमानाः सेनावीराः, क, वायुः, अस्ति, क च जलपतिः अस्ति, इति च, आह्वयन्तः आकारयन्तः, अतिदूनाः अत्यन्तं परितप्यमानाश्च, क्रोशन्ति रुदन्ति । **निस्तन्द्रेति** । तन्द्रायाः निर्गतः निस्तन्द्रः तादृशः प्रसरः निर्गमः येषां तैः पटुप्रसरणैरिति यावत् । तमिस्रविसरैः तमोनिकुरम्बैः, निरुद्धेक्षणाः पिहितलोचनाः, अत एव, निर्विण्णाः निर्वेदं प्राप्ताः, सुरसैनिकाः विबुधभटाः, विमनसः वैमनस्यं प्राप्ताः सन्तः, मुह्यन्ति वैचित्र्यं प्राप्नुवन्ति । तपने सूर्ये, विधौ चन्द्रे, हुतवहे अग्नौ च, पार्श्वस्थेऽपि सन्निहितेऽपि, ते, अस्तौजसः नष्टपराक्रमाः, तद्बाधया तमिस्रबाधया, सीदन्ति क्लेशमनुभवन्ति । **सखे इत्या-**

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

वपुः क्षामं बिभ्रत्कृशमपि सुषुम्णातिरुचिरं
तथाभूतस्सोऽयं नृपतिरिति यत्नादवगतः ।
चिराद्क्ष्णोर्धत्ते मुदमिह महीमण्डनमणिः
सुराणां सर्वेषां सुकृतपरिपाकः फलमुखः ॥ ८ ॥

रत्नाङ्गदः— सखे, समराङ्गणे महान् कलकलः श्रूयते ।

चित्राङ्गदः— (विलोक्य साश्चर्यम्)

धराधिपधनुर्गुणात्सरवमुच्चलन्तश्शरा
विशन्ति विमतोपरि ज्वलितवज्रकीलायिताः ।
पतन्ति गतचेतनाः कतिचिदङ्कुताङ्का
भजन्ति दितिजाः परे कलितजीविताशा दिशः ॥

दि । शताङ्गेन रथेन, साधनेन, धावं धावं धावित्वा धावित्वा (णमुलन्तमव्ययमेतत्) आभीक्ष्ण्ये द्विरुक्तिः । विमताः शत्रवः । निवार्य निरुद्ध्य, सान्त्वयन् आश्वासयन्, प्रत्यर्थिकुलानि शत्रुवर्गान्, भिनत्ति विदारयति । वपुरिति । कृशमपि कार्श्ययुक्तमपि, सुषम्णा उत्कृष्टशोभया "सुषमा परमा शोभा" इत्यमरः । अनेन प्रयोगेन ज्ञायते सुषमाशब्दो नकारान्तोऽपीति । प्रायेणायं ग्रन्थान्तरेषु आकारान्ततयैव व्यवह्रियते । अस्य नकारान्तत्वे प्रमाणं नोपलभ्यते । अतिरुचिरं अतिमनोज्ञं क्षामं, वपुः शरीरं, बिभ्रत् दधानः, तथाभूतः सः नृपतिः अयम् इति, यत्नात्, अवगतः ज्ञातस्सन्, चिरात् बहोः कालात्, अव्ययमेतत् । धत्ते उत्पादयति । धरेति । धनुर्गुणात् चापगतायाः मौर्व्याः सकाशात्, सरवं यथा तथा चलिक्रियाविशेषणमेतत् । उच्चलन्तः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

रत्नाङ्गदः— धिगमीषामोजायितम् ।

> समरभुवि नरेन्द्रे शाश्वतस्थेमसान्द्रे
> विकिरति शरजालं लीलया कालकल्पे ।
> करविगलितशस्त्रा दानवा भिन्नगात्रा
> दिशि दिशि हतशेषाः कान्दिशीका बभूवुः ॥

चित्राङ्गदः— (सश्लाघं) अहो नृपस्य शौर्यमहिमा ।

निःसरन्तः, शराः बाणाः, ज्वलितानि अग्निज्वालासहितानि यानि वज्रकीलानि वज्रशङ्कवः तद्वदाचरन्तः सन्तः, विमतानां शत्रूणां उपरि विशन्ति प्रविशन्ति । भल्लेण कृत्तानि छिन्नानि अङ्गानि येषां ते तथोक्ताः सन्तः, पतन्ति भूमौ निपतन्ति । परे दितिजाः दैत्याः, कलिता चिन्तिता जीवताशा जीवनेच्छा येषां ते तादृशाः, दिशः भजन्ति आश्रयन्ते । धिगित्यादि । ओज इवाचरति ओजायते । अस्मात् भावे क्तः ओजायितं शौर्यम् । "कर्तुः क्यङ् सलोपश्च" इति सूत्रेण उपमानात्कर्तुः सुबन्तादाचारे क्यङ् । सान्तकर्तृवाचकस्य तु लोपो वा । क्यङ्चेत्युक्तेः पक्षे वाक्यमपि । सान्तस्य लोपस्तु क्यङ्सन्नियोगशिष्टः । स च व्यवस्थितः । "ओजसोऽप्सरसो नित्यमितरेषां विभाषया' इति वचनात् । ओजश्शब्दो वृत्तिविषये तद्वति वर्तते ।

समरेति । शाश्वतैः स्थिरैः स्थेमभिः शौर्यधैर्योत्साहस्थितिभिः सान्द्रे निबिरीसे, कालेन मृत्युना ईषदूनः सदृशः कालकल्पः तस्मिन्, 'ईषदसमाप्तौ' इत्यादिना कल्पप् । नरेन्द्रे राज्ञि, शरजालं बाणपरम्परां, किरति विक्षिपति सति । कान्दिशीकाः भयद्रुताः, बभूवुः जाताः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

एकः स्वयं बहुषु दैत्यगणेषु भूपो
युद्धार्भटीरभसभीषणचण्डकर्मा ।
हत्वा रिपूंस्त्रिदशरक्षणबद्धदीक्षः
प्रख्यातकीर्तिरभवत्पुरुहूतमित्रम् ॥

(विचिन्त्य) बहुष्वपि साधनेषु कुटिलमनसां मनीषितं विफलं स्यादिति यदुच्यते तत्सत्यमेव ।

तादृङ्मायाबहुविलसितं दुष्करं साहसिक्यं
स्थैर्यं धैर्यं प्रचुरमतुलं विक्रमो निर्विकल्पः ।
सर्वं भग्नं विफलमभवद्वीर्यलेशेन राज्ञः
पापारम्भप्रवणमनसां दानवानाममीषाम् ॥ १२ ॥

रत्नाङ्गदः— सखे, प्रशान्तोऽयं समरकोलाहलः ।

चित्राङ्गदः— विलोक्य,

एक इति । स्वयमिति मान्तमव्ययं आत्मनेत्यर्थे । युद्धार्भटी युद्धारम्भः रभसः संरंभश्च ताभ्यां भीषणं भयंकरं चण्डं उग्रं च कर्म यस्य स तादृशः, त्रिदशानां देवानां रक्षणे अवने बद्धा धृता दीक्षा व्रतं यस्य सः तादृशः प्रख्याता प्रसिद्धा कीर्तिः यशः यस्य सः, पुरुहूतस्य इन्द्रस्य मित्रं स्निग्धः, अभवत् । तादृगिति । पापारंभेषु पापकृत्येषु, प्रवणं प्रवृत्तं मनो येषां तादृशानां अमीषां, दानवानांअसुराणां, तादृक् अनिर्वचनीयं, मायाबलस्य शांबर्याः विलसितं विलासः प्रसरणशक्तिरिति यावत् । सहसा प्रवर्तन्ते इति साहसिकाः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

विनिहत्य रिपून्मुदा महेन्द्रः
सह राज्ञा स्वपुरीं प्रति प्रतस्थे ।
दितिजा विजिता विषण्णचित्ताः
हतशेषाश्च यथागतं प्रजग्मुः ॥ १३ ॥

तदावामप्यस्मात्समरहतदैत्यशवपूतिगन्धप्रसरदूषितान्नभः-प्रदेशान्निवृत्य सुधर्मायां समरविजयिनमर्हैः पूजनैः सम्मानितं महेन्द्रसखं तं निषधवसुधेन्द्रं विलोकयावः ।

(इति निष्क्रान्तौ)

शुद्धविष्कम्भः ॥

---*---

(ततः प्रविशति एकासनस्थो महेन्द्रः राजा नलश्च । विभवतश्च देवपरिवारः ।)

इन्द्रः— (सपरितोषं) राजन्, वीरसेननन्दन । किमुच्यतां भवतस्त्रिदशेषु निर्निमित्तस्सुमहान्पक्षपातः ।

तेषां भावः साहसिक्यं, स्थैर्यं स्थिरता, अतुलं असदृशं, विकल्पान्निर्गतः निर्विकल्पः, फलाविनाभूत इत्यर्थः । भग्नं नाशितं, विफलं निष्प्रयोजनम् । अभवत् । **विनिहत्येति** । प्रतस्थे प्रययौ । 'समवप्रविभ्यः स्थः' इत्यनेन तिष्ठतेरात्मनेपदम् । दितिजाः दैत्याः, आगतम् अनतिक्रम्य यथागतं, पदार्थानतिवृत्तौ अव्ययीभावः । **तदित्यादि** । पूतिगन्धः दुर्गन्धः तस्य प्रसरेण प्रचारेण, सुधर्मायां देवसभायां,

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

दैतेया भवता जिता दिविषदां नाके स्थितिः कल्पिता
निश्शङ्कं निखिला वयं निजगृहे मोदामहे निर्वृताः ।
स्नेहेनोपकृतिः कृता प्रतिविधौ मा भूम शक्तास्ततः
क्रीताः स्मः किमितः परं ननु जगत्सर्वं त्वया पालितम् ॥

राजा— (सव्रीडं) भगवन्पाकशासन, भवत्परिजननिर्विशेषे मय्यनौपयिकोऽयमुपचारबन्धः ।

सत्स्वन्येषु धराधिपेषु भवता प्रीत्या नियुक्तोऽस्म्यहं
साहाय्ये तव तेजसैव विजिता दैत्या वृथा नः प्रथा ।
मर्यादा भवता कृता सदसि मे दत्तं तथार्धासनं
पूर्वेषां मम भूभुजां फलमिदं जागर्ति पुण्यश्रियाम् ॥

अर्हणैः समुचितैः, पूजनैः पूजाभिः । दैतेया इति । भवता, दैतेयाः असुराः, दिविषदां देवानां, नाके स्वर्गे, स्थितिः प्रतिष्ठा, कल्पिता निष्पादिता । निर्वृताः सुखिताः, निर्गता शङ्का शत्रुविजयजनितसन्देहः यस्मिन् कर्मणि तत् । क्रियाविशेषणमव्ययम् । मोदामहे हृष्यामः । उपकृतिः उपकारः, प्रतिविधौ प्रत्युपकारकरणविषये, वयं, शक्ताः, माभूम न भवामः । "माङि लुङ्" इति लुङ् सर्वलकारापवादः । क्रीताः मूल्यधनदानेन स्वाधीनीकृताः । पालितं रक्षितम् । भगवन्नित्यादि । पाकं पाकनामानं असुरं शास्तीति पाकशासनः इन्द्रः, तस्य संबुद्धिः । निर्विशेषे भेदरहिते, मयि, अयम् उपचारबन्धः उपचारपरिपाटी । उपायएव औपयिकः । स्वार्थे तद्धितः । न औपयिकः अनौपयिकः । सात्स्थिपति । धराधिपेषु राजसु, नियुक्तः आहूतः सहायस्य भावः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

इन्द्रः — राजन्वैरसेने— तदिदं प्रश्रयभाषणन्नाम ।

अथ प्रसादमकरोत्पुरुषः पुराणो
मन्त्रः स्वयं सुरगुरोः फलवानिदानीम् ।
नाके स्थिरा भवति सम्प्रति नः प्रतिष्ठा
यस्मात्त्वया दितिसुता विजितास्समस्ताः ॥

राजा— भगवन्पाकशासन, परवानस्मि भवतः प्रतिवचनं वक्तुम् ।

नासीरसीमनि मया क्षणमास्थितं ते
त्वद्बाहुसारवशगा विवृता जयश्रीः ।
भूयान्मयि त्रिदशनाथ कृतः प्रसादो
वर्तेतरामुपरि सर्वमनोरथानाम् ॥ १७ ॥

इन्द्रः— राजन्वीरसेननन्दन भवतः किमुपकृतं मया ।

साहाय्यं साचिव्यं तस्मिन् । राजन्नित्यादि । वीरसेनस्यापत्यं पुमान्, वैरसेनिः तस्य संबुद्धिः वैरसेने । प्रश्रयभाषणं सविनय आलापः । अथेति । पुराणः पुरुषः श्रीमान्नारायणः, सुरगुरोः बृहस्पतेः, नाके स्वर्गे । भगवन्नित्यादि । परवानस्मि परतन्त्रो भवामि । नासीरेति । ते तव, नासीरसीमनि सेनामुखे, बाहुसारस्य बाहुबलस्य वशगा वश्या, वर्तेतराम् अतिशयेन वर्ते । "तिङश्च" इति तरप् 'किमेत्तिङव्य-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

तव पुनरुपकारप्रक्रमैर्लोकमान्यै-
निखिलभुवनरक्षालम्बनोपघ्नतुल्यैः ।
प्रतिगृहममराणामुत्सवास्संप्लवन्ते
तदनघ किमु वक्ष्ये सर्वथा स्वेन लज्जे ॥

राजा— (सविनयम्) भगवन्, बृन्दारकपते, भवतः परमर्थ-वादोऽयं व्रीळयति माम् ।

अहमेको नृपः पृथ्व्यां जगतामीश्वरो भवान् ।
तदनर्हे मयि श्रीमन्किमेतैरुक्तिगुम्भनैः ॥ १९ ॥

तदलमलम् (इत्यञ्जलिं घटयन्) सर्वथा भवता परिपालि-तोऽस्मि ।

यतः ।

मान्यं सर्वमहीभृतां मम कुलं ख्यातिश्चिरात्प्रापितं
वंशस्याभिनवोऽयमद्य भवता कीर्तिध्वजः स्थापितः ।

प्रघादाम्बद्रव्यप्रकर्षे, इत्याम् । तवेति । निखिलभुवनानां समस्तलोकानां रक्षा पालनं सैव लता तस्याः आलंबनाः अवष्टंभभूताः उपघ्नाः आश्रय-यष्टयः तत्तुल्यैः, गृहे गृहे प्रतिगृहं, वीप्सायामव्ययीभावः । संप्लवन्ते अभिवर्धन्ते । अनघ निर्दोष, सर्वथा सर्वैरपि प्रकारैः, स्वेन आत्मना, लज्जे जिह्रेमि । भगवन्नित्यादि । बृन्दारकपते देवराज, भवतः भवता कृतः, अयमर्थवादः निरर्थकं स्तुतिवचनं, व्रीळयति ह्रेपयति । अहमिति । उक्तिगुंभनैः वचोभङ्गिभिः । मान्यमिति । मान्यं मान-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

संपूर्णाश्च मनोरथाः किमपरं कान्ताकृते तादृशं
चेतःकृन्तनमूर्जितं यदसहं दुःखञ्च तद्विस्मृतम् ॥ २० ॥

इन्द्रः—— स्मृतिमभिनीय (सव्यथं स्वगतं) हन्त महोपकारिण्यस्मिन्राजनि कामाभिभूतेन मया वृथा किञ्चिदपकृतं, (विचिन्त्य)

प्रमदामुपदां विधाय राज्ञः
प्रमदं चेतसि सौहृदेन कुर्वन् ।
प्रबलाप्रकृतिप्रयोगरूढं
व्यसनं तत्सहसा शमं नयामि ॥ २१ ॥

(नेपथ्ये वैतालिकौ)

प्रथमः—— भगवन् विबुधेन्द्र, दिष्ट्या वर्धसे दैतेयनिधनेन ।

प्राप्तेषु त्वदरातिषु प्रविलयं सर्वेषु तत्सुभ्रुवो
निन्दन्त्यो निजदुष्कृतं नवभवद्वैधव्यदुःखाकुलाः ।

नीयं, कान्ता प्रणयिनी दमयन्ती तत्कृते तदर्थमित्यर्थः । तादृशं वक्तुमशक्यमित्यर्थः । चेतःकृन्तनं हृदयारुन्तुदं, ऊर्जितं बलवत्तरं, असहं सोढुमशक्यं च यद्दुःखं तद्विस्मृतमित्यन्वयः । **प्रमदामिति** । प्रमदां प्रकृष्टयौवनमदशालिनीं दमयन्तीं, उपदां उपहारं, विधाय कृत्वा, प्रमदं हर्षं सहसा, तत्, व्यसनं दुःखं शमं शान्तिं, नयामि प्रापयामि । **प्राप्तेष्विति** । त्वदरातिषु तव शत्रुषु, प्रविलयं नाशं, तेषां त्वदरातीनां

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

मन्दारप्रसवावतंसकबरीर्दृष्ट्वा मरुत्सुन्दरीः
सीदन्ति प्रविसारिबाष्पनयना निश्वासकम्पिस्तनाः ॥

द्वितीयः—— महाराज निषधवसुधेन्द्र महेन्द्रसख्येन दानवविजयेन च निखिलनरेन्द्राणामुपरि वर्तसे । यतः,

आलेख्येषु विलिख्य ते रिपुजयप्रक्रान्तिलीलाशता-
न्यङ्काङ्कितवल्लकीकृतकरव्यापारदत्तादराः ।
सन्तानप्रसवाङ्कितेन शिरसा संश्लाघयन्त्यः स्वयं
सामोदस्तिमितेक्षणाः प्रतिगृहं गायन्ति दिव्याङ्गनाः॥

राजा— (श्रुत्वा) हर्षसमुन्मिषत्पुलकजालनिश्चलसर्वाङ्गः विलक्षः स्थितः ।

इन्द्रः— (नन्दनवनाद्वनदेवतानीतां मन्दारमालां राज्ञः कण्ठे निधाय सोत्प्रासं) राजन्वीरसेननन्दन नन्दनवनश्रियं पश्यतु भवान् ।

सुभ्रुवः स्त्रियः, नवं नूतनं यथा तथा भवत् उत्पद्यमानं यत् वैधव्यदुःखं विधवात्वनिबन्धनं व्यसनं तेन आकुलाः क्षुब्धाः, मरुत्सुन्दरीः देवस्त्रियः, सीदन्ति दुःख्यन्ति । आलेख्येष्विति । ते तव, रिपुजयप्रक्रान्तेः शत्रुविजयप्रारंभस्य संबन्धीनि लीलाशतानि नानाविधानि विक्रान्तिविलसितानि, आलेख्येषु चित्रेषु, विलिख्य, वल्लकी वीणा, सन्तानप्रसवाः सन्तानकुसुमानि । हर्षेत्यादि । जालं समूहः, विलक्षः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

राजा— ममापि तद्विलोकने कुतूहलमस्ति ।

इन्द्रः— कः कोऽत्र भोः । (प्रविश्य दौवारिकः)

दौवारिकः— आणवेदु देवराओ ।

आज्ञापयतु देवराजः ।

इन्द्रः— हेमचूड, राज्ञो नलस्य नन्दनवनमार्गं आदर्शय । अहमपि सौधगृहे क्षणं विश्रम्य अनुपदमागन्तास्मि । (इति निष्क्रान्तः)

हेमचूडः— एदु महाराओ । इदो इदो भवं ।

एतु महाराज, इत इतो भवान् ॥

राजा— (परिक्रम्य पुरोऽवलोक्य सहर्षं) अहो मम चक्षुषो-र्जन्मसाफल्यम् । कुतः,

बहुभिस्सुकृतैराप्यं दृश्यते नन्दनं वनम् ।
यत्र कल्पद्रुमाः पञ्च सन्ति वाञ्छितपूरकाः ॥

इदं खलु ।

अभ्येतीव पुरः प्रसारिसुमनस्सौरभ्यवीचीचयैः
स्पर्शे स्पर्शसुदारमन्दपवनैरालिङ्गतीवाभितः ।

विस्मयान्वितः । बहुभिरिति । वाञ्छितपूरकाः अभीष्टवस्तुदायिनः । अभ्येतीति । इदं नन्दनवनं (कर्तृ) सुमनसां पुष्पाणां सौरभ्यवी-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

भृङ्गानां कलनिस्वनेन कुशलान्यापृच्छतीव स्वयं
तन्मे माघवनं वनं नयनयोर्भूयो विधत्ते मुदम् ॥
(कतिचित्पदानि गत्वा विलोक्य सविमर्शम्) अये काचिदत्र सुन्दरी दृश्यते ।

भूतेशनेत्रशिखिदग्धतनुं स्वकान्तं
हित्वा वने रतिरिवात्र तपश्चरन्ती ।
बाला वियोगविधुरा चलितैकवेणी
सेयं विभाति मलिनं वसनं वसाना ॥२७॥

(पुनर्विभाव्य)

चीनां वासना तरङ्गाणां चयैः समूहैः, पुरः अग्रतः, अभ्येतीव अभिमुखमायातीव । स्पर्शं स्पर्शं स्पृष्ट्वा स्पृष्ट्वा, णमुलन्तमेतत् । "अभीक्ष्ण्ये णमुल् च" इत्यनेन णमुल् । "नित्यवीप्सयोः" इति द्वित्वम् । आलिङ्गतीव आश्लिष्यतीव । आपृच्छतीति परस्मैपदप्रयोगश्चिन्त्यः । "आङि नुप्रच्छ्योः" इत्यनेनाङः परस्य पृच्छेरात्मनेपदविधानात् । तस्य अनित्यत्वाश्रयणेन वा निर्वाहः कथं चित् कार्यः । मघोनः इन्द्रस्य इदं माघवनं । भूतेशेति । भूतेशस्य रुद्रस्य नेत्रशिखिना नेत्राग्निना, दग्धतनुं भस्मीकृतविग्रहं, स्वकान्तं निजनाथं मन्मथमिति यावत् । हित्वा त्यक्त्वा, वसनं वस्त्रं, वसाना आच्छादयन्ती । 'वस'

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

एनां वीक्ष्य सरोजसुन्दरमुखीं चक्षुर्विधत्ते मुदं
चेतः स्निह्यति च प्रसादमयते भूयोऽन्तरात्मा मम ।
निर्व्याजं वपुराबिभर्ति जडतां रोमाङ्कुरेणाङ्कितं
दृष्टा किं जननान्तरे किमथवा भुक्ता नु सेयं वधूः ॥

(सम्यङ् निर्वर्ण्य) अये सेयं प्रियेव विभाति ।

कुतः,

रूपं तदेव वपुषस्सुषमा च सैव
स्निग्धा दृशोरपि तथैव विलासलक्ष्मीः ।
मामेव पश्यति रसादभिजानतीव
प्रोन्नम्य वक्त्रममरद्रुनियोजिताङ्गी ॥ २८ ॥

किञ्च ।

आच्छादने । अदादिः आत्मनेपदी । एनामिति । प्रसादं नैर्मल्यं, अयते प्राप्नोति । अन्तरात्मा मदीयं मनः (कर्ता) वपुः शरीरं, रोमाङ्कुरेण पुलकाङ्कुरेण, अङ्कितं लाञ्छितं सत्, व्याजान्निर्गतं निर्व्याजं निर्हेतुकं यथा तथा, जडतां इतिकर्तव्यतामौढ्यमिति यावत् । आबिभर्ति वहति । इयं पुरस्तात् दृश्यमाना, वधूः, अन्यत् जननं जननान्तरं तस्मिन्, दृष्टा किं, अथवा, भुक्ता किं नु । नुर्विकल्पे । 'नु पृच्छायां विकल्पे च' इत्यमरः । रूपमिति । सुषमा परमा शोभा, रसात् रागात्, अमरद्रौ कल्पवृक्षे नियोजितानि अर्पितानि अङ्गानि

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

मुग्धं वपुर्विरहपाण्डु कृशं वहन्ती
संलक्ष्यते मितविभूषणशोभमाना ।
आकालिकैः कतिपयैः कुसुमैस्समेता
ग्रीष्मोष्मणा विलुलिता नवमालतीव ॥ २९ ॥

गतः पृथिवीगोचरा प्रिया केनापि बलादाहृत्य वनमिदं गमिता स्यात् । भवत्वस्याः समीपं गत्वा पश्यामि ।
(इति परिक्रामति ।)

(ततः प्रविशति दमयन्ती चित्रलेखा च)

दमयन्ती— भअवदि चित्तलेहे, णरळोअट्ठिदाणं इत्थिआजणाणं मज्झे अहं एक्का एव्व दुक्खदुव्वार-दुरिदकम्माणुबन्धिणी खु स्वंवुत्ता । जा अय्यउत्तस्स रअ-णपज्जङ्कतळोववेशं उज्झिअ चंदसाळासिअरंमि सुत्ता-एत्थ णंदणवणंमि पबुद्धा दुक्खपरिणामफळं अणुहोमि ।

भगवति चित्रलेखे, नरलोकस्थितानां स्त्रीजनानां मध्ये अहमेकैव दुष्करदुर्वारदुरितकर्मानुबन्धिनी खलु संवृत्ता । या आर्यपुत्रस्य रत्नपर्यङ्कतलोप-वेशमुज्झित्वा चन्द्रशालाशिखरे सुप्ता अत्र नन्द-नवने प्रबुद्धा दुःखपरिणामफलं अनुभवामि ।

-यस्याः सा तादृशी । मुग्धमिति । मुग्धं सुन्दरं, अकाले भवाः आका-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

चित्रलेखा— (सकरुणम्)

वितरन्त्विह भद्रं ते प्रसन्ना वनदेवताः ।
अचिरादेव कल्याणि पतिस्त्वां नन्दयिष्यति ॥३०॥

दमयन्ती— (पुरोऽवलोक्य सप्रमोदानुरागं स्वगतं) कहं अज्जउत्तो विअ इदोमुहं आअच्छंतो दूरे दीसइ । अविणाम चित्तलेहाए वअणं सच्चं हवे । अहवा मह मंदभाअहेआए कुदो तारिसपुण्णपरिणामो । होदु पुच्छिस्सं, (प्रकाशं) भअवदि । चित्तलेहे ! को उण एसो महापुरुसो विअ दूरदो आअच्छंतो दीसइ ।

कथमार्यपुत्र इव इतोमुखं आगच्छन् दूरतो दृश्यते । अपि नाम चित्रलेखाया वचनं सत्यं भवेत् । अथवा मम मन्दभागधेयायाः कुतस्तादृशः परिणामः । भवतु, पृच्छामि (प्र) भगवति चित्रलेखे, कः पुनरेष महापुरुष इव दूरत आगच्छन् दृश्यते ।

चित्रलेखा-- (विलोक्य, स्वगतं) नैषधस्समायाति (विचिन्त्य,

लिकाः तैः, ग्रीष्मस्य तपर्तोः ऊष्मणा औष्ण्येन विक्षालिता ग्लानिं प्रापिता । भगवन्नित्यादि । दुरितकर्म पापकृत्यं, आर्यपुत्रस्य नाथस्य नळस्य रत्नखचिते रत्नालङ्कृते पर्यङ्कतले मञ्चप्रदेशे, उपवेशं आसिकां, उज्झित्वा त्यक्त्वा, वितरन्त्विति । भद्रं मङ्गळं, अचिरात् झटिति । इन्द्रे-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

प्रकारं) भद्रे दमयन्ति; चिरान्महाराजपुरन्दरेणानुगृहीतासि। शृणु तावत्।

इन्द्रेण साह्यकलनाय पतिर्वृतस्ते
पृथ्वीतलात्रिदिवमेत्य निहत्य दैत्यान्।
सम्मानमाप्य कुतुकादुपदीकृतां त्वां
द्रष्टुं चिरादिह समेति नलो महीन्द्रः॥ ३१॥

दमयन्ती-- (राजानमवलोकयन्ती स्थिता।)

चित्रलेखा-- (दमयन्तीं विलोक्य सकौतुकस्मितं स्वगतं)

औत्सुक्यात्स्तिमितं मुदा विकसितं मोहेन चालम्बितं
कातर्याच्चलितं शुचा कलुषितं सौजन्यतस्सान्त्वितम्।
मन्दाक्षेण निकुञ्चितं करुणया प्रेम्णा च सम्प्रेरितं
पश्यन्त्याः प्रियमङ्कतं मृगदृशश्चक्षुस्समालोक्यते॥ ३२॥

राजा-- (उपसृत्य विभाव्य) हन्त सत्यमियं प्रियैव। कष्टं कष्टम्।

णेति। साह्यं साहाय्यं, त्रिदिवं स्वर्गं, एत्य प्राप्य, सम्मानं सत्कारं आप्य आप्त्वा लब्ध्वेत्यर्थः। अनुपदा उपदा संपद्यमाना कृता उपदीकृता उपहारीकृता। च्व्यन्तमेतत्। औत्सुक्यादिति। प्रियं दयितं, पश्यन्त्याः अवलोकमानायाः, लोचनं (कर्तृ) औत्सुक्यात् मनस्तापत्वरादिकार्योत्पादकात् कालाक्षमत्वलक्षणात्, स्तिमितं दयितदर्श-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

क्व कुण्डिनाख्या नगरी धरित्र्यां
वनं क्व चेदं दिवि वासवस्य ।
नभो निरालम्बमतीत्य बाला
विधेर्विपाकादिह दुःखितास्ते ॥ ३३ ॥

भवतु, मत्कृते महतीं विपदं प्रपन्नां प्रियां यथोचितं परिसान्त्वयामि (इति परिक्रम्य समीपतः स्थित्वा,) प्रिये विदर्भराजनन्दिनि ।

दिष्ट्या जीवसि कल्याणि जगच्चोज्जीवितं त्वया ।
नैषधानाश्च वंशोऽयं वचनीयाद्विमुच्यते ॥ ३४ ॥

नलोभेन तत्रैव विषये निश्चलं । स्तिमितं नाम श्रृङ्गारदृष्टिविकारः । 'स्वगोचरान्नचाल्येत यत्तत् स्तिमितमुच्यते" इति तल्लक्षणम् । मुदा प्रमोदेन, विकासितं विकासयुक्तं, विषयगतविशेषासक्तमित्यर्थः । विकसितदृष्टिविकारो यथा । विकासितं यद्विषये विशेषमवगाहते । इति । मोहेन वैचित्त्येन दयितसमागमसुखालाभनिबन्धनविषादोद्रेकेण जनितचित्तास्वास्थ्येनेत्यर्थः । आलंबितं आक्रान्तं । कातर्यात् भयात्, चालितं चाञ्चल्यमासादितं, शुचा शोकेन, कलुषितं कालुष्यं प्रापितं, सौजन्यतः सुजनत्वाद्धेतोः, सान्त्वितं स्वास्थ्यं प्रापितं, मन्दाक्षेण ह्रिया, निकुञ्चितं सङ्कुचितं, करुणया कृपया, प्रेम्णा हार्देन च, संप्रेरितं सन्धुक्षितं अद्भुतं आश्चर्यस्वरूपं यथा तथा, समालोक्यते । क्वेति । दिवि नाके, निरालंबं निराधारं, नभः अन्तरिक्षं, विधेः दैवस्य, विपाकात् दुष्टपरिणा-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

चित्रलेखा— वत्से दमयन्ति, दिष्ट्या प्रियसमागमेन लब्धकामासि । ममाप्यभिमतं संवृत्तम् । कुतः,

शक्रानुमत्यापहृता मया त्वं
दैत्यप्रसङ्गाद्दयितं गतासि ।
प्रियं ममैतद्घटितं नियत्या
छुप्तश्च कृच्छ्रादयशः कठोरम् ॥ ३५ ॥

राजा— (स्वगतं) कथमनयापकृतं, अथवा सत्यं महेन्द्रेणैव प्रियाकृते विप्रियं कृतम् ।

दमयन्ती— भअवदि चित्तलेहे, लोअंदरे मए एआइणी ईरिसो दसापरिणामो अणुहोदव्वोत्ति विहिणो संकप्पो तह घडिदो । ता तुए किं अवकिदं ।

भगवति चित्रलेखे, लोकान्तरे मया एकाकिन्या ईदृशो दशापरिणामोऽनुभवितव्य इति विधेस्सङ्कल्पस्तथा घटितः । तत्त्वया किमपकृतम् ।

राजा— (स्वगतम्) सत्यमाह प्रिया ।

मात् । **दिष्ट्येति** । हे कल्याणि सुभगे, दिष्ट्या भाग्यातिशयेन, अव्ययमेतत् । वचनीयात् अकारणधर्मदारपरित्यागनिबन्धनगर्हणात् । **शक्रेति** । शक्रस्य महेन्द्रस्य, अनुमत्या, अपहृता बलान्नीता । दैत्य-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

प्रेष्यभावप्रवृत्तानां प्रभुचित्तानुवर्तिनाम् ।
युक्तं वा तदयुक्तं वा न दोषाय प्रवर्तनम् ॥३६ ॥

(विचिन्त्य–सव्यथम्)

पुत्री विदर्भनृपतेर्दयिता नलस्य
श्लाघ्या वधूरनुपमा निषधान्वयस्य ।
जातेदृशीयमिति हृज्ज्वलितं रुषा मे
सख्या कृतं मघवतेति च सह्यमासीत् ॥ ३७ ॥

(प्रकाशम्) प्रिये, अचिन्त्यः खलु दैवनियोगः ।

पश्य ।

आनीता कुपितेन दैत्यरिपुणा प्राप्ता वनं नन्दनं
दिष्ट्या जीवसि तन्मया न विदितं त्वद्विप्रयोगादतः ।
भ्रान्तं त्वां परिचिन्वता गिरिवनप्रान्तेषु कृच्छ्रान्मुधा
दैवाद्वैरिजयाय नाकमगमं त्वच्चात्र दृष्टाधुना ॥ ३८ ॥

प्रसङ्गात् असुरसंप्रहारप्रसक्त्या, नियत्या दैवेन । प्रेष्येति । प्रेष्यभावे भृत्यत्वे प्रवृत्तानां स्थितानां, प्रभूणां स्वामिनां, चित्तानुवर्तिनां मनोऽनुसरणशीलानां, युक्तं वा, अयुक्तं वा, तत्, प्रवर्तनं कार्येषु प्रवृत्तिः, न दोषाय, इति योजना । पुत्रीति । वधूः स्नुषा, सख्या सुहृदा, मघवता महेन्द्रेण, कृतामिति हेतोः, सह्यं सोढुं शक्यमासीत् । आनीतेति । दैत्यरिपुणा इन्द्रेण, अतः अस्मात्, त्वद्विप्रयोगात् तव विश्ले-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

दमयन्ती— अज्जउत्त, ईरिसं दुस्सहं दुःखफळं अणुहोंती मंदभाअहेआ अहं पुणो वि भवदो मुद्धमुह पुंडरीअं पेक्खिस्संति पच्चासा वि ण मे आसि । तहवि जम्मन्तरपुण्णपळिणामफळेण तुह सण्णिहाणळाहो ळद्धो । (इति रोदिति)

आर्यपुत्र, ईदृशं दुस्सहं दुःखफलं अनुभवन्ती मन्द भागधेयाहं पुनरपि भवतो मुग्धमुखपुण्डरीकं द्रक्ष्यामीति प्रत्याशापि न मे आसीत् । तथापि जन्मान्तरपुण्यपरिणामफलेन तव सन्निधानलाभो लब्धः ।

राजा— (पटान्तेन तस्या अश्रूण्युन्मृज्य, सकरुणम्)

मा त्वं विषीद सुभगे सुकृतप्रबन्धै-
निस्तीर्य दुःखजलधिं मिलिताविहावाम् ।
अस्मिंश्चिरात्सुघटिते शुभसंविधाने
सम्प्रत्यनौपयिक एव तवाश्रुपातः ॥ ३९ ॥

(ततः प्रविशति महेन्द्रः)

षात् नामतात्, परिचिन्वता अन्विष्यता, भ्रान्तं भावे क्तः । मा त्वमिति । सुभगे सुन्दरि, मा विषीद विषादं मा लभस्व सुकृतप्रबन्धैः पुण्यपरंपराभिः, निस्तीर्य अतीत्य, इह अस्मिन् प्रदेश

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

इन्द्रः— राजन् वीरसेननन्दन, चिरात्प्रियासमागमेन परां प्रमोदकाष्ठामधिरूढोऽसि ।

राजा— भगवन्पाकशासन, भवत्प्रसादमहिमा खल्वयम् । यतः,

बाला पुरा परिणये बहुभिः प्रयत्नैः
प्राप्ता मयेति भगवन्न बभूव तुष्टिः ।
मग्नां विपज्जलनिधौ भवताभिगुप्तां
दृष्टामवाप्य दयितामिह निर्वृतोऽस्मि ॥४०॥

इन्द्रः—

मुनिगिरा हृदयं मम दूषितं
मतिरगादपि तस्य सहायताम् ।
तदुचितं विषमाचरणं कृतं
सुभग तेन मयापकृतं त्वयि ॥ ४१ ॥

राजा— भगवन्पाकशासन, कथमपकृतमिति कथ्यते । सर्वथा भवता मय्युपकार एव कृतः । पश्य,

---

आर्वा, मिलितौ संयुक्तौ । अनौपयिकः अयुक्तइत्यर्थः । बालेति । परिणये उद्वाहसमये, अभिगुप्तां रक्षितां, निर्वृतः सुखित अस्मि, इति योजना । मुनीति । मुनेः नारदमहर्षेः, गि-

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

यल्लभ्यं सुकृतेन नाकभुवनं मर्त्येन दृष्टं मया
त्वद्बाहोरवलम्बनेन बलिनः सर्वेऽपि दैत्या जिताः ।
सम्मानं महदादितेयसदसि प्राप्तं तथार्धासनं
प्राप्ता च प्रमदा पुनस्तदखिलं चिह्नं प्रसादस्य ते ॥

इन्द्रः-- निषधराज ; भवतः किमन्यदाशास्महे

कान्तां प्राप्य मुदं गतोसि युवयोः प्रीतिर्मिथो वर्धतां
सख्यं शाश्वतमावयोश्च भवतः कामाः फलन्त्वन्वहम् ।
पुत्रं प्राप्नुहि सम्भृतं गुणगणैः सिंहासनस्थोऽनिशं
पृथ्वीं सागरमेखलां जितरिपुस्त्रायस्व धर्मे रतः ॥

राजा-- (सपरितोषम् अञ्जलिं बध्वा) भगवन्पाकशासन, भवता परमनुगृहीतोऽस्मि

इन्द्रः— राजन् , किन्ते भूयः प्रियमुपहरामि । तव शिवाः

वचनेन, दूषितं कालुष्यमापादितं, मतिरपि बुद्धिरपि, तस्य मनसः सहायतां, अगात् । इणो लुङि रूपम् । "इणो गा लुङि" इति गाङादेशः । तत् तस्मात् हेतोः । यदिति । नाकभुवनं स्वर्गलोकः, महत् अभ्यधिकं सम्मानं सत्कारः, आदितेयसदसि देवसभायां, प्रमदा कान्ता दमयन्तीति यावत् । कान्तामिति । मिथः परस्परं, अहनि अहनि अन्वहं प्रतिदिनं, संभृतं परिपूर्णं, अनिशं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

पन्थानस्सन्तु । मातलिना आनीयमानमस्मद्रथमारुह्य सभार्यः स्वपुरीं प्रतिष्ठस्व ।

राजा— भगवन्, त्रिदशेन्द्र, भवत्प्रसादेन संपूर्णाः सर्वे मनोरथाः । ततः किमन्यदस्ति प्रष्टव्यम् ।

तथापीदमस्तु भरतवाक्यम् ।

देवः श्रीमानवतु भुवनं देवकीपुण्यराशिः
पृथ्वीदेवाः सुकृतमहिते सत्पथे सञ्चरन्तु ।
काले वर्षैः फलतु धरणिः सस्यजालेन पूर्णा
भूयस्तोषं दधतु सुधियो नित्यमस्मिन् प्रबन्धे ॥

सन्ततं, सागरः समुद्रः मेखला काञ्चीव यस्याः सा तां, पृथ्वीं भूमिं, त्रायस्व रक्ष । देव इति । दीव्यति सृष्ट्यादिव्यापारैः क्रीडतीति देवः, श्रीमान्, श्रिया अविनाभूतः । नित्ययोगे मतुप् । पृथ्वीदेवाः ब्राह्मणाः, धरणिः भूमिः, काले उचितसमये, वर्षैः वृष्टिभिः, फलतु धान्यराशीनुत्पादयतु । सुधियः पण्डिताः, भूयस्तोषं अधिकां सन्तुष्टिं दधतु वहन्तु । प्रार्थनायां लोट् ।

सज्जनहृज्जलजानां विकासमाधातुमात्तकुतुकेन ।
वाधूलश्रीनिधिना प्रबन्धभानुप्रभाधुनोज्ज्वलिता ॥

इति सारस्वतसारज्ञ श्रीवाधूलश्रीनिवाससूरि-
विरचितायां दीपिकाख्यायां व्याख्यायां

षष्ठोऽङ्कः समाप्तः ॥

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

वर्ण्येच्छया सरसनाटकसंविधान-
बीक्षारसादपि तथा कविपक्षपातात् ।
पश्यन्तु रूपकमिदं नळभूमिपाल-
चारित्रवर्णनपवित्रतमं बुधेन्द्राः ॥ ४५ ॥

(इति निष्क्रान्ताः सर्वे)

षष्ठोऽङ्कः ॥

इति श्रीवत्सकुलतिलक कविशिरोमणि श्रीशठकोपसूरि कृतिषु
भैमीस्वयंवरं नाम नाटकं संपूर्णम् ॥

॥ हरिः ओम् ॥

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

भैमीस्वयंवरस्थानां श्लोकानामनुक्रमणिका ॥

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

ए

औ

क

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

B. S. 13

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

आहत्य श्लोकाः—(१५८)

अनुक्रमणिका समाप्ता ।

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

शोधनपत्रम् ॥

—*—

पुट:	पङ्क्तिः	अशुद्धम्	शुद्धम्
१३	१५	परिस्संतोस्मि	परिस्संतोम्मि
१४	११	विस्रं	विस्र
३७	४	पारक्रम्य	परिक्रम्य
४२	९	र्वा वल्ली	र्वीवल्ली
४७	१०	वाात्का	वात्का
५८	४	मह हत्थे	मम हत्थे
६८	११	पिमित्तं	निमित्तं
७६	७	नारदात्	नादरात्
११३	३	धंसेण	प्पंसेण
१०८	१४	स्वणमेत्तं	खणमेत्तं
११३	१	यद्यस्या	इ-यद्यस्या
११३	१५	सौधे	सौधे
११५	७	कथमस्य:	कथमस्याः

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

११८	७	बिलोक	विलोक
१२४	८	दंसेह	दंसेहि
१२७	१२	कलाबती	कलावती
१२९	७	तदन्वेषेण	तन्वेषण
१३२	३	गप्वा	गत्वा
१३६	१३	ग्लापयितुं	ग्लपयितुं
१३८	१०	धुनोषि	दुनोषि
१३९	१	मत्प्रिया	मत्प्रियां
१४३	७	रम्भा	रम्या
१४३	७	तयेव	तथैव
१४६	३	सोमंक	सोमक
१४७	१०	व अस्य	वअस्स
१४८	२	अहममय	अहमभय
१४९	२	रुयार्नि	रुयार्ति
१५०	१५	भूयापि	भूयोऽपि
१५८	२	प्रौश्चर्यै	प्रौढाश्चर्यै
१६४	४	हंसस्येन	हंसस्येव
१६५	५	सुश्चैनां	सुश्चैनां
१६७	१२	सञ्वह	सञ्वहा

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)

१६९	६	निरुन्ध्य	निरुध्य
१७४	२	परमभी	परममी
१७८	९	कृताञ्जिकाः	कृताञ्जकाः ।
१८१	७	विलोकयावः	विलोकयावः
१८३	७	प्रकृति	पकृति
१९२	८	दमयन्ती	दमयन्तीं

MPL Sastry Library Free Digitisation indoscripts.org (ISRT)